कक्षा 11

सत्प्रेरिका

कक्षा
11

एकादशकक्षायै संस्कृत विषयस्य

# सत्प्रेरिका

# सत्प्रेरिका

## एकादशकक्षायै संस्कृत विषयस्य पाठ्यपुस्तकम्

माध्यमिक-शिक्षा-बोर्ड, राजस्थानम्, अजमेरम्

# पाठ्य–पुस्तक–निर्माण–समितिः

पुस्तकम् – सत्प्रेरिका
एकादशकक्षायै संस्कृत विषयस्य पाठ्यपुस्तकम्


संपादकः संयोजकः लेखकश्च – डॉ. ओमप्रकाश पारीकः, व्याख्याता, संस्कृत विभागे
बाबा भगवानदास राजकीय स्नातकोत्तर महाविद्यालयः
चिमनपुरा (शाहपुरा) जयपुरम्

लेखकगणः –

१. डॉ. प्रमोद कुमार वैष्णवः, व्याख्याता (संस्कृत)
राजकीय महाविद्यालयः कोटा

२. डॉ. आशुतोष पारीकः, व्याख्याता (संस्कृत)
सनातन धर्म राजकीय महाविद्यालयः ब्यावर, अजयमेरुः

३. डॉ. उज्ज्वल गोस्वामी, व्याख्याता (संस्कृत)
राजकीय डूंगर महाविद्यालयः बीकानेरम्

४. राकेश कुमार मिश्रः, प्रधानाचार्यः,
राजकीय आदर्श माध्यमिक विद्यालयः बरौदा
बयाना, भरतपुरम्

५. राधेश्याम शर्माः, प्राचार्यः
आदर्श विद्या मंदिर उच्च माध्यमिक विद्यालयः

# प्राक्कथनम्

माध्यमिक-शिक्षा-बोर्ड-राजस्थानस्य पाठ्यक्रमानुसारेण प्रस्तुतेदं पाठ्यपुस्तकं ''सत्प्रेरिका'' एकादश्याः कक्षायाः कृते लिखिता। पुस्तकेऽस्मिन् मा.शि. बोर्डस्य निर्देशानाम् उद्देश्यानाञ्च पूर्तये लखकैः पूर्णरूपेण प्रयासः कृतः।

पाठ्यसामग्र्यां कक्षायाः स्तरस्यानुकूलं विषयवैविध्यस्य गद्य-पद्य-नाटकादीनाञ्च, प्राचीन-अर्वाचीन कवीनां लेखकानाञ्च समन्वयस्यावधानं दत्तम्। संस्कृतभाषायां दक्षतास्थापनार्थं पुस्तके प्रश्नोत्तराणि, व्याख्या-अभ्यास-कार्याणि च सर्वं संस्कृतभाषायामेव कृतम्। अस्योद्देश्यमस्ति संस्कृतस्याध्ययनं-अध्यापनं संस्कृत-माध्यमेन एव भवेत् न तु अनुवादादिविधिना हिन्दीमाध्यमेन। संस्कृतमाध्यमेन छात्रेषु भाषानैपुण्यं भावगांभीर्यं च समायातीति सुस्पष्टम्।

मनुष्यजीवने अधुना नैतिकतापालनस्य परमावश्यकता वर्तते । अतः अस्य पाठ्यपुस्तकस्य नाम ''सत्प्रेरिका'' कृता। विषयसामग्र्यामपि नैतिकविषयसामग्र्या एव समावेशस्य प्रयासः कृतः। परिशिष्टे शब्द-धातुरूपाणां, उच्चारण स्थानानां, आभ्यन्तर-बाह्य प्रयत्नानां, कारक-समास-प्रत्यय-अवयय-प्रयोगादीनां क्रमबद्धोल्लेखस्य संस्कृत साहित्येतिहासस्य च सुरुचिपूर्णं विवरणस्य, छन्दोऽलंकाराणां उदाहरण पुरस्सरं वर्णनस्य, अपठितांशावबोधनस्य, रचनात्मककार्यस्य च समावेशः, छात्रेषु भाषा-साहित्याध्ययने रुचिवर्धनाय नैपुण्याय च विहितम्।

''सत्प्रेरिका'' पुस्तकमिदं छात्रान् संस्कृतसंभाषणे-संस्कृत लेखने-समर्थं करिष्यति, संस्कृत-वाङ्मयेऽध्ययने च तेषां अभिरुचिं वर्धयिष्यतीति आशास्महे। पुस्तकेऽस्मिन् प्रत्यक्ष-परोक्षरूपेण येषां विदुषां साहाय्यं मार्गदर्शनं प्राप्तं तेषां कृते, पुस्तकस्याऽस्य लेखनाय संकलनाय च यैः विद्वद्भिः स्वरचनाः प्रदत्ताः, तेषां सर्वेषां कृते हार्दिकीं कृतज्ञतां प्रकटयामः।

**संपादकः लेखकगणश्च**

# पाठानुक्रमणिका


| पठितांशावबोधनम् पाठः | | पृष्ठ संख्या |
|---|---|---|
| प्रथमः पाठः | मंगलाचरणम् (वेदामृतम्) | १ |
| द्वितीयः पाठः | राष्ट्र वन्दना | ७ |
| तृतीयः पाठः | आदर्श जीवनम् | १४ |
| चतुर्थः पाठः | काकी कृष्णसर्पकथा (पंचतन्त्रात्) | २१ |
| पञ्चमः पाठः | अर्थो हि कन्या परकीय एव | २७ |
| षष्ठः पाठः | दशरथ-श्रवणकुमारवृत्तम् | ३६ |
| सप्तमः पाठः | शिववीरस्य पारतन्त्र्यचिन्तारोगः (शिवराज विजयात) | ४३ |
| अष्टमः पाठः | न्यासस्य रक्षणम् | ४७ |
| नवमः पाठः | विदुरनीतिसुधा | ५४ |
| दशमः पाठः | अमूल्यं वस्तु (मंजुनाथग्रन्थावल्याम्) | ६० |
| एकादशः पाठः | नीत्युपदेशाः (नीतिशतकात्) | ६४ |
| द्वादशः पाठः | राजस्थानस्य स्वातन्त्र्यवीर पथिकः | ७१ |
| त्रयोदशः पाठः | लक्ष्मीस्वभावः (कादम्बरीतः) | ७७ |
| चतुर्दशः पाठः | आत्मावलोकनम् | ८३ |
| पञ्चदशः पाठः | वीर बालकः अभिमन्यु | ९३ |
| शोडषः पाठः | शिष्य-परीक्षा | १०२ |
| सप्तदशः पाठः | इदं न मम | १११ |

**( २ ) संस्कृत साहित्यस्य इतिहास** — **११६**

(क) वैदिक साहित्यम्

(ख) लौकिक साहित्यम्

**( ३ ) छन्दोऽलंकारा** — **१२८**

(क) छन्द परिचयः

(ख) अलंकार परिचयः

**( ४ ) अपठितांशावबोधनम्** — **१४०**

**( ५ ) रचनात्मकं कार्यम्** — **१४४**

**( ६ ) व्याकरणम्** — **१४७**

(क) वर्णोच्चारण स्थानानि प्रयत्नानि च — १४७

(ख) सन्धि — १४९

(ग) शब्दरूपाः — १५२

(घ) धातुरूपाः — १५८

(ङ) प्रत्ययः — १६९

(च) अव्यय प्रयोगाः — १७६

(छ) विभक्ति प्रयोगाः — १७८

(ज) समस्तपदानां विग्रहः — १८२

# प्रथमः पाठः

# मंगलाचरणम्

## वेदामृतम्

**पाठपरिचयः**– सर्वज्ञानमयो हि सः इत्येवं ईश्वरीयज्ञानस्य मानवीयसंस्कृतेश्च पुरोधारूपेण वैदिकवाङ्मयम् अस्माकम् अन्तश्चेतनायाः मूलमस्ति। अनेनैव मूलेन वैश्विकसंस्कृतेः महान् वृक्षः विकसितः सुपल्लवितश्च जातः। वैदिकवाङ्मये मुख्यरूपेण संहिताः, ब्राह्मणग्रन्थाः, आरण्यकाः उपनिषदश्च गण्यन्ते। एतेषु मन्त्राणां सङ्कलनमेव संहिता (वेदः) कथ्यते। संहिताः चतस्रः – ऋक्, यजुः, साम अथर्वसंज्ञिकाश्चेति। समस्तविद्यानामपि मूलं वेदा एव। अतः वेदाध्ययनम् अस्माकं सर्वेषां धर्मः। वेदज्ञानानुशीलनेन अनुकरणेन चैव विश्वकल्याणं सम्भवम्।

अतोऽत्र चतुर्भ्यः वेदेभ्यः केचन मन्त्राः वेदामृतरूपेण सङ्कलिताः सन्ति। आगच्छन्तु, वयं मिलित्वा वेदमन्त्रैः तन्निहितज्ञानेन च अस्माकं जीवने नूतनप्रकाशस्य आविर्भावं कुर्मः।

पावका नः सरस्वती, वाजेभिर् वाजिनीवती।
यज्ञं वष्टु धियावसुः॥ (ऋग्वेदः १/३/१०)

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त, यत्र पूर्वे साध्याः सन्ति देवाः॥ (ऋग्वेदः १/१६४/५०, १०/९०/१६)

माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः।
प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट॥ (ऋग्वेदः ८/१०१/१५)

समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि॥ (ऋग्वेदः १०/१९१/३)

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु॥ (यजुर्वेदः ३४/१)

यतो यतः समीहसे ततो नोऽभयं कुरु।
शन्नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः॥ (यजुर्वेदः ३६/२२)

शं नो देवीरभिष्टये शं नो भवन्तु पीतये।
शं योरभिस्रवन्तु नः॥ (सामवेदः १/३/१३)

स्वस्ति न इन्द्रो वृद्धश्रवा: स्वस्ति न: पूषा विश्ववेदा:।
स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमि: स्वस्ति नो बृहस्पतिर्दधातु॥ (सामवेद: २१/९/३)

घृतेन सीता मधुना समक्ता विश्वैर्देवैरनुमता मरुद्भि:।
सा न: सीते पयसाभ्याववृत्स्वोर्जस्वती घृतवत् पिन्वमाना॥ (अथर्ववेद: ३/१७/९)

सहृदयं सांमनस्यमविद्वेषं कृणोमि व:।
अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या॥ (अथर्ववेद: ३/३०/१)

सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञ: पृथिवीं धारयन्ति।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी न: कृणोतु॥ (अथर्ववेद: १२/१/१)

**अन्वय:-**

१. पावका वाजिनीवती धियावसु: सरस्वती वाजेभि: न: यज्ञं वष्टु।
२. देवा: यज्ञेन यज्ञम् अयजन्त, तानि धर्माणि प्रथमानि आसन्। ते ह नाकं महिमान: सचन्त पूर्वे यत्र साध्या: देवा: सन्ति।
३. रुद्राणां माता, वसूनां दुहिता, आदित्यानां स्वसा, अमृतस्य नाभि:। चिकितुषे जनाय नु प्रवोचम् अनागाम् अदितिं गां मा वधिष्ट।
४. मन्त्र: समान:, समिति: समानी, एषां समानं मन: चित्तं सह (अस्तु), व: समानं मन्त्रम् अभिमन्त्रये, व: समानेन हविषा जुहोमि।
५. यत् जाग्रत:, दूरम् उत् आ एति यत् (मन:) दैवम्, तत् (=यत्) उ सुप्तस्य तथा एव एति, यत् दूरङ्गमं यत् ज्योतिषाम् एकं ज्योति:, तत् मे मन: शिवसङ्कल्पम् अस्तु।
६. यतो यत: समीहसे तत: न: अभयं कुरु। न: प्रजाभ्यो न: पशुभ्यश्च शम् अभयं च कुरु।
७. देवी: न: अभिष्टये शं, न: पीतये शं भवन्तु। शं यो: न: अभिस्रवन्तु।
८. वृद्धश्रवा: इन्द्र: न: स्वस्ति विश्ववेदा: पूषा न: स्वस्ति अरिष्टनेमि: ताक्ष्र्य: न: स्वस्ति बृहस्पति: न: दधातु।
९. मधुना घृतेन समक्ता सीता विश्वै: देवै: मरुद्भि: अनुमता। सीते! सा न: अभि पयसा ऊर्जस्वती घृतवत् पिन्वमाना आववृत्स्व।
१०. व: सहृदयम्, सांमनस्यम्, अविद्वेषं कृणोमि। अन्यो अन्यम् अभिहर्यत अघ्न्या जातं वत्सम् इव।
११. बृहत्, सत्यम्, उग्रम्, ऋतम्, दीक्षा, तप:, ब्रह्म, यज्ञ: (एते सर्वे) पृथिवीं धारयन्ति। सा न: भूतस्य भव्यस्य पत्नी पृथिवी (इयं) लोकं न: उरुं कृणोतु।

## कठिनशब्दार्था:

| | | |
|---|---|---|
| पावका | – | पाविका; पवित्र करने वाली। |
| वाजिनीवती | – | वाजिनी इति गमनार्था प्राप्त्यर्था च क्रिया गृह्यते ; क्रियावती; क्रियाशीला। |
| वाजिभि: | – | वाजम्=अन्नं, बलम्, वेग:, विज्ञानम्; अन्नबलवेगविज्ञानादिभि:; अन्न, बल |

आदि के द्वारा।

वष्टु – वश कान्तौ, कान्तः अभिलाषः वा; वहतु; पूर्णता को प्रदान करें।

धियावसुः – धीः = प्रज्ञा कर्म वा; बुद्धिरूपवसून्; ज्ञानशक्तिरूप ऐश्वर्यों को।

सचन्त – सचन्ते, सेवन्ते; सेवन करते हैं, प्राप्त करते हैं।

रुद्राणाम् – रुद्रदेवानाम्; रुद्रों के।

चिकितुषे – विचारशीलाय, विदुषे; विचार शील के लिए, विद्वान् के लिए।

गाम् – धेनुं, गाम्; गाय को, पृथ्वी को।

अनागाम् – अगरहिताम्, अपराधहीनां, पापरहिताम्; निरपराध, पापरहित।

मा वधिष्ट – हननं न कुरु, न मारय; मत मारो।

अभिमन्त्रये – आह्वानं करोमि।

जुहोमि – हु धातुः +लट् लकारः+उ.पु.+ए.व., हवनं करोमि; आहूत करता हूँ।

जाग्रतः – जागृ धातुः + शतृप्रत्ययः, ष.वि., ए.व.; सावधानचित्तस्य पुरुषस्य; जागते हुए मनुष्य का।

सुप्तस्य – स्वप्+क्तप्रत्ययः, ष.वि., ए.व.; शयनं प्राप्तस्य, निद्रितस्य पुरुषस्य; सोए हुए मनुष्य का।

दूरङ्गमम् – दूरं गन्तुं शीलं; दूर जाने वाले को।

ज्योतिषाम् – तेजसाम्, इन्द्रियाणाम्; इन्द्रियों का।

ज्योतिः – प्रकाशः; प्रकाश।

समीहसे – अभिलषसे; इच्छा करते हो।

वृद्धश्रवाः – श्रवः श्रवणीयं यशः, महद्यशोयुताः, प्रवृद्धकीर्तिशीलाः; महान् यश है जिसका।

पूषा – पोषणकर्ता; पोषक, पोषण करने वाला।

तार्क्ष्यो – तूर्णमर्थं रक्षति यः सः; कल्याणकारकः; कल्याणकर्ता।

अरिष्टनेमिः – नेमिः वज्रनाम, दोषनाशे अकुण्ठितः वज्रः; दुष्ट प्रवृत्तियों को ताड़ने में अहिंसित एवं अकुण्ठित वज्र।

दधातु – धा धातुः +लोट्लकारः+प्र.पु.+ए.व.; धारयतु; धारण करे।

घृतेन – घृतम् उदकनाम (निघं० १.१२) उदकेन, जलेन; जल से।

सीता – कृषिक्षेत्रस्य रेखा, बीजवपनस्थानम्; हल के द्वारा बनाई गई रेखा।

समक्ता – सम्यक् अभिव्यक्ता; अच्छी प्रकार से अभिव्यक्त हुई।

पिन्वमाना – सिञ्चिता; सिंची गई।

सांमनस्यम् – समानं मनोयुक्तम्; समान मन वाला।

कृणोमि – विदधामि, करोमि; करता हूँ।

अभिहर्यत – कामनां कुर्यात्, अभिलषेत्, इच्छेत्; अभिलाषा करनी चाहिए।

अघ्न्या – न हन्तव्या, न हननयोग्या; जो मारने योग्य नहीं ऐसी गाय।

बृहत् – महत्; महान्।

| | | |
|---|---|---|
| उग्रम् | – | उद्गच्छतीति उग्रः, प्रकृष्टम्, तीव्रम्; उग्र। |
| ऋतम् | – | ऋ गतौ धातुः+क्तप्रत्ययः; प्रकृतेः शाश्वतो नियमः; शाश्वत सत्य। |
| पत्नी | – | पालयित्री, आश्रयप्रदानात् रक्षिका; पालनकर्त्री। |
| उरुम् | – | विस्तृताम्, विशालाम्, श्रेष्ठाम्; फैली हुई, व्याप्त। |
| कृणोतु | – | कृ धातुः+श्नु+लोट् लकारः (वैदिकप्रयोगः) ;विदधातु, करोतु; करे, बनाए। |

**अभ्यासः**

**१. अतिलघूत्तरात्मकप्रश्नाः–**

(क) कति संहिताः?
(ख) चतुर्णां वेदानां नामानि लिखत।
(ग) का पावका (पाविका)?
(घ) देवाः केन यज्ञम् अयजन्त?
(ङ) के नाकं सचन्त (सेवन्ते)?
(च) आदित्यानां स्वसा का?
(छ) गौः कस्य नाभिस्वरूपा?
(ज) युष्माकं मन्त्रः कीदृशः अस्तु?
(झ) नः अभिष्टये का शं भवतु?
(ञ) नः सीता( कृषिभूमिः) कथं भवितव्या?

**२. लघूत्तरात्मकप्रश्नाः**

(क) सरस्वती कथम् अस्माकं यज्ञादीनां पूर्णतां करिष्यति?
(ख) देवाः कथं नाकं सेवन्ते?
(ग) गौः किमर्थं न वधयोग्या?
(घ) समानभावः कुत्र कुत्र भवितव्यः?
(ङ) समानेन किं भविष्यति?
(च) मनः कीदृशम् अस्तु?
(छ) कुत्र-कुत्र नः अभयं भवेत्?
(ज) कीदृशी सीता विश्वैः देवैः अनुमता?
(झ) अन्यः अन्यं कथम् अभिहर्यत (अभिलषेत्)?
(ञ) के-के पृथिवीं धारयन्ति?

**३. अधोलिखितश्लोकानाम् अन्वयं हिन्दीभाषायाम् आशयं च लिखत–**

(क) पावका नः सरस्वती, वाजेभिर् वाजिनीवती।
यज्ञं वष्टु धियावसुः॥
(ख) यतो यतः समीहसे ततो नोऽभयं कुरु।
शन्नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः॥
(ग) घृतेन सीता मधुना समक्ता विश्वैर्देवैरनुमता मरुद्भिः।

सा नः सीते पयसाभ्याववृत्स्वोर्जस्वती घृतवत् पिन्वमाना ॥

(घ) सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।
अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या ॥

**४. मन्त्राणां पादपूर्तिं कुरुत–**

(क) समानो मन्त्रः समितिः समानी ............................... ।
.................................. समानेन वो हविषा जुहोमि ॥

(ख) .................................. स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्ताक्ष्योर्ं अरिष्टनेमिः ............................... ॥

(ग) सत्यं बृहदृतमुग्रं दीक्षा तपो ............................... ।
.................................. पत्न्युरुं लोकं पृथिवीं नः कृणोतु ॥

(घ) .................................. तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त ............................... ॥

**५. अधोलिखितानां श्लोकानां संस्कृते व्याख्यां कृत्वा भावार्थं लिखत–**

(क) पावका नः सरस्वती, वाजेभिर् वाजिनीवती।
यज्ञं वष्टु धियावसुः ॥

(ख) समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम्।
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि ॥

(ग) स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्ताक्ष्योर्ं अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

(घ) सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।
अन्यो अन्यमभि हर्यत वत्सं जातमिवाघ्न्या ॥

**व्याकरणात्मकप्रश्नाः –**

**६. अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धेर्नामापि लिखत–**

यज्ञमयजन्त, देवास्तानि, प्रथमान्यासन्, यतो यतः, प्रजाभ्योऽभयम्,
नस्ताक्ष्योर्ं, बृहस्पतिर्दधातु, विश्वेदेवैरनुमता, पत्न्युरुम्, जातमिवाघ्न्याः।

**७. अधोलिखितसामासिकपदानां समासविग्रहं कृत्वा समासस्य नाम लिखत–**

नाकम्, अदितिम्, अभयम्, वृद्धश्रवाः, विश्ववेदाः,
अरिष्टनेमिः, सहृदयम्, अविद्वेषम्, अघ्न्या।

८. अधोलिखितपदेषु धातु-लकार-पुरुष-वचनादीनां निर्देशं कुरुत-

| पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| १. अयजन्त | ............. | ............ | ............ | ............ |
| २. आसन् | ............. | ............ | ............ | ............ |
| ३. वधिष्ट | ............. | ............ | ............ | ............ |
| ४. जुहोमि | ............. | ............ | ............ | ............ |
| ५. समीहसे | ............. | ............ | ............ | ............ |
| ६. कुरु | ............. | ............ | ............ | ............ |
| ७. दधातु | ............. | ............ | ............ | ............ |
| ८. कृणोतु | ............. | ............ | ............ | ............ |

९. अधोलिखितपदेषु मूलशब्द-विभक्ति-लिङ्ग-वचनादीनां निर्देशं कुरुत-

| पदम् | मूलशब्दः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| १. सरस्वती | ............. | ............ | ............ | ............ |
| २. महिमानः | ............. | ............ | ............ | ............ |

# द्वितीयः पाठः

## राष्ट्रवन्दना

पाठ–परिचयः

अयं पाठः डॉ. हरिराम आचार्यःमहोदयेन विरचितात् मधुच्छन्दा इति ग्रन्थात् उद्धृतः अस्ति। पाठेऽस्मिन् कविः मातृभूमेः वन्दनां करोति। वयं सर्वे मातृभूमेः संरक्षणार्थं, संवर्धनार्थं, विकासार्थम् च संघी भूय प्रयत्नं कुर्मः। तदैव भारत माता विश्वे गौरवास्पदं प्राप्स्यति। राष्ट्रं प्रति वयं स्वाभिमानं कुर्मः स्वप्राणान् अपि–अर्पयित्वा दत्वा मातृभूमेः रक्षणं कुर्मः। एतैः एव राष्ट्रप्रेम्णः राष्ट्ररक्षणस्य भावैः भावितः अयं पाठः।

वयं राष्ट्रे जागृयाम

दिवारात्रं मनुज–सेवा–व्रतं
सततं पालयाम।
वदति विशदं वेदवाणी
वयं राष्ट्रे जागृयाम।।

X X

बन्धुभूताः समे धर्माः स्नेहधारामुद्गिरन्तु।
भेद–भावानां निशायामेकता–किरणान् किरन्तु।
अमृतपुत्रा वयं सर्वे
कालकूटं नाशयाम।।

X X

श्रम–स्वेदैः सदाऽस्माभिर्विधेया नवरूप–रचना।
चिरं नन्दतु भारती भूः हिमकिरीटा सिन्धुरशना।।
शान्ति–शक्त्या वयं हिंसा–
दानवी–सेनां जयाम।।

X X

दिशति नो राष्ट्रध्वजोऽयं निजगुणैर्विश्वं विजेतुम्।
नवल–युग–परिवर्तनाय क्रान्तिपद–रचनां प्रणेतुम्।।
राष्ट्र–बलि–वेद्यां यथेष्टं
वयं प्राणानर्पयाम।।

भावपुष्पम् अर्पयामः

प्राण–पुष्पैरर्चिता यैः पुण्यभावा राष्ट्रजननी
अद्य तेभ्यो भावपुष्पं विनतमस्तकमर्पयामः।

X

विकट–शस्त्रं निजकरे यैः
शान्तिरक्षायै गृहीतम्।

देह–बलि–दानेन समरे
मुक्ति–मुक्ताफलं क्रीतम्।
अद्य तेषां शौर्य–गाथां वयं निजहृदि कीर्तयामः।
उज्झितं निज–भवन–सौख्यं
विस्मृताः निजबाल–दाराः।
वाहिता यैः कृपण–लोके
पुण्य–कीर्ते–र्विमल–धाराः।
अद्य तेषां पुण्यचरितैर्वयं हृदयं पावयामः।
प्रतिपलं सङ्कल्पिता ये
शौर्य–बलि–गीतानि गातुम्।
मरण–पटमावेष्टितं यैः
उत्सवं मरणं विधातुम्।
अमीषां शपथ–स्वरूपं ध्वजमिमं सम्प्रति वहामः।

वीरभोग्यामिमां वसुधां
भुंजते किल कृतात्मानः।
जरा–मरणज–भय–विमुक्ताः
मुक्तदेहा हुतात्मानः।
अद्य तेषां जयनिनादैः सन्ततं वयमपि जयामः।

वयं राष्ट्रे जागृयाम

अन्वयः–

दिवा रात्रं मनुजसेवाव्रतं सततं पालयाम। वेदवाणी विशदं वदति वयं राष्ट्रे जागृयाम। धर्माः बन्धुभूताः समे स्नेह धाराम् उद्गिरन्तु एकता किरणान् भेद भावानां निशायाम् किरन्तु। वयं अमृतपुत्रा सर्वं कालकूटं नाशयाम। अस्माभिः सदा श्रमस्वेदैः नव रूप रचना विधेया। हिमकिरीटा सिन्धुरशना भारती भूः चिरं नन्दतु। वयं शान्ति शक्त्या हिंसादानवीसेनां जयाम। नः निजगुणैः अयं राष्ट्र ध्वजो विश्वं विजेतुम् दिशति। नवल युग परिवर्तनाय क्रान्तिपदरचनां प्रणेतुम्। वयं राष्ट्रबलिवेद्यां यथेष्टं प्राणान् अर्पयाम।

भावपुष्पम् अर्पयामः

अन्वयः –

यैः पुण्यभावा प्राणपुष्पैः राष्ट्रजननी अर्चिता अद्य तेभ्यो विनतमस्तकं भावपुष्पं अर्पयामः। यैः शान्तिरक्षायै निजकरैः विकट शस्त्रं गृहीतम्। समरे देह बलिदानेन मुक्तिमुक्ताफलं क्रीतम्। अद्य वयं तेषां शौर्यगाथां निजहृदि कीर्तयामः। यैः निज भवनसौख्यं उज्झितं निजबालदाराः विस्मृताः। कृपणलोके पुण्यकीर्तेः विमलधारा वाहिता। अद्य वयं तेषां पुण्यचरितैः हृदयं पावयामः।

येः प्रतिपलं शौर्य–बलि–गीतानि गातुम् संकल्पिता। यैः मरण–पटम् आवेष्टितं मरणं उत्सवं विधातुम्। सम्प्रति अमीषां शपथस्वरूपं इमं ध्वजम् वहामः।

वीरभोग्याम् इमां वसुधां किल कृतात्मानः भुञ्जते। जरा–मरणज–भय विमुक्ता मुक्तदेहा हुतत्मानः। वयं अपि अद्य तेषां जयनिनादैः सततं जयामः।

वयं राष्ट्रे जागृयाम

कठिन–शब्दार्थाः –
मनुजः –मानवः।

सततं–निरन्तरं।
विशदं– स्पष्टं, विशुद्धं
बन्धुभूताः–बन्धु–बान्धवाः।
स्नेहधारा–प्रेम धाराः
कालकूटं–विषं।
श्रमस्वेदैः–श्रमेण प्रादूर्भूतैः स्वेदैः
नवरूप–नवीनरुपेण।
नन्दतु–अभिनन्दनं करोतु।
हिमकिरीट–हिमालयस्य मुकुटम्।
सिन्धुरशना–सागरमेखला
दानवीसेनां–असुरसैन्यं।
राष्ट्र ध्वजः–राष्ट्रियः ध्वजः।
क्रान्तिपदं–क्रान्तिकारिणां मार्गम् अनुसृत्य/अवलम्ब्य।
राष्ट्र बलि–वेद्यां–राष्ट्ररक्षणयज्ञे

भावपुष्पम् अर्पयामः

कठिन–शब्दार्थाः –
प्राण–पुष्पैः – असुकुसुमैः
राष्ट्रजननी–मातृभूमिः।
भावपुष्पं–भावनायाः पुष्पं।
निजकरैः –स्वहस्तैः।
देहबलिदानेन–आत्मोत्सर्गेन।
मुक्ति मुक्ताफलं– मुक्ति रूपं मुक्ताफलं
उज्झितं–त्यक्तं
निजभवनसौख्यं–स्वगृहस्य सुखानि।
निजबालदारा–स्वपुत्रः पत्नी च।
कृपण लोके–स्वार्थिसंसारे।
पावयामः– पवित्रं कुर्मः
प्रतिपलं–प्रति क्षणं।
मरणपटमावेष्टितं–मृत्युकालस्य श्वेतवस्त्रं आवृतम्
अमीषां – एतेषां
सम्प्रति–इदानीं
वीरभोग्या–वीरपुरुषेण भोग्या।
वसुधां – धराम्।
भुञ्जते–उपभोगं कुर्वन्ति।
जरा मरणज–वृद्धावस्थायाः मृत्योः उत्पन्नात्
मुक्तदेहा–देहस्य मुक्तशरीरः
हुतात्मानः–आत्मोत्सर्गिणः।
जयनिनादैः–जयजयकारैः
सन्ततं–निरन्तरम्।

वस्तुनिष्ठप्रश्नाः –

1. दिवारात्रं पदे समासः अस्ति–

(अ) कर्मधारयः (ब) बहुब्रीहिः (स) द्वन्द्वः (द) तत्पुरुषः

2. चिरं नन्दतु भारती भूः हिमकिरीटा सिन्धुरशना—अत्र अव्यय पदं अस्ति—
(अ) चिरं (ब) नन्दतु (स) भारती (द) सिन्धुरशना

3. नवल युग परिवर्तनाय कस्य रचनां प्रणेतुम्—
(अ) दानवी सेनाया (ब) क्रान्ति पदस्य (स) प्राणानर्पणस्य (द) कालकूटनाशस्य

4. यथेष्टं—पदे प्रयुक्तः सन्धिः अस्ति—
(अ) वृद्धिसन्धिः (ब) अयादिसन्धिः (स) दीर्घसन्धिः (द) गुणसन्धिः

5. राष्ट्रजननी कैः अर्चिताः—
(अ) प्राणपुष्पैः (ब) भावपुष्पै (स) पुण्यकीर्त्या (द) बालदारैः

6. वसुधा केन भोग्या—
(अ) कृपणेन (ब) बालैः (स) दारैः (द) वीरैः

अतिलघूत्तरात्मक—प्रश्नाः

1. दिवारात्रं कस्य सेवा—व्रतं सततं पालयामः?
2. भेदभावनां निशायाम् कान् किरन्तु?
3. श्रम स्वेदैः अस्माभिः किं विधेयम्?
4. दानवी सेनां वयं केन जयामः?
5. शान्ति रक्षायै किं गृहीतम्?
6. राष्ट्रभक्तैः के विस्मृताः?

लघुत्तरात्मक प्रश्नाः —

1. वेदवाणी किं वदति?
2. हिमकिरीटा सिन्धुरशना का?
3. कस्य कृते वयं प्राणानर्पयाम?
4. विश्वं विजेतुं को दिशति?
5. कविः कान् प्रति भाव—पुष्पम् अर्पयति?
6. केषां पुण्यचरितैः वयं हृदयं पावयामः?
7. कैः मरण पटं आवेष्टितम्।

वस्तुनिष्ठप्रश्नानाम् उत्तरम्—1. स 2. अ 3. ब 4. द 5. अ 6. द

अधोलिखितपद्यांशानां सप्रसंगं व्याख्या कार्या —

(i) दिवारात्रं मनुज—सेवा—व्रतं सततं पालयाम।
वदति विशदं वेदवाणी वयं राष्ट्रे जागृयाम।।

(ii) श्रम—स्वेदैः सदाऽस्माभिर्विधेया नवरूप—रचना।
चिरं नन्दतु भारती भूः हिमकिरीटा सिन्धुरशना।।
शान्ति—शक्त्या वयं हिंसा—दानवी—सेनां जयाम।।

(iii) उज्झितं निज—भवन—सौख्यं
विस्मृताः निजबाल—दाराः।
वाहिता यैः कृपण—लोके
पुण्य—कीर्ते—र्विमल—धाराः।
अद्य तेषां पुण्यचरितैर्वयं हृदयं पावयामः।

(iv) वीरभोग्यामिमां वसुधां
भुञ्जते किल कृतात्मानः।
जरा—मरणज—भय—विमुक्ताः

मुक्तदेहा हुतात्मानः।
अद्य तेषां जयनिनादैः सन्ततं वयमपि जयामः।

व्याकरणात्मक–प्रश्नाः

1. अधोलिखितेषु पदेषु मूल शब्द–लिंग–विभक्ति–वचनानां निर्देशं कुरुत –

| पदम् | मूल शब्दः | लिंगम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| वयम् | ........... | ............. | ............. | .......... |
| किरणान् | ........... | ............. | ............. | .......... |
| अस्माभिः | ........... | ............. | ............. | .......... |
| परिवर्तनाय | ........... | ............. | ............. | .......... |
| सेनां | ........... | ............. | ............. | .......... |
| तेषां | ........... | ............. | ............. | .......... |
| दानेन | ........... | ............. | ............. | .......... |
| यैः | ........... | ............. | ............. | .......... |
| पुत्राः | ........... | ............. | ............. | .......... |

2. अधोलिखितेषु पदेषु धातु–लकार–पुरुष–वचनानां निर्देशं कुरुत –

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| पालयामः | ........... | ............. | ............. | .......... |
| वदति | ........... | ............. | ............. | .......... |
| नाशयामः | ........... | ............. | ............. | .......... |
| जयामः | ........... | ............. | ............. | .......... |
| अर्पयामः | ........... | ............. | ............. | .......... |
| जागृयामः | .......... | ............. | ............. | .......... |
| वहामः | ........... | ............. | ............. | .......... |
| जयामः | ........... | ............. | ............. | .......... |
| कीर्तियामः | ........... | ............. | ............. | .......... |
| पावयामः | ........... | ............. | ............. | .......... |

3. अधोलिखितपदेषु उपसर्ग–धातु–प्रत्ययाः लेख्याः –

| पदम् | उपसर्गः | धातुः | प्रत्ययः |
|---|---|---|---|
| उद्गिरन्तु | ........... | ............. | .......... |
| भूताः | ........... | ............. | .......... |
| विधेयः | ........... | ............. | .......... |
| विजेतुम् | ........... | ............. | .......... |
| प्रणेतुम् | ........... | ............. | .......... |
| इष्टं | ........... | ............. | .......... |
| उज्झितं | ........... | ............. | .......... |
| विमुक्ताः | ........... | ............. | .......... |
| हुतः | ........... | ............. | .......... |
| गातुम् | ........... | ............. | .......... |

4. निम्नांकितानां पदानां सन्धिविच्छेदं कृत्वा, सन्धिनाम निर्देशं कुरुत –

| पदम् | सन्धि–विच्छेदः | सन्धिनाम |
|---|---|---|
| सदाऽस्माभिर्विधेया– | ––– + ––– + ––– | –––––––––––––– |
| राष्ट्रध्वजोऽयं | ––– + ––– + ––– | –––––––––––––– |

| | | |
|---|---|---|
| निजगुणैर्विश्वं– | ––– + ––– + ––– | ––––––––––––– |
| यथेष्टं– | ––– + ––– + ––– | ––––––––––––– |
| पुष्पैरर्चितः – | ––– + ––– + ––– | ––––––––––––– |
| कृतात्मानः – | ––– + ––– + ––– | ––––––––––––– |
| हुतात्मानः – | ––– + ––– + ––– | ––––––––––––– |
| पुण्यचरितैर्वयं – | ––– + ––– + ––– | ––––––––––––– |
| पुण्यकीर्तेर्विमलधाराः – | ––– + ––– + ––– | ––––––––––––– |

5. निम्नांकितानां पदानां समासविग्रहं कृत्वा समासनामापि लिखत–

| सामासिकपदम् | समासविग्रहः | समासस्य नाम |
|---|---|---|
| दिवारात्रं – | –––––––––– | –––––––––– |
| सेवाव्रतं – | –––––––––– | –––––––––– |
| स्नेहधारां– | –––––––––– | –––––––––– |
| अमृतपुत्राः – | –––––––––– | –––––––––– |
| श्रम–स्वेदैः – | –––––––––– | –––––––––– |
| दानवी–सेनां– | –––––––––– | –––––––––– |
| देहबलि – | –––––––––– | –––––––––– |
| शौर्य–गाथां – | –––––––––– | –––––––––– |
| प्रतिपलं – | –––––––––– | –––––––––– |
| जरामरणजं – | –––––––––– | –––––––––– |

6. अधोलिखितान् शब्दान् अधिकृत्य वाक्यनिर्माणं कुरुत –

| पदम् | | वाक्य–प्रयोगः |
|---|---|---|
| सततं | – | ...................................................... |
| सर्वं | – | ...................................................... |
| चिरं | – | ...................................................... |
| वदति | – | ...................................................... |
| वयं | – | ...................................................... |
| श्रमस्वेदैः | – | ...................................................... |
| अद्य | – | ...................................................... |
| सम्प्रति | | |
| किल | | |
| विस्मृतम् | | |

7. अधोलिखितपदानां विलोम–शब्दं लिखत –

| शब्दाः | | विलोमशब्दाः |
|---|---|---|
| हिंसा | – | ...................................................... |
| कालकूटं | – | ...................................................... |
| दानवः | – | ...................................................... |
| दिवा | – | ...................................................... |
| शान्तिः | – | ...................................................... |
| गुणः | – | ...................................................... |
| पुण्यं | – | ...................................................... |
| भयः | – | ...................................................... |
| मुक्तं | – | ...................................................... |

8. अधोलिखितपदानां पर्यायवाचिशब्दाः लेख्याः –

| | |
|---|---|
| पुष्पं | – |
| देहः | – |
| समरं | – |
| भवनं | – |
| पटः | – |
| वसुधा | – |
| दाराः | – |
| जननी | – |
| दानवः | – |
| अमृतं | – |

निबन्धात्मकप्रश्नाः –

प्र.1. ''वयं राष्ट्रे जागृयामः'' कवितायाः साराशं लिखतु ?

प्र.2. वयं अमृतपुत्राः राष्ट्र–विकासाय किं कुर्मः ?

प्र.3. भावपुष्पम् अर्पयामः कवितायाः साराशं लिखतु ?

प्र.4. केषां शपथ–स्वरूपम् इमं ध्वजं वयं वहामः ?

―――――――――

# तृतीयः पाठः

## आदर्श-जीवनम्

**पाठ-परिचयः -**

अयं पाठः कविकुलगुरुणा कालिदासेन विरचिताद् रघुवंशमहाकाव्यस्य प्रथमसर्गाद् उद्धृतः। रघुवंशमहाकाव्ये ऊनविंशति सर्गाः सन्ति। तेषु रघोः आरभ्य अग्निवर्णपर्यन्तानां राज्ञां वर्णनं विद्यते। महाकाव्यमिदं लघुत्रय्यां परिगण्यते। महाकविः कालिदासः चक्रवर्तिनः विक्रमसंवत्प्रवर्तकस्य राज्ञः विक्रमादित्यस्य सभायां नवरत्नेषु राजतेस्म। रघुवंशमहाकाव्यस्य एषु श्लोकेषु नृपाणां जीवनं कार्यपद्धतिं च वर्णनं कुर्वन् कालिदासः मानवजीवने धर्मस्य, नीतेः, स्वाध्यायस्य, त्याग-तपस्या-तपोवनादीनां, सदाचारस्य च आदर्शजीवनमूल्यानां संदेशं समाजाय प्रददाति।

वागर्थाविव संपृक्तौ, वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे, पार्वतीपरमेश्वरौ।।1

त्यागाय संभृतार्थानां, सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां, प्रजायै गृहमेधिनाम्।।2

शैशवेऽभ्यस्त विद्यानां, यौवने विषयैषिणाम्।
वार्द्धकेमुनिवृत्तीनां, योगेनान्ते तनुत्यजाम्।।3

वैवस्वतो मनुर्नाम, मानवीयो मनीषिणाम्।
आसीन्महीक्षितामाद्यः, प्रणवश्छन्दसामिव।।4

आकारसदृशप्रज्ञः, प्रज्ञा सदृशागमः।
आगमैः सदृशारम्भ, आरम्भसदृशोदयः।।5

प्रजानामेव भूत्यर्थं, स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः।।6

जुगोपात्मानमत्रस्तो, भेजे धर्ममनातुरः।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत्।।7

ज्ञानं मौने क्षमा शक्तौ, त्यागे श्लाघाविपर्ययः।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव।।8

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः।
तस्य धर्मरतेरासीद्, बुद्धत्वं जरसा विना।9

प्रजानां विनयाधानाद्रक्षणाद् भरणादपि।
स पिता पितरस्तासां, केवलं जन्महेतवः।।10

स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये।
अप्यर्थकामौ तस्यास्तां, धर्म एव मनीषिणः।।11

**अन्वयः –**

१. (अहं) वागर्थौ इव संपृक्तौ जगतः पितरौ पार्वतीपरमेश्वरौ वागर्थप्रतिपत्तये वन्दे।

२. त्यागाय, सम्भृतार्थानां, सत्याय, मितभाषिणां, यशसे विजिगीषूणां, प्रजायै गृहमेधिनाम्, रघूणामन्वयं वक्ष्ये।

३. शैशवे अभ्यस्तविद्यानां, यौवने विषयैषिणां वार्द्धके, मुनिवृत्तीनाम्, अन्ते, योगेन, तनुत्यजां, (रघूणामन्वयं वक्ष्ये)।

४. मनीषिणां मानवीयः वैवस्वतः नाम मनुः छन्दसां प्रणवः इव महीक्षिताम् आद्यः आसीत्।।

५. आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः आगमैः सदृशारम्भः आरम्भसदृशोदयः आसीत्।

६. सः प्रजानां भूत्यर्थम् एव ताभ्यः बलिम् अग्रहीत्, हि रविः सहस्रगुणम् उत्स्रष्टुम् रसम् आदीयते।।

७. सः अत्रस्तः सन् आत्मानं जुगोप अनातुरः सन् धर्मं भेजे अगृध्नुः सन् अर्थम् आददे असक्तः सन् सुखम् अन्वभूत्।

८. ज्ञाने मौनम्, शक्तौ क्षमा, त्यागे श्लाघाविपर्ययः, तस्य गुणाः गुणानुबन्धित्वात् सप्रसवा इव अभूवन्।

९. विषयैः अनाकृष्टस्य विद्यानां पारदृश्वनः धर्मरतेः तस्य जरसा विना वृद्धत्वम् आसीत्।

१०. प्रजानां विनयाधानात् रक्षणात् भरणात् अपि सः पिता अभूत् तासां पितरः तु केवलं जन्महेतवः अभूवन्।

११. दण्ड्यान् एव स्थित्यै दण्डयतः प्रसूतये परिणेतुः मनीषिणः तस्य अर्थकामौ अपि धर्मः एव आस्ताम्।

**कठिन-शब्दार्थाः -**

संपृक्तौ = नित्यसम्बन्धयुक्तौ (नित्य संबन्धयुक्त)

प्रतिपत्तये = सम्यग् ज्ञानार्थं (सम्यक् ज्ञान के लिये)

जगतः = संसारस्य (संसार के)

संभृतार्थानाम् = संचितधनानाम् (संचित धन वालों का)

मितभाषिणाम् = स्वल्पभाषणशीलानाम् (अल्प बोलने के स्वभाव वालों का)

विजिगीषूणाम् = विजेतुमिच्छूनाम् (जीतने की इच्छा वालों का)

अभ्यस्त विद्यानाम् = पठितशास्त्राणाम् (शास्त्र पढने वालों का)

विषयैषिणाम् = भोगविलासिनाम् (भोग और विलास करने वालों का)

महीक्षिताम् = क्षितीश्वराणाम् (राजाओं का)

छन्दसाम् = वेदानाम् (वेदों का)

आगमैः = शास्त्रैः (शास्त्रों द्वारा)

भूत्यर्थम् = कल्याणार्थम् (कल्याण के लिये)

अग्रहीत् = गृहीतवान् (प्राप्त किया)

उत्स्रष्टुम् = दातुम् (देने के लिये)

जुगोपात्मानम् = स्वात्मानं रक्षितवान् (अपनों की रक्षा की)

पारदृश्वन् = अन्तं ज्ञातवान् (अन्त तक जानने वाले)

भेजे = अर्जितवान् (प्राप्त किया)

अग्रध्नुः = अनभिलाषु, लोभरहितः (लोभ रहित होते हुये)

आददे = स्वीकृतवान् (स्वीकृत किया)

असक्त = आसक्तिरहित (आसक्ति न रखते हुये)

अन्वभूत् = अन्वभवत् (अनुभव किया)

श्लाघाविपर्ययः = आत्मप्रशंसायाः अभावः (अपनी प्रशंसा का अभाव)

अनुबन्धित्वात् = सहचारित्वात् (एक साथ रहने से)

सप्रसवा = सहोदरा (भाई की तरह)

अनाकृष्टस्य = अवशीकृतस्य (बिना वश में आये)

जरसा = वृद्धावस्थया (बुढापे से)

विनयाधानात् = सन्मार्गे प्रवर्तनाद् (अच्छे मार्ग पर प्रेरित करने के कारण)

परिणेतुः = कृतविवाहस्य (विवाह करने वालों का)

प्रसूतये = सन्तानाय (सन्तान के लिये)

अर्थकामौ = अर्थकामसंज्ञकौ (अर्थ और काम पुरुषार्थ)

**वस्तुनिष्ठ प्रश्नाः –**

1. संसारस्य मातपितरौ कौ स्तः ?

   (अ) सूर्य–चन्द्रौ (ब) उमाशंकरौ

   (स) सीतारामौ (द) लक्ष्मीनारायणौ

2. रघुवंशीयाः नृपाः शैशवे किंकुर्वन्ति ?

   (अ) विद्याभ्यासम् (ब) ऐश्वर्यभोगम्

   (स) वनभ्रमणम् (द) राज्यपालनम्

3. छन्दसां ऊँकारमिव कः आसीत् ?

   (अ) वशिष्ठः (ब) विश्वामित्रः

   (स) वैवस्वतमनुः (द) दशरथः

4. केन कारणेन राजा प्रजाभ्यः करं गृह्णाति ?

   (अ) प्रजाजनानां कल्याणार्थं (ब) प्रासाद–निर्माणार्थं

   (स) स्वस्य भोगार्थं (द) किंञ्चिदपि कारणं नास्ति

5. जन्मदातुः अतिरिक्तं पिता कः आसीत् –

   (अ) रघुवंशीय नृपः (ब) यः तीर्थाटनं कारयति

   (स) यः धनादिकं ददाति (द) यः दण्डं न ददाति

**लघूत्तरात्मकप्रश्नाः –**

1. रघोः वंशे उत्पन्नानां राज्ञां धनं कस्यार्थं वर्तते ?

2. सूर्यः केन कारणेन पृथिव्याः जलं शोषयति ?

3. अर्थकामौ तस्य राज्ञः कः आस्ताम् ?

**अधोलिखितानां पद्यानां सप्रसङ्गं व्याख्या कार्या: –**

(अ) शैशवेऽभ्यस्तविद्यानां, यौवने विषयैषिणाम्।

वार्द्धके मुनिवृत्तीनां, योगेनान्ते तनुत्यजाम्।।

(ब) प्रजानां विनयाधानाद्रक्षणाद् भरणादपि।

स पिता पितरस्तासां, केवलं जन्महेतव:।।

(स) जुगोपात्मानमत्रस्तो, भेजे धर्ममनातुर:।

अगृध्नुराददे सोऽर्थमसक्त: सुखमन्वभूत्।।

**निबन्धात्मक प्रश्ना: –**

1. रघुवंशीयानां नृपाणां गुणेषु निबन्ध: लेख्य: ?

2. अस्य पाठानुसारं प्रजापालनम् अधिकृत्य लेख: लेख्य: ?

**अधोलिखितेषु पद्येषु अलंकार निर्देशपूर्वकं लक्षणं संगमयत –**

(अ) वैवस्वतो मनुर्नाम, मानवीयो मनीषिणाम्।

आसीन्महीक्षितामाद्य:, प्रणवश्छन्दसामिव।।

(ब) प्रजानामेव भूत्यर्थं, स ताभ्यो बलिमग्रहीत्।

सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रवि:।।

**अधोलिखिते पद्ये छन्दोनिर्देशनपुरस्सरं लक्षणं संगमयत –**

वागर्थाविव संपृक्तौ, वागर्थप्रतिपत्तये।

जगत: पितरौ वन्दे, पार्वतीपरमेश्वरौ।।

1. अधोलिखितेषु पदेषु धातु–उपसर्ग–प्रत्ययानां निर्देशं कुरुत –

| | **उपसर्ग:** | **धातु:** | **प्रत्यय:** |
|---|---|---|---|
| 1. संभृत: | .......... | .......... | .......... |
| 2. विजिगीषु | .......... | .......... | .......... |
| 3. अगृध्नु: | .......... | .......... | .......... |
| 4. अनाकृष्ट: | .......... | .......... | .......... |
| 5. प्रजा | .......... | .......... | .......... |

2. अधोलिखितेषु पदेषु शब्द–विभक्ति–लिङ्ग–वचनानां निर्देशं कुरुत –

| | शब्दः | विभक्तिः | लिङ्गं | वचनम् |
|---|---|---|---|---|
| 1. ग्रहमेधिनाम् | .......... | .......... | .......... | .......... |
| 2. छन्दसाम् | .......... | .......... | .......... | .......... |
| 3. आत्मानम् | .......... | .......... | .......... | .......... |

3. अधोलिखितानां शब्दानां संधि-विच्छेदं कृत्वा, सन्धीनाम् निर्देशं कुरुत –

| | संधि-विच्छेदः | संधिनाम |
|---|---|---|
| 1. वागर्थौ | ................. | .................... |
| 2. संभृतार्थानाम् | ................. | .................... |
| 3. प्रणवश्छन्दसाम् | ................. | .................... |
| 4. सदृशोदयः | ................. | .................... |
| 5. अग्रध्नुराददे | ................. | .................... |
| 6. अन्वभूत् | ................. | .................... |
| 7. अप्यर्थकामौ | ................. | .................... |

4. अधोलिखितानां पदानां समासविग्रहं कृत्वा समासस्य नाम निर्देशं कुरुत –

| | समास-विग्रहः | समास नाम |
|---|---|---|
| 1. पार्वतीपरमेश्वरौ | ................. | .................... |
| 2. वागर्थाविव | ................. | .................... |
| 3. मितभाषिणाम् | ................. | .................... |
| 4. गृहमेधिनाम् | ................. | .................... |
| 5. सप्रसवा | ................. | .................... |
| 6. पारदृश्वनः | ................. | .................... |

5. अधोलिखितान् शब्दान् अधिकृत्य वाक्यनिर्माणं कुरुत –

1. जगतः .....................................
2. यशसे .....................................
3. प्रज्ञा .....................................
4. त्यागे .....................................

5. आत्मानम्  .....................................

6. चर्म  .....................................

7. असक्त:  .....................................

8. मनीषिण:  .....................................

6. अधोलिखितानि वाक्यानि संशोधनीयानि –

1. धनिकानां धनं दानं भवितव्यम्।

2. राममहेश: तत्र गच्छत:।

3. ज्ञानं सदृश एव तस्य वक्तव्यम्।

4. सूर्य: पृथ्वीं जलं प्रदानं एव तस्या: जलं गृह्णाति।

5. मनीषी धर्मार्जनं कुर्वन्ति।

---------

# चतुर्थः पाठः

## काकी–कृष्णसर्प–कथा

### (पंचतन्त्रात्)

पाठ–परिचयः

पंचतन्त्रं कथाग्रन्थः अस्ति। अस्य कर्ता पं. विष्णु शर्मा आसीत्। संस्कृतनीतिकथासु पंचतन्त्रस्य महत्त्वपूर्णं स्थानं वर्तते। उपलब्धानुवादानां आधारेण अस्य रचनाकालः ईसा–पूर्वतृतीयशताब्दी निर्धारितः। पंचतन्त्रं पंच तन्त्रेषु (विभागेषु) विभक्तः – मित्रलाभः, मित्रसंप्राप्तिः, काकोलुकीयं, लब्धप्रणाशः, अपरीक्षितकारकः इति। मनोविज्ञानस्य लोकव्यवहारस्य राजकार्यस्य च सिद्धान्तानां परिचयं कारयन्ति इमाः कथाः।

प्रस्तुतायां कथायां एकस्य वायसदम्पत्याः बालकान् एकः सर्पः भक्षयति। तौ अतिचिन्तितौ स्तः। तद्रक्षणार्थं स्वमित्रं शृगालं उपायं पृच्छतः। तदा शृगालः एकेन कथामाध्यमेन कथयति यत् अस्मिन् संसारे बुद्धिमते किमपि न असाध्यम्। उपायेन एव सर्वं साध्यं भवति। शृगालः युक्तिं कथयति यत् त्वं सर्पस्य वधार्थं उपायं कुरु। ततः वायसी एकस्य राज्ञः कनकसूत्रमादाय तस्मिन् कोटरे न्यक्षिपत्। ततः राजपुरुषा तं अन्वेषयन् तत्र उपस्थिताः, तं कृष्णसर्पं च लगुडप्रहारेण घ्नन्ति। ततः वायसदम्पती सुखेन वसतः।

कथा

अस्ति कस्मिंश्चित्प्रदेशे महान् न्यग्रोधपादपः। तत्र वायसदम्पती प्रतिवसतः स्म। अथ तयोः प्रसवकाले वृक्षविवरान्निष्क्रम्य कृष्णसर्पः सदैव तदपत्यानि भक्षयति। ततस्तौ निर्वेदादन्यवृक्षमूलनिवासिनं प्रियसुहृदं शृगालं गत्वोचतुः – "भद्र ! किमेवंविधे संजाते आवयोः कर्त्तव्यं भवति ? एष तावद् दुष्टात्मा कृष्णसर्पो वृक्षविवरान्निर्गत्यावयोर्बालकान् भक्षयति। तत्कथ्यतां तद्रक्षणार्थं कश्चिदुपायः। उक्तं च –

यस्य क्षेत्रं नदीतीरे, भार्या च परसंगता।
ससर्पे च गृहे वासः, कथं स्यात्तस्य निर्वृतिः।।

अन्यच्च –

सर्पयुक्ते गृहे वासो मृत्युरेव न संशयः।
यद् ग्रामान्ते वसेत्सर्पस्तस्य स्यात्प्राणसंशयः।।
अस्माकमपि तत्रस्थितां प्रतिदिनं प्राणसंशयः।

स आह – "नात्रविषये स्वल्पोऽपि विषादः कार्यः। नूनं स लुब्धो नोपायमन्तरेण वध्यः स्यात् (यतः)

उपायेन जयो यादृग्रिपोस्तादृङ् न हेतिभिः।
उपायज्ञोऽल्पकायोऽपि न शूरैः परिभूयते।।

तथा च–

भक्षयित्वा बहुन्मत्स्यानुत्तमाधममध्यमान्।
अतिलौल्याद् बकः कश्चिन्मृतः कर्कटग्रहात्।।

तावूचतुः – ''कथमेतत् ?'' सोऽब्रवीत् –

अस्ति कस्मिंश्चिद्वनप्रदेशे नानाजलचरसनाथं महत्सरः। तत्र च कृताश्रयो बक एको वृद्धभावमुपगतो मत्स्यान् व्यापादयितुमसमर्थः। ततश्च क्षुत्क्षामकण्ठः सरस्तीर उपविष्टो मुक्ताफलप्रकरसदृशैरश्रुप्रवाहैर्ध रातलमभिषिंचन् रुरोद। एकः कुलीरको नानाजलचरसमेतः समेत्य तस्य दुःखेन दुःखितः सादरमिदमूचे– ''माम ! किमद्य त्वया नाहारवृत्तिरनुष्ठीयते ?केवलमश्रुपूर्णनेत्राभ्यां सनिःष्वासेन स्थीयते ?''

स आह – ''वत्स ! सत्यमुपलक्षितं भवता, मया हि मत्स्यादनं प्रति परमवैराग्यतया साम्प्रतं प्रायोपवेशनं कृतम्, तेनाहं समीपगतानपि मत्स्यान्न भक्षयामि।''

कुलीरकस्तत् श्रुत्वा प्राह – ''माम ! किं तद्वैराग्यकारणम् ?'' स प्राह – ''वत्स ! अहमस्मिन्सरसि जातो वृद्धिं गतश्च। तन्मयैतत् श्रुतं यद् द्वादषवार्षिक्यानावृष्टिः संपद्यते लग्ना।''

कुलीरक आह – ''कस्मात्तत् श्रुतम् ?''

बक आह – दैवज्ञमुखात्। एश शनैष्चरो हि रोहिणीसकटं भित्त्वा भौमं शुक्रं च प्रयास्यति। उक्तं च वराहमिहिरेण –

> यदि भिन्ते सूर्यसूतोरोहिण्याः शकटमिह लोके।
>
> द्वादशवर्षाणि तदा न हि वर्षति वासवो भूमौ।।

तदेतत्सरः स्वल्पतोयं वर्तते, शीघ्रं शोषं यास्यति। अस्मिञ्छुष्के यैः सहाहं वृद्धिं गतः, सदैव क्रीडितश्च ते सर्वे तोयाभावान्नाशं यास्यन्ति, तत्तेषा वियोगं द्रष्टुमसमर्थः। तेनैतत्प्रायोपवेशनं कृतम्। साम्प्रतं सर्वेषां स्वल्पजलाशयानां जलचराः गुरुजलाशयेषु स्वस्वजनैर्नीयन्ते। केचिद् च मकरगोधशिशुमार जलहस्तिप्रभृतयः स्वयमेव गच्छन्ति। अत्र पुनः सरसि ये जलचरास्ते निश्चिन्ताः सन्ति। तेनाहं विशेषाद्रोदिमि, यद्बीजशेषमात्रमप्यत्र नोद्धरिष्यति।''

ततः स तदाकर्ण्यान्येषामपि जलचराणां तत्तस्य वचनं निवेदयामास। अथ ते सर्वे भयत्रस्तमनसो मत्स्यकच्छपप्रभतयस्तमभ्युपेत्य पप्रच्छुः – ''माम ! अस्ति कश्चिदुपायो येनास्माकं रक्षा भवति ?''

बक आह – ''अस्त्यस्य जलाशयस्य नातिदूरे प्रभूतजलसनाथं सरः। पद्मिनी खण्डमण्डितं यच्चतुर्विंशत्यपि वर्षाणामनावृष्टया न शोषमेष्यति। तद्यदि मम पृष्ठं कश्चिदारोहति तदहं तं नत्र नयामि।''

अथ ते तत्र विश्वाससमापन्नाः ''तात, मातुल, भ्रातः ! इति ब्रुवाणा अहं पूर्वमहं पूर्वम्, समन्तात्परितस्थुः। सोऽपि दुष्टाशयः क्रमेण तान् पृष्ठे आरोप्य जलाशयस्य नातिदूरे शिलां समासाद्य तस्यामाक्षिप्य स्वेच्छया भक्षयित्वा भूयोऽपि जलाशयं समासाद्य जलचराणां मिथ्यावार्तासन्देषकैर्मनांसि रञ्जयन्नित्यमेवाहारवृत्तिमकरोत्।

अन्यस्मिन्दिने च कुलीरकेणोक्तः – ''माम ! मया सह ते प्रथमः स्नेहसंभाषः सञ्जातः, तत्किं मां परित्यज्यान्यान्नयसि ?तस्मादद्य मे प्राणत्राणं कुरु।''

तदाकर्ण्य सोऽपि दुष्टाशयश्चिन्तितवान् – ''निर्विण्णोऽहं मत्स्यमांसादनेन, तदद्यैनं कुलीरकं व्यञ्जनस्थाने करोमि।'' इति विचिन्त्य तं पृष्ठे समारोप्य तां वध्यशिलामुद्दिश्य प्रस्थितः। कुलीरकोऽपि दूरादेवास्थिपर्वतं शिलाश्चयमवलोक्य मत्स्यास्थीनि परिज्ञाय तमपृच्छत् – माम ! कियद्दूरे स जलाशयः ? मदीयभारेणातिश्रान्तस्त्वम्। तत्कथय ?''

सोऽपि मन्दधीर्जलचरोऽयं स्थले न प्रभवतीति मत्वा सस्मितमिदमाह – "कुलीरक! कुतोऽन्यो जलाशयः? मम प्राणयात्रेयम्। तस्मात्स्मर्यतामात्मनोऽभीष्टंदेवता, त्वामप्यस्यां शिलायां निक्षिप्य भक्षयिष्यामि।" इत्युक्तवति स्ववदनदंशद्वयेन मृणालनालधवलायां मृदुग्रीवायां गृहीतो मृतश्च।

अथ स तां बकग्रीवां समादाय षनैःषनैस्तज्जलाशयमाससाद। ततः सर्वैरेव जलचरैः पृष्टः –"भो कुलीरक! किं निवृत्तस्त्वम्?स मातुलोऽपि नायातः। तत्किं चिरयति?वयं सर्वे सोत्सुकाः कृतक्षणास्तिष्ठामः।"

एवं तैरभिहिते कुलीरकोऽपि विहस्योवाच – "मूर्खाः! सर्वे जलचरास्तेन मिथ्यावादिना वंचयित्वा नातिदूरे शिलातले प्रक्षिप्य भक्षिताः। तन्ममायुः शेषतया तस्य विश्वासघातकस्याभिप्रायं ज्ञात्वा ग्रीवेयमानीता, अधुना सर्वजलचराणां क्षेमं भविष्यति।" अतोऽहं ब्रवीमि – "भक्षयित्वा बहून्मत्स्यान्" इति।

वायस आह – "भद्र! तत्कथय कथं स दुष्टसर्पो वधमुपैष्यति?"

शृगाल आह – "गच्छतु भवान् कष्चिन्नगरं राजाधिष्ठानम्। तत्र कस्यापि धनिनो राजाामात्यादेः प्रमादिनः कनकसूत्रं हारं वा गृहीत्वा तत्कोटरे प्रक्षिप, येन सर्पस्तद्ग्रहणेन वध्यते।"

अथ तत्क्षणात् काकः काकी च तदाकर्ण्यात्मेच्छयोत्पतितौ। ततश्च काकी किंचित्सरः प्राप्य यावत्पश्यति, तावत्तन्मध्ये कस्यचिद्राज्ञोऽन्तःपुरं जलासन्नं न्यस्तकनकसूत्रं मुक्ताहारवस्त्राभरणं जलक्रीडां कुरुते। अथ सा वायसी कनसूत्रमेकमादाय स्वगृहाभिमुखं प्रतस्थे। ततष्च कंचुकिनो वर्षवराश्च तन्नीयमानमुपलक्ष्य, गृहीतलगुडाः सत्वरमनुययुः। काक्यपि सर्पकोटरे तत्कनकसूत्रं प्रक्षिप्य सुदूरमवस्थिता।

अथ यावद्राजपुरुषास्तं वृक्षमारुह्य तत्कोटरमवलोकयन्ति, तावत्कृष्णसर्पः प्रसारितभोगस्तिष्ठति। ततस्तं लगुडप्रहारेण हत्वा कनकसूत्रमादाय यथाभिलषितं स्थानं गताः। वायसदम्पती अपि ततः परं सुखेन वसतः। अतोऽहं ब्रवीमि – "उपायेन यत्कुर्यात्" इति। "तन्न किंचिदिह बुद्धिमतामसाध्यमस्ति"।

## कठिन–षब्दार्थाः

न्यग्रोधः = वटः। वायसदम्पती = काकदम्पती। अपत्यानि = बालकान् । निर्वेदात् = दुःखावेगात्। प्राणसंशयः = प्राणभयः। विषादः = शोकः। हेतिभिः = शस्त्रैः। न परिभूयते = न पराजयते। अतिलौल्यात् = लोभाधिक्यात्। क्षुत्क्षामकण्ठः = बुभुक्षया शुष्ककण्ठः। कुलीरकः = कर्कटः। प्रायोपवेशनम् = प्राणत्यागनिश्चयेनावस्थानम् (प्राण त्यागने का व्रत लेकर बैठ गया हूँ)। दैवज्ञः = ज्योतिषिकः। भित्त्वा = भेदयित्वा। भौमं = मंगलग्रहं। सूर्यसुतः = शनिः। वासवः = इन्द्रः। तोयाभावात् = जलाभावात्। मकरः = ग्राहः। नोद्धरिश्यति = न स्थास्यति। पद्मिनीखण्डमण्डितः = कमलिनीसमूहविराजितम्। दुष्टाशयः = दुष्टान्तःकरणः। आक्षिप्य = पातयित्वा। निर्विण्णः = खिन्नः। अदनेन = भक्षणेन। श्रान्तः = शिथिलः। मृदुग्रीवायां = कोमले कण्ठे। संभ्रमेण = भयेन। अमात्यादेः = सचिवादेः। प्रमादिनः = प्रमत्तस्य, असावधानस्य। आत्मेच्छया = स्वेच्छया।

## अभ्यासार्थ–प्रष्नाः–

वस्तुनिष्ठ–प्रष्नाः

प्रश्नः 1 (क) न्यग्रोधपादपे कौ प्रतिवसतः?

(1) वायसदम्पती (2) कृष्णसर्पदम्पती

(3) कर्कटदम्पती (4) जलचरदम्पती

(ख) कः वायसदम्पत्याः बालकान् भक्षयति?

(1) कृष्णसर्पः (2) कर्कटः

(3) वायसः (4) बकः

(ग) कुलीरकः कस्य ग्रीवां समादाय जलाशयमाससाद?

(1) वायसः (2) मत्स्यस्य

(3) बकस्य (4) सर्पस्य

अतिलघूत्तरात्मकप्रष्नाः

प्रश्नः 2 अधोलिखित प्रश्नानां उत्तरं लिखत–

(क) कः शूरैः न परिभूयते?

(ख) बकः कुत्र निवसति स्म?

(ग) बकः कान् शिलातले प्रक्षिप्य भक्षितवान्?

(घ) वायसी किम् आदायस्वगृहाभिमुखं प्रतस्थे?

(ङ) किं न किंचिदिह असाध्यमस्ति?

निबन्धात्मकप्रष्नाः

प्रश्नः 3 अधोलिखितानां गद्यांशानाम् अनुवादं हिन्दी भाषायाम् कुरुत –

(क) अस्ति कस्मिंश्चित् प्रदेशे .................................. बालकान् भक्षयति।

(ख) स आह–"वत्स! सत्यमुपलक्षितं .................................. संपद्यते लग्ना।

(ग) अथ ते तत्र .................................. रंजयन्नित्यमेवाहारवृत्तिमकरोत्।

(घ) अथ यावद्राजपुरुषास्तं .................................. बुद्धिमतामसाध्यमस्ति।

प्रश्नः 4 "यस्य क्षेत्रं ................................ स्यात्तस्य निवृत्तिः" अस्मिन् पद्ये कः छन्दः, तल्लक्षणं च लिखित्वा संगमयत –

प्रश्न 5 कथायाः सारं प्रतिपादयत।

व्याकरण–प्रष्नाः

प्रश्नः 6 (क) अधोलिखितानां पदानां सन्धि–विच्छेदं कृत्वा सन्धिनाम निर्देशं कुरुत –

(1) स्वल्पोऽपि (2) नोपायम् (3) कृताश्रयः

(4) अभ्युपेत्य (5) स्वेच्छया (6) इत्युक्तवति

(ख) अधोलिखितानां पदानां सन्धिं कुरुत –

(1) विवराद् + निष्क्रम्य (2) जलचराः + ते (3) अपि + अस्य

(4) सः + अपि (5) अद्य + एनम् (6) कृत + आश्रयः

(ग) अधोलिखितेषु पदेषु मूलधातु–लकार–पुरुष–वचनानां निर्देशं कुरुत–

| | मूलधातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (1) भक्षयति | | | | |
| (2) स्यात् | | | | |
| (3) अस्ति | | | | |

(4) भवति

(5) यास्यति

(6) करोमि

(7) अब्रवीत्

(8) वध्यते

(घ) अधोलिखितेषु पदेषु मूलशब्द–विभक्ति–लिङ्ग–वचनानां निर्देशं कुरुत–

| | मूलशब्दः | विभक्तिः | लिङ्गं | वचनम् |
|---|---|---|---|---|
| (1) अपत्यानि | | | | |
| (2) बालकान् | | | | |
| (3) त्वया | | | | |
| (4) तस्य | | | | |
| (5) अस्माकम् | | | | |
| (6) ग्रीवायाम् | | | | |
| (7) त्वाम् | | | | |
| (8) त्वम् | | | | |

(ङ) अधोलिखितेषु पदेषु उपसर्ग–प्रकृति–प्रत्ययानां निर्देशं कुरुत–

| | उपसर्गः | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (1) निष्क्रम्य | | | |
| (2) सञ्जातः | | | |
| (3) वध्यः | | | |
| (4) व्यापादयितुम् | | | |
| (5) वृत्तिः | | | |
| (6) उपवेशनम् | | | |
| (7) कृतम् | | | |
| (8) भित्त्वा | | | |

(च) अधोलिखितपदेषु समासविग्रहं कृत्वा समासस्य नामनिर्देशं कुरुत –

| | समासविग्रहः | समासस्य नाम |
|---|---|---|
| (1) कृष्णसर्पः | | |
| (2) दुष्टात्मा | | |

(3) जलचरः

(4) अनावृष्टिः

(5) प्राणत्राणम्

(6) राजपुरुषाः

(छ) पंच–उपसर्गपदानाश्रित्य वाक्यनिर्माणं कुरुत।

## उत्तरमाला

प्रश्नः1 (क) 1 (ख) 1 (ग) 3

प्रश्नः2 (क) उपायज्ञाल्पकायः (ख) जलाशये (ग) जलचरान्

(घ) एकं कनकसूत्रम् (ङ.) बुद्धिमताम्

———————

# पञ्चमः पाठः

## अर्थो हि कन्या परकीय एव

पाठ–परिचयः

''अभिज्ञानशाकुन्तलम्'' न केवलं कविकुलगुरुकालिदासस्य एव सर्वश्रेष्ठा कृतिरस्ति अपितु संस्कृतकाव्यसाहित्यस्यापि सर्वोत्कृष्टा रचना अस्ति। यथा चोक्तं कविना–

''काव्येषु नाटकं रम्यम्, तत्र रम्या शकुन्तला।।''

महाकवेः कालिदासस्य सप्त कृतयः प्राधान्येन स्वीक्रियन्ते। तेषु (1) अभिज्ञानशाकुन्तलम् (2) विक्रमोर्वशीयम् (3) मालविकाग्निमित्रम् इति त्रीणि नाटकानि सन्ति। (4) रघुवंशम् (5) कुमारसम्भवम् इति द्वे महाकाव्ये (6) मेघदूतम् (7) ऋतुसंहारम् चेति द्वे गीतिकाव्ये स्तः।

महाकवि कालिदासस्य स्थितिः सप्तपंचाशत् ईस्वीयपूर्ववर्षे उज्जयिनीस्थस्य विक्रमादित्यस्य समये आसीत्। सः राज्ञः सभारत्नम् आसीत्। कालिदासेन महाभारतस्य 'शकुन्तलोपाख्यानम्' कथायाः आधारेण एवं अस्य नाटकस्य रचना विहिता। अस्मिन् नाटके सप्त अंका सन्ति।

''कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्'' इति सर्वैर्विद्वद्भिः स्वीकृतम्।

प्रस्तुतनाट्यांशः अभिज्ञानशाकुन्तलस्य चतुर्थ–अंकात् उद्धृतः अस्ति। नाटयांशेऽस्मिन् महर्षि कण्वेन स्वशिष्यैः सह शकुन्तलां तस्याः पतिगृहं प्रेषणस्य, आश्रमवासिप्राणिनां शकुन्तलां प्रति वियोगजन्य दुःखप्रकटीकरणस्य विचित्रं मार्मिकं च वर्णनम् अस्ति। दानस्य परम्परासु भारतीयसंस्कृत्यां कन्यादानस्य अतीव महत्त्वं वर्तते। कन्या धनं परस्य धनं भवति। अतएव अस्य पाठस्य नाम ''अर्थो हि कन्या परकीय एव'' इति कृतम्।

पात्र–परिचयः

कण्वः – शकुन्तलायाः पालकः एकः महर्षिः।

सख्यौ – शकुन्तलायाः सख्यौ–अनसूया प्रियंवदा च।

शकुन्तला–महर्षि कण्वस्य धर्मपुत्री।

गौतमी–कण्वस्य धर्मभगिनी।

प्रियंवदा– शकुन्तलायाः सखी।

अनसूया– शकुन्तलायाः सखी।

शिष्यौ–कण्वस्य शिष्यौ शाङ्.र्गरव–शारद्वतौ।

(ततः प्रविशति स्नानोत्तीर्णः कण्वः)

कण्वः–विचिन्त्य

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,
कण्ठः स्तम्भितवाष्पवृत्तिकलुषं चिन्ताजडं दर्शनम्।

वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः,

पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः।।1।।

इति परिक्रामति

सख्यौ– शकुन्तले! अवसितमण्डनासि साम्प्रतं परिधेहि क्षौमयुगलम्।

शकुन्तला– (उत्थाय नाट्येन परिधत्ते)

गौतमी– जाते! एष ते गुरुरुपस्थितः तत् समुदाचारं प्रतिपद्यस्व।

शकुन्तला– (सव्रीडम्) तात! वन्दे

कण्वः– वत्से!

ययातेरिव शर्मिष्ठा, भर्तुर्बहुमता भव।

सुतं त्वमपि सम्राज्यं, सेव पुरुमवाप्नुहि।।2।।

गौतमी– भगवान् वरः खल्वेषः आशिषः

कण्वः– वत्से! प्रतिष्ठस्व इदानीम्। (सदृष्टिक्षेपम्) क्व नु ते

गौतमी– शाङ्.र्गरवशारद्वत मिश्राः? (प्रविष्य)

शिष्यः– भगवन्। इमे स्मः।

कण्वः– भगिन्यास्ते मार्गमादेशय।

शाङ्.र्गरवः – इतः इतः भवती।

(सर्वे परिक्रामन्ति)

कण्वः – भो भोः सन्निहितास्तपोवनतरवः ?

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या,

नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।।

आदौ वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः,

सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।3।।

शाङ्.र्गरवः – (कोकिलरवं सूचयित्वा) भगवन्।

अनुमतगमना शकुन्तला, तरुभिरियं वनवासबन्धुभिः।

परभृतविरूतं कलं यथा, प्रतिवचनीकृतमेभिरीदृशम्।।4।।

गौतमी – जाते ! ज्ञातिजनस्निग्धाभिः अनुज्ञातगमनासि तपोवनदेवताभिः। तत् प्रणम भगवती।

शकुन्तला – (सप्रणामं परिक्रम्य, जनान्तिकम्) हला प्रियंवदे ! आश्रमपदं परित्यजन्त्या दुःखेन चरणौ पुरतः न निपततः।

प्रियंवदा – न केवलं त्वमेव तपोवनविरहकातरा त्वयोपस्थितवियोगस्य तपोवनस्यापि अवस्थां प्रेक्षस्व तावत्।

उद्गलितदर्भकवला मृग्यः, परित्यक्तनर्तना मयूराः।

अपसृतपाण्डुपत्रा, मुंचन्त्यश्रूणीव लताः।।5।।

शकुन्तला – (स्मृत्वा) तात ! लताभगिनीं वनज्योत्स्नां तावदामंत्रयिष्ये।

कण्वः – वत्से! अवैमि ते तस्यां सौन्दर्यस्नेहम् इयं तावत् दक्षिणेन पश्य।

शकुन्तला – (लतामुपेत्य) वनज्योत्स्ने ! चूतसंगतापि मां प्रत्यालिंग शाखा–बाहुभिः। अद्यप्रभृति दूरवर्तिनी भविष्यामि। तात ! अहमिव इयं त्वया चिन्तनीया।

कण्वः – आम् वत्से। तदितः पन्थानं प्रतिपद्यस्व।

शकुन्तला – (सख्यौ प्रति) हला ! एषा द्वयोरपि वां हस्ते निक्षेपः।

सख्यौ – अयं जनः कस्य हस्ते समर्पितः ?इति वाष्पं विहरतः।

कण्वः – अनसूये ! अलं रुदित्वा। ननु भवतीभ्यामेव स्थिरीकर्त्तव्या शकुन्तला।

(सर्वे परिक्रामन्ति)

शकुन्तला – (विलोक्य) तात। एषा उटजपर्यन्तचारिणी गर्भमारमन्थरा मृगवधूः यदा सुखप्रसवा भविष्यति, तदा में कमपि प्रियनिवेदकं विसर्जयिष्यथ मा इदं विस्मरिष्यसि।

कण्वः – नेदं विस्मरिष्यामि।

शकुन्तला– (गतिभेदं रूपयित्वा) अहो! को नु खलु एषः निवसने मे सज्जते?

(इति परावृत्यावलोकयति)

कण्वः– वत्से।

यस्य त्वया व्रणविरोपणमिङ्.गुदीनां,

तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।

श्यामाकमुष्टिपरिवर्धितको जहाति,

सोऽयं न पुत्रकृतकः पदवीं मृगस्ते।। 6 ।।

शकुन्तला– वत्स! किं सहवासपरित्यागिनीं मामनुसरसि? अचिरप्रसूतया जनन्या विना यथा मया वर्द्धितोऽसि, तथा इदानीमपि मया विरहितं तातस्त्वां चिन्तयिष्यति। निवर्तस्व तावत्। इति रुदती प्रस्थिता।

कण्वः– वत्से! अलं रुदितेन। स्थिरा भव, इतः पन्थानमालोक्य।

शाङ्.गरवः– भगवन् ! उदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तदिदं सरसितीरम्। अत्र सन्दिश्य प्रतिगन्तुमर्हसि।

कण्वः– तेन हि इमां क्षीरवृक्षच्छायामाश्रयामः। (सर्वे परिक्रम्य स्थिताः)

अनसूया– सखि ! आश्रमपदे नास्ति कोऽपि चित्तवान् यस्त्वया विरह्यमाणो न ताम्यति।
प्रेक्षस्व तावत् पुटकिनी पत्रान्तरितां व्यवहृतोऽपि न खलु व्याहरति प्रियाम्।
चक्रवाकोऽपि मुखे उद्व्यूढमृणालः त्वयि दृष्टिं ददाति।

कण्वः– (शकुन्तलां विलोक्य) वत्से! त्वमिदानीमनुशासनीयासि। वनौकसोऽपि वयं लौकिकज्ञा एव।

शाड्.र्गरवः– भगवन् ! न खलु धीमतां कश्चिदविषयो नाम।

कण्वः– सा त्वमितः पतिकुलं प्राप्य –

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने,
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भागेष्वनुत्सेकिनी,
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।। 7 ।।

– किं वा गौतमी मन्यते?

गौतमी– एतावान् एवं वधूजनस्योपदेशः। जाते! एतत्खलु सर्वमवधारय।

कण्वः– वत्से! परिष्वजस्व मां सखीजनं च।

शकुन्तला– (पितरमाश्लिष्य) कथमिदानीं तातस्याड्.कात्परिभ्रष्टा मलयपर्वतात् उन्मूलिता चन्दनलतेव देशान्तरे जीवितं धारयिष्ये?

कण्वः–वत्से! किमेवं माम् जड़ीकरोषि ?(निःश्वस्य)

शममेष्यति मम शोकः कथं नु वत्से! त्वया रचितपूर्वम्?
उटजद्वारविरूढं नीवारबलिं विलोकयतः।।8।।

–गच्छ शिवास्ते संतु पन्थानः। (इति निष्क्रान्ताः शकुन्तलया सह गौतमी शाड्.र्गरव–शारद्वतमिश्राः)।

सख्यौ– (शकुन्तलां विलोक्य) हा धिक्, हा धिक्। अन्तर्हिता शकुन्तला वनराज्या।

कण्वः– (सनिःश्वासम्) अनसूये! गतवती वां सहधर्मचारिणी। निगृह्य शोकमनुगच्छतं मां प्रस्थितम्। (सर्वे प्रस्थिताः)

सख्यौ– तात! शकुन्तलाविरहितं शून्यमिव तपोवनं प्रविशामः।

कण्वः– स्नेहप्रवृत्तिरेवंदर्शिनी। सविमर्शं परिक्रम्य। हन्त भोः। शकुन्तलां पतिगृहं विसृज्य लब्धमिदानीं स्वास्थ्यम्।

कुतः–

अर्थो हि कन्या परकीय एव,
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं,
प्रत्यर्पित न्यास इवान्तरात्मा।।9।।

(इति सर्वे निष्क्रान्ताः)

श्लोकानाम् अन्वयः

1. कण्वः– अद्य शकुन्तला यास्यति इति हृदयं उत्कण्ठया संस्पृष्टम् कण्ठः स्तम्भितवाष्पवृति कलुषः दर्शनं चिन्ताजड़म्, अरण्यौकसः मम तावत् स्नेहात् इदं ईदृशं वैक्लव्यम्, गृहिणः नवैः तनया विश्लेषदुःखैः कथं न पीडयन्ति।

2. ययाते शर्मिष्ठा इव त्वं अपि भर्तुः बहुमता भव, सा पुरुं सुतं इव (त्वं अपि) सम्राजं सुतं आप्नुहि।

3. या युष्मासु अपीतेषु प्रथमं जलं पातुं न व्यवस्यति, प्रियमण्डना अपि या स्नेहेन भवतां पल्लवं न आदत्ते, वः कुसुमप्रसूति समये आदौ यस्याः उत्सवः भवति, सा इव शकुन्तला पतिगृहं याति, सर्वैः अनुज्ञायताम्।

4. इयं शकुन्तला वनवासबन्धुभिः तरुभिः अनुमतगमना यथा कलं परभृतविरुतं एभिः ईदृशं प्रतिवचनीकृतम्।

5. मृग्यः उद्गलितदर्भकवला, मयूराः परित्यक्तनर्तनाः अपसृत पाण्डुपत्राः लताः अश्रूणि मुंचन्ति इव।

6. त्वया यस्य कुशसूचिविद्धे मुखे व्रणविरोपणं इंगुदीनां तैलं न्यषिच्यत श्यामाकमुष्टि परि–वर्धितकः पुत्रकृतकः सः अयं मृगः ते पदवीं न जहाति।

7. गुरून् शुश्रूषस्व, सपत्नीजने प्रिय सखी वृत्तिं कुरु, विप्रकृता अपि रोषणतया भर्तुः प्रतीपं मा गमः स्म, परिजने भूयिष्ठं दक्षिणा भव, भाग्येषु अनुत्सेकिनी एवं युवतयः गृहिणीपदं यान्ति, वामाः कुलस्याधयः।

8. वत्से! त्वया रचित पूर्वं उटजद्वार विरूढं नीवारबलिं विलोकयतः मम शोकः कथं नु शमं एष्यति।

9. हि कन्या परकीय एव अर्थः, तां अद्यः परिगृहीतुः संप्रेष्य प्रत्यर्पितन्यास इव अयं मम अन्तरात्मा विशुद्धः जातः।

### कठिनशब्दार्थाः

यास्यति – गमिष्यति (जायेगी)

संस्पृष्टम् – आक्रान्तम् (आक्रान्त हो गया है)

स्तम्भित – अन्तर्निरुद्ध (भीतर से अश्रु प्रवाह रोकने के कारण रूक गया है)

वैक्लव्यम् – विह्वलत्वम् (व्याकुलता)

अरण्यौकसः – वनवासिनः (वन में रहने वाले का)

विष्लेष – वियोग (बिछुड़ना)

मण्डन – अलंकृत (सज्जित)

परिधेहि – धारणं कुरु (धारण करो/पहनो)

समुदाचारः – उत्थानं, वन्दनादिकं व्यवहारं (उठना, प्रणाम आदि करना)

सव्रीडम् – लज्जया सहितं (लज्जा के सहित)

ययातेः – ययाति नृपस्य (ययाति नामक राजा की)

आप्नुहि – प्राप्नोतु (प्राप्त करो)

संनिहिताः – समीपं स्थिताः (समीपवर्ती)

न व्यवस्यति – न प्रवर्तते (प्रवृत्त नहीं होते है)

न आदत्ते – न गृह्णाति (नही तोड़ती है)

कुसुमप्रसूतिसमये – पुष्पोत्पत्तिसमये (पुष्प उत्पन्न होने पर)

अनुज्ञायताम् – अनुमन्यताम् (आज्ञा/अनुमति दीजिए)

परभृत – परैः काकैः भ्रियते पाल्यते इति कोकिलः (कोयल)

विरुतं – ध्वनिः, रवः (आवाज)

उद्गलित – उद्गीर्ण (उगल दी है)

दर्भकवला – कुशग्रासाः (कुशा नाम घास के ग्रास)

मृग्यः – हरिण्यः, मृगानां पत्न्यः (हरिणियाँ)

अपसृत – पतित (गिरा दिये है)

व्रणविरोपणम् – क्षतस्य विरोपणम् (घाव को सुखाने वाला)

इंगुदीनाम् – तापसतरुफलानाम् (इंगुदी नामक वृक्षों के फलों का)

श्यामाक – मुनिजनभक्ष्यधान्यविशेषः (मुनियों के खाने योग्य धान्य विशेष)

पुत्रकृतकः – पुत्रः इव पालित पुत्रः पुत्रकृतकः (पुत्र के समान पालित पुत्र)

जनान्तिकम् – सख्युः पृथक् (सखि से अलग)

शुश्रूषस्व – सेवस्व (सेवा करो)

विप्रकृता – तिरस्कृता/अपमानिता (अपमानित की हुई)

रोषणतया – क्रोधेन (क्रोध से)

प्रतीपं – प्रतिकूलम् (विपरीत)

वामाः – प्रतिकूलवर्तिन्यः स्त्रियः (प्रतिकूल आचरण करने वाली स्त्रियाँ)

उटज – पर्णशाला (झोपड़ी)

परकीय – परस्य अयं परकीय (दूसरे का)

सम्प्रेष्य – विसृज्य (भेज करके)

परिग्रहीतुः – पत्युः पार्श्वे (पति के पास)

प्रत्यर्पित – प्रतिदत्तः (लौटा देना)

### अभ्यासप्रश्नाः

वस्तुनिष्ठप्रश्नाः – निम्नलिखितप्रश्नानाम् उचितमुत्तरं कोष्ठके देयम्–

(1) काव्येषु किं रम्यम् ?

(अ) गद्यम् (ब) पद्यम्

(स) नाटकम् (द) कथा ( )

(2) महाकवि कालिदासस्य कति कृतयः सन्ति ?

(अ) तिस्रः (ब) चतस्रः

(स) पंच (द) सप्त ( )

(3) शकुन्तलायाः पालकः महर्षिः आसीत् –

(अ) दुर्वासः (ब) कण्वः

(स) वाल्मीकिः (द) विश्वामित्रः ( )

(4) कण्वस्य धर्मभगिनी आसीत् –

(अ) गौतमी (ब) शकुन्तला

(स) अनसूया (द) प्रियंवदा ( )

(5) अभिज्ञान शाकुन्तलम् नाटके अंकाः सन्ति?

(अ) पंच (ब) नव

(स) सप्त (द) दश ( )

अतिलघूत्तरात्मक प्रश्नाः (एक पदेन उत्तरत)

1. महर्षिकण्वस्य धर्मपुत्री का आसीत् ?
2. परस्य धनं का भवति ?
3. कालिदासस्य सर्वस्वं किम् ?
4. ''अद्य शकुन्तला यास्यति'' इति केन चिन्तितम् ?
5. ययातेः पत्नी का आसीत् ?

लघूत्तरात्मकप्रश्नाः (पूर्णवाक्येन उत्तरत)

1. प्रियमण्डनापि भवतां स्नेहेन पल्लवं का न आदते ?
2. इयं शकुन्तला कैः अनुमतगमना ?
3. लताः अश्रूणीव के मुंचन्ति ?
4. शकुन्तलायाः पदवीं कः न जहाति ?
5. परकीय एव अर्थः का भवति ?

निबन्धात्मकप्रश्नाः –

1. अधोलिखित श्लोकानां सप्रसंगं संस्कृतव्याख्यां कुरुत –

    (अ) अनुमतगमना .............................. प्रतिवचनीकृतमेभिरीदृशम्।

    (ब) उद्गलित ............................ मुंचन्त्यश्रूणीव लताः।

    (स) अर्थो हि कन्या ........................... इवान्तरात्मा।

2. स्नानोत्तीर्णः महर्षिकण्वः किम् अचिन्तयत् ?
3. कोकिलरवं श्रुत्वा शाङ्.र्गरवः किम् अकथयत् ?
4. महर्षिकण्वेन पतिकुलं प्राप्य शकुन्तलायै पालनाय का शिक्षा दत्ता ?

व्याकरणात्मक प्रश्नाः –

(1) अधोलिखितेषु पदेषु मूल शब्दः, लिंगम्, विभक्तिः वचनं च लिखत –

| | पदम् | मूल शब्दः | लिंगम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| (1) | तरवः – | | | | |
| (2) | युष्मासु – | | | | |
| (3) | बन्धुभिः – | | | | |
| (4) | मृग्यः – | | | | |
| (5) | युवतयः – | | | | |

(2) अधोलिखितेषु क्रियापदेषु मूलधातुः लकार–पुरुष–वचनानि च लिखत –

| | क्रियापदं | मूलधातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (1) | करोषि – | | | | |
| (2) | मन्यते – | | | | |
| (3) | यान्ति – | | | | |
| (4) | भविष्यति – | | | | |
| (5) | मुंचन्ति – | | | | |

(3) अधोलिखितानां पदानां सन्धि–विच्छेदं कृत्वा सन्धिनामनिर्देशं कुरुत –

| | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| (1) प्रियमण्डनापि – | | |
| (2) यास्यत्यद्य – | | |
| (3) शकुन्तलेति – | | |
| (4) द्वयोरपि – | | |
| (5) अरण्यौकसः – | | |

(4) अधोलिखितानां पदानां प्रकृति प्रत्ययौ लेख्यौ –

| | प्रकृति (धातु) | प्रत्यय |
|---|---|---|
| (1) स्थितः – | | |
| (2) सूचयित्वा – | | |
| (3) त्यक्तम् – | | |
| (4) उपेत्य – | | |
| (5) कर्त्तव्या – | | |

(5) अधोलिखितेषु रेखांकितपदेषु विभक्तिः नामकारणं च लिखत –

(1) अलं <u>रुदितेन</u>।

(2) अचिरप्रसूतया <u>जनन्या</u> विना मया वर्द्धितोऽसि।

(3) इति निष्क्रान्ताः <u>शकुन्तलया</u> सह गौतमी, शाङ्.र्गरवः शारद्वतमिश्राः च।

(4) <u>सख्यौ</u> प्रति हला! एषा द्वयोरपि वां हस्ते निक्षेपः।

(6) अधोलिखितानां पदानां प्रयोगं कृत्वा वाक्यनिर्माणं कुरुत –

1. भगिन्याः –
2. परकीयः –
3. तरवः –
4. अवलोकयति –
5. पन्थानः –

(7) अधोलिखितानां छन्दसां लक्षणं लिखित्वा उदाहरणेषु चिह्नानि देयानि –

(अ) इन्द्रवज्रा (ब) आर्या (स) शार्दूलविक्रीडितम्

वस्तुनिष्ठप्रश्नानाम् उत्तरतालिका– (1) स (2) द (3) ब (4) अ (5) स

---

# षष्ठः पाठः

## दशरथ-श्रवणकुमारवृत्तम्

**पाठपरिचयः-** भारतीयसंस्कृतौ आदिकाव्यत्वेन रामायणस्य आदिकवित्वेन च महर्षेः वाल्मीकेः यशः सर्वत्र संस्कृतसाहित्ये प्रसृतमस्ति। सप्तकाण्डात्मकं करुणरसप्रधानमिदं महाकाव्यं भारतीयसमाजे आदर्शचरित्राणाम् उपस्थापनं करोति। रामायणे अनेके प्रसङ्गाः सन्ति यत्र कारुण्यं प्रस्फुटितं भवति। तादृशेषु एव प्रसङ्गेषु अन्यतममिदं वृत्तम्। श्रवणकुमारस्य मातृपितृभक्तिविषये सर्वत्र प्रसिद्धिरस्ति। श्रवणकुमारः स्ववृद्धं मातरं पितरञ्च तीर्थाटनाय यदा नयति स्म तदा किं जातम्? तस्याः घटनायाः दशरथोपरि कः प्रभावः पतितः? आगच्छन्तु पठामः . . .

स राजा रजनीं षष्ठीं रामे प्रव्राजिते वनम्।
अर्धरात्रे दशरथः संस्मरन् दुष्कृतं कृतम्॥1
स राजा पुत्रशोकार्तः स्मृत्वा दुष्कृतमात्मनः।
कौसल्यां पुत्रशोकार्तामिदं वचनमब्रवीत्॥2
यदाचरति कल्याणि शुभं वा यदि वाऽशुभम्।
तदेव लभते भद्रे कर्ता कर्मजमात्मनः॥3
देव्यनूढा त्वमभवो युवराजो भवाम्यहम्।
ततः प्रावृडनुप्राप्ता मम कामविवर्धिनी॥4
तस्मिन्नतिसुखकाले धनुष्मान् कवची रथी।
व्यायामकृतसङ्कल्पः सरयूमन्वगां नदीम्॥5
निपाने महिषं रात्रौ गजं वाऽभ्यागतं नदीम्।
अन्यं वा श्वापदं कञ्चिज्जिघांसुरजितेन्द्रियः॥6
अथान्धकारे त्वश्रौषं जले कुम्भस्य पूर्यतः।
अचक्षुर्विषये घोषं वारणस्येव नर्दतः॥7
अमुञ्चं निशितं बाणमहमाशीविषोपमम्।
तत्र वागुषसि व्यक्ता प्रादुरासीद्वनौकसः॥8
हा हेति पततस्तोये बाणाभिहतमर्मणः।
तस्याहं करुणं श्रुत्वा निशिलालपतो बहु॥9
तं देशमहमागम्य दीनसत्त्वः सुदुर्मनाः।
अपश्यमिषुणा तीरे सरय्वास्तपसं हतम्॥10
स मामुद्वीक्ष्य नेत्राभ्यां त्रस्तमस्वस्थचेतसम्।
इत्युवाच वचः क्रूरं दिधक्षन्निव तेजसा॥11
किं तवापकृतं राजन् वने निवसता मया।
एकेन खलु बाणेन मर्मण्यभिहते मयि॥12
द्वावन्धौ निहतौ वृद्धौ माता जनयिता च मे।

तौ कथं दुर्बलान्धौ मत्प्रतीक्षौ पिपासितौ ॥ 13

पितुस्त्वमेव मे गत्वा शीघ्रमाचक्ष्व राघव।
तं प्रसादय गत्वा त्वं न त्वां स कुपितः शपेत् ॥ 14

तस्य त्वाताम्यमानस्य तं बाणमहमुद्धरम्।
स मामुद्वीक्ष्य सन्त्रस्तो जहौ प्राणांस्तपोधनः ॥ 15

ततस्तं घटमादाय पूर्णं परमवारिणा।
आश्रमं तमहं प्राप्य यथाख्यातपथं गतः ॥ 16

तत्राहं दुर्बलावन्धौ वृद्धावपरिणायकौ।
अपश्यं तस्य पितरौ लूनपक्षाविव द्विजौ ॥ 17

पदशब्दं तु मे श्रुत्वा मुनिर्वाक्यमभाषत।
किं चिरायसि मे पुत्र पानीयं क्षिप्रमानय ॥ 18

क्षत्रियोऽहं दशरथो नाहं पुत्रो महात्मनः।
सज्जनावमतं दुःखमिदं प्राप्तं स्वकर्मजम् ॥ 19

भगवञ्छब्दमालक्ष्य मया गजजिघांसुना।
विसृष्टोऽम्भसि नाराचस्तेन तेऽभिहितः सुतः ॥20

स तत् श्रुत्वा वचः क्रूरं ममोक्तमघशंसिना।
मामुवाच महातेजाः कृताञ्जलिमुपस्थितम् ॥ 21

यद्येतदशुभं कर्म न त्वं मे कथयेः स्वयम्।
फलेन्मूर्धा स्म ते राजन्सद्यः शतसहस्रधा ॥ 22

अज्ञानाद्धि कृतं यस्मादिदं तेनैव जीवसि।
अपि ह्यद्य कुलं न स्यादिक्ष्वाकूणां कुतो भवान् ॥23

नय नौ नृपं तं देशमिति मां चाभ्यभाषत।
अद्य तं द्रष्टुमिच्छावः पुत्रं पश्चिमदर्शनम् ॥ 24

तौ पुत्रमात्मनः स्पृष्ट्वा तमासाद्य तपस्विनौ।
निपेततुः शरीरेऽस्य पिता चास्येदमब्रवीत् ॥25

नाभिवादयसे माऽद्य न च मामभिभाषसे।
किन्नु शेषेऽद्य भूमौ त्वं वत्स किं कुपितो ह्यसि ॥ 26

इमामन्धां च वृद्धां च मातरं ते तपस्विनीम्।
कथं वत्स भरिष्यामि कृपणां पुत्रगर्धिनीम् ॥27

तिष्ठ मा स्म गमः पुत्र यमस्य सदनं प्रति।
श्वो मया सह गन्तासि जनन्या च समेधितः ॥28

पुत्रव्यसनजं दुःखं यदेतन्मम साम्प्रतम्।
एवं त्वं पुत्रशोकेन राजन्कालं गमिष्यसि ॥ 29

एवं शापं मयि न्यस्य विलप्य करुणं बहु।
चितामारोप्य देहं तन्मिथुनं स्वर्गमभ्ययात् ॥ 30

तस्यायं कर्मणो देवि विपाकः समुपस्थितः।
इत्युक्त्वा स रुदंस्त्रस्तो भार्यामाह च भूमिपः॥31

हा राघव महाबाहो हा ममायासनाशन।
हा पितृप्रिय मे नाथ हाऽद्य क्वासि गतः सुत॥32

इति रामस्य मातुश्च सुमित्रायाश्च सन्निधौ।
राजा दशरथः शोचञ्जीवितान्तमुपागमत्॥33

**अन्वयः-**

१. रामे वनं प्रव्राजिते (सति) सः राजा दशरथः षष्ठीं रजनीम् अर्धरात्रे कृतं दुष्कृतं संस्मरन् (वचनम् अब्रवीत्)।

२. पुत्रशोकार्तः सः राजा आत्मनः दुष्कृतं स्मृत्वा पुत्रशोकार्तां कौशल्याम् इदं वचनम् अब्रवीत्।

३. कल्याणि! भद्रे! यदि शुभं वा अशुभं वा कर्ता यद् आचरति तदेव आत्मनः कर्मजं लभते।

४. त्वम् अनूढा देवी अभवः, अहं युवराजो भवामि (स्म), ततः मम कामविवर्धिनी प्रावृड् अनुप्राप्ता।

५. तस्मिन् अतिसुखकाले धनुष्मान् कवची रथी व्यायामकृतसङ्कल्पः (अहं) सरयूं नदीम् अन्वगाम्।

६. अजितेन्द्रियः (अहं) रात्रौ निपाने नदीम् अभ्यागतं कञ्चित् महिषं गजं वा अन्यं वा श्वापदं जिघांसुः (आसम्)।

७. अथ अन्धकारे तु जले पूर्यतः कुम्भस्य घोषं अचक्षुर्विषये नर्दतः वारणस्य इव अश्रौषम्।

८. अहम् आशीविषोपमं निशितं बाणम् अमुञ्चम्। तत्र उषसि व्यक्ता वनौकसः वाक् प्रादुरासीत्।

९. तोये पततः बाणाभिहतमर्मणः तस्य हा हा इति बहु लालपतो करुणं (शब्दं) श्रुत्वा( अहं तत्र गतवान्)

१०. तं देशम् आगम्य दीनस्त्वः सुदुर्मनाः अहं सरय्याः तीरे इषुणा हतं तापसम् अपश्यत्।

११. त्रस्तम्, अस्वस्थचेतनं माम् तेजसा नेत्राभ्यां दिधक्षन् इव उद्वीक्ष्य सः इति क्रूरं वचः उवाच।

१२. राजन्! वने निवसता मया तव कि म् अपकृतम्? एकेन बाणेन मयि मर्मणि अभिहिते (सति भवान् अस्ति) खलु।

१३. मे माता जनयिता च द्वो अन्धौ। तौ पिपासितौ मत्प्रतीक्षौ दुर्बलान्धौ कथं निहितौ।

१४. राघव! त्वमेव मे पितुः (समीपं) गत्वा शीघ्रम् आचक्ष्व। त्वं गत्वा तं प्रसादय। कुपितः सः त्वां शपेत्।

१५. आतम्यमानस्य तस्य तु तं बाणम् अहम् उद्धरम्। सन्त्रस्तः तपोधनः सः माम् उद्वीक्ष्य प्राणान् जहौ।

१६. ततः परमवारिणा पूर्णं तं घटम् आदाय अहं यथाख्यातपथं तम् आश्रमं गतः।

१७. तत्र अहं दुर्बलौ अन्धौ अपरिणायकौ वृद्धौ तस्य पितरौ अपश्यम्। (तौ) लूनपक्षौ द्विजौ इव (आस्ताम्)।

१८. मे पदशब्दं श्रुत्वा तु मुनिः वाक्यम् अभाषत। पुत्र! किं चिरायसि? क्षिप्रं मे पानीयम् आनय।

१९. महात्मनः अहं न पुत्र न पुत्रः (अपितु) दशरथः (नाम) क्षत्रियः। (अहं) स्वकर्मजम् इदं सज्जनावमतं दुःखं प्राप्तम्।

२०. भगवन्! गजजिघांसुना मया शब्दम् आलक्ष्य अम्भसि नाराचः विसृष्टः। (तेन नाराचेन) ते सुतः अभिहितः।

२१. अघशंसिना (मया) तत् ममोक्तं क्रूरं वचः श्रुत्वा सः महातेजाः कृताञ्जलिम् उपस्थितं माम् उवाच।

२२. राजन्! यदि एतत् अशुभं कर्म त्वं स्वयं मे न कथयेः, ते मूर्धा सद्यः शतसहस्रधा फलेत् स्म।

२३. यस्माद् इदम् अज्ञानाद् एव कृतं तेन हि जीवसि। हि अद्य इक्ष्वाकूणां कुलम् अपि न स्यात्, कुतो भवान्?

२४. तं देशं नौ नय। अद्य तं पश्चिमदर्शनं पुत्रं द्रष्टुम् इच्छावः इति च माम् अभ्यभाषत।

२५. तौ तपस्विनौ (तत्र) आसाद्य आत्मनः तं पुत्रं स्पृष्ट्वा अस्य शरीरे निपेततुः। अस्य पिता च एवम् अब्रवीत्।

२६. अद्य मा न अभिवादयसे, न च माम् अभिभाषसे। किम् अद्य भूमौ न शेषे ? हि वत्स! किं त्वं कुपितो असि।

२७. वत्स ! ते इमाम् अन्धां च वृद्धां च तपस्विनीं पुत्रगर्धिनीं कृपणां मातरं कथं भरिष्यामि?

२८. पुत्र ! तिष्ठ। यमस्य सदनं प्रति मा गमः स्मः।श्वः जनन्या मया च सह समेधितः गन्ता असि।

२९. राजन्! साम्प्रतं यद् एतत् मम पुत्रव्यसनजं दुःखं, एवं त्वं पुत्रशोकेन कालं गमिष्यसि।

३०. मयि एवं शापं न्यस्य बहु करुणं विलप्य देहं चिताम् आरोप्य तत् मिथुनं स्वर्गम् अभ्ययात्।

३१. देवि! अयं तस्य कर्मणः विपाकः समुपस्थितः। इति उक्त्वा रुदन् त्रस्तः सः भूमिपः भार्याम् आह।

३२. हा राघव! हा महाबाहो! मम आयासनाशन! हा पितृप्रिय मे नाथ! हा सुत! क्व गतः असि?

३३. इति शोचन् रामस्य मातुः सुमित्रायाश्च सन्निधौ राजा दशरथः जीवितान्तम् उपागमत्।

## कठिन-शब्दार्थाः

| | | |
|---|---|---|
| रजनीम् | – | रात्रिम्, रात्रि को। |
| प्रव्राजिते | – | प्र+व्रज्+णिच्+क्त, स.वि., ए.व.; गते सति; चले जाने पर। |
| संस्मरन् | – | स्मृ + शतृ प्रत्ययः, प्र.वि., ए.व.; स्मरणं कुर्वन्; याद करते हुए। |
| पुत्रशोकार्तः | – | पुत्रस्य शोकः, पुत्रशोकेन आर्तः(त.पु.स.); पुत्र के शोक से पीड़ित |
| अनूढा | – | अविवाहिता; अविवाहित। |
| प्रावृट् | – | वर्षाकालः; बरसात। |
| जिघांसुः | – | हन् धातुः + सन् + उ प्रत्ययः; मारणेच्छुकः, हननाभिलाषी, शिकार का इच्छुक। |
| अजितेन्द्रियः | – | असंयमी, अजितेन्द्रिय |
| अश्रौषम् | – | श्रु धातुः + लङ् लकारः उ.पु., ए.व., श्रुतवान्, सुना |
| वारणस्य | – | गजस्य, हाथी का। |
| अमुञ्चम् | – | मुञ्च् धातुः + लङ् लकारः, उ.पु., ए.व., अत्यजम्, त्यक्तवान्, छोड़ा, (बाण) चलाया। |
| निशितम् | – | अत्यन्तं तीव्रम्, पैना, तीखा। |
| उद्वीक्ष्य | – | उद्+वीक्ष्+ल्यप्; अवलोक्य; देखकर। |
| दिधक्षन् | – | दह्+सन्, प्र.वि. ए.व. (पुं.);ज्वालयितुम् इच्छन्; जलाने की इच्छा करते हुए। |
| आचक्ष्व | – | आ+चक्ष्+लोट्लकारे, म.पु., ए.व.; कथय, वद; कहो, बोलो। |
| जहौ | – | हा+लिट्लकारे, प्र.पु., ए.व., तत्याज, त्यक्तवान्; छोड़ दिया। |
| नाराचः | – | नरान् आचमति; बाणः; लोहे का तीर। |
| अघशंसिना | – | पापकर्मनाशकेन; पाप कर्म का नाश करने वाले के द्वारा। |
| पुत्रगर्धिनीम् | – | पुत्राय गर्धिनीम्, पुत्राभिलाषिणीम्; पुत्र की लालसा रखने वाली। |
| समेधितः | – | सहितः, साथ। |

## अभ्यासः

१. **अतिलघूत्तरात्मकप्रश्नाः**

(क) दशरथः कदा दुष्कृतं स्मृतवान्?
(ख) राजा पुत्रशोकार्तां कां वचनम् अब्रवीत्?
(ग) अन्धकारे दशरथः किम् अश्रौषत्?
(घ) दशरथः कीदृशं बाणम् अमुञ्चत्?
(ङ) दशरथः सरय्वाः तीरे कम् अपश्यत्?
(च) दशरथस्य पदशब्दं श्रुत्वा मुनिः किम् अभाषत?
(छ) त्वं (दशरथः) केन शोकेन मृत्युं प्राप्स्यसि?
(ज) कयोः सन्निधौ दशरथः जीवितान्तम् उपागमत्?

२. **लघूत्तरात्मकप्रश्नाः**

(क) कर्ता कीदृशं फलं लभते?
(ख) दशरथः बाणमोचनानन्तरं किम् अकरोत्?
(ग) श्रवणकुमारः स्वमातृपितृविषये किं उक्तवान्?
(घ) दशरथः श्रवणकुमारस्य पितरं किं वदति?
(ङ) श्रवणकुमारस्य पितुः का इच्छा आसीत्?
(च) श्रवणकुमारस्य पिता दशरथं किं शप्तवान्?

३. **अधोलिखितश्लोकानाम् अन्वयं हिन्दीभाषायाम् आशयं च लिखत–**

(क) यदाचरति कल्याणि शुभं वा यदि वाऽशुभम्।
तदेव लभते भद्रे कर्ता कर्मजमात्मनः॥
(ख) अथान्धकारे त्वश्रौषं जले कुम्भस्य पूर्यतः।
अचक्षुर्विषये घोषं वारणस्येव नर्दतः॥
(ग) यद्येतदशुभं कर्म न त्वं मे कथयेः स्वयम्।
फलेन्मूर्धा स्म ते राजन्सद्यः शतसहस्रधा॥
(घ) पुत्रव्यसनजं दुःखं यदेतन्मम साम्प्रतम्।
एवं त्वं पुत्रशोकेन राजन्कालं गमिष्यसि॥

४. **श्लोकानां पूर्तिं कुरुत–**

(क) स राजा रजनीं षष्ठीं रामे प्रव्राजिते वनम्। ........................................।
(ख) किं तवापकृतं राजन् वने निवसता मया। ........................................।
(ग) अज्ञानाद्धि कृतं यस्मादिदं तेनैव जीवसि। ........................................।
(घ) हा राघव महाबाहो हा ममायासनाशन। ........................................।

५. **अधोलिखितपदानां सन्धिविच्छेदं कुरुत सन्धेर्नामापि लिखत–**

| | | | | |
|---|---|---|---|---|
| यदाचरति, | भवाम्यहम्, | अथान्धकारे, | त्वश्रौषम्, | वागुषसि, |
| पततस्तोये, | द्वावन्धौ, | मर्मण्यभिहते, | लूनपक्षाविव, | क्षत्रियोऽहम्, |

यद्येतदशुभम्, ह्यद्य, यदेतन्मम, क्वासि, सुमित्रायाश्च।

**६. निम्नलिखितसामासिकपदानां समासविग्रहं कृत्वा समासस्य नाम लिखत-**

पुत्रशोकार्तः, कामविवर्धिनी, वनौकसः, तपोधनः, महात्मनः,
पुत्रशोकेन, पुत्रव्यसनजम्, जीवितान्तम्, पितृप्रिय।

**७. अधोलिखितानां श्लोकानां संस्कृते व्याख्यां कृत्वा भावार्थं लिखत-**

(क) तत्राहं दुर्बलावन्धौ वृद्धावपरिणायकौ।
अपश्यं तस्य पितरौ लूनपक्षाविव द्विजौ॥

(ख) नाभिवादयसे माऽद्य न च मामभिभाषसे।
किन्नु शेषेऽद्य भूमौ त्वं वत्स किं कुपितो ह्यसि॥

(ग) तस्यायं कर्मणो देवि विपाकः समुपस्थितः।
इत्युक्त्वा स रुदंस्त्रस्तो भार्यामाह च भूमिपः॥

**८. अधोलिखितपदानां प्रकृति-प्रत्ययौ लेख्यौ -**

प्रव्राजिते, संस्मरन्, श्रुत्वा, उद्वीक्ष्य, जनयिता,
आदाय, प्राप्य, उक्तम्, द्रष्टुम्, विलप्य,
आरोप्य, उक्त्वा।

**९. अधोलिखितपदानां धातु-लकार-पुरुष-वचनादीनां निर्देशनं कुरुत-**

| पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| १. अब्रवीत् | ............. | ............ | ............ | ............ |
| २. अश्रौषम् | ............. | ............ | ............ | ............ |
| ३. उपागमत् | ............. | ............ | ............ | ............ |
| ४. उवाच | ............ | ............. | ............ | . . . . . . . . . . . . |
| ५. आनय | ............ | ............. | ............ | . . . . . . . . . . . . |
| ६. कथयेः | ............. | ............ | ............ | ............ |
| ७. इच्छावः | ............. | ............ | ............ | ............ |
| ८. तिष्ठ | ............. | ............ | ............ | ............ |

**१०. अधोलिखितपदानां मूलशब्द-विभक्ति-लिङ्ग-वचनादीनां निर्देशं कुरुत-**

| पदम् | मूलशब्दः | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| १. आत्मनः | ............. | ............ | ............ | ............ |
| २. मम | ............. | ............ | ............ | ............ |
| ३. वारणस्य | ............. | ............ | ............ | ............ |
| ४. इषुणा | ............. | ............ | ............ | ............ |
| ५. तेजसा | ............ | ............ | ............ | . . . . . . . . . . . . |
| ६. निवसता | ............. | ............ | ............ | ............ |

## सप्तमः पाठः

# शिववीरस्य पारतन्त्र्यचिन्तारोगः

पाठपरिचयः

आधुनिकभारतस्य राजस्थानप्रान्तस्य जयपुरनगरे लब्धजन्मा एकोनविंशशताब्द्यां विहारभूषण–भारतभूषण–भारतभास्कर–घटिकाशतक–धर्माचार्य–महामहोपदेशक–सुकवि–साहित्यचार्यप्रभृतिभिः उपाधिभिरलङ्कृतः पण्डितः अम्बिकादत्तव्यासः अनेकानि काव्यनाटकानि रचितवान्। छत्रपतिशिवाजिमहाराजस्य जीवनोपरि एषः एकम् उपन्यासमपि लिखितवान्। तन्नामस्ति खलु शिवराजविजयम् इति। संस्कृतसाहित्यस्य प्रथमोऽयमेतिहासिकः उपन्यासोऽस्ति। अस्य भाषाशैली अतीवसुरुचिपूर्णा अस्ति। संस्कृतभाषायाम् आधुनिकशब्दानां सुप्रयोगः अम्बिकादत्तव्यासमहाभागेन सरलतया कृतः। उपन्यासस्यास्य प्रधानरसः वीरः। द्वादश–उच्छ्वासेषु विभक्तस्य शिवराजविजयस्य एकादश–उच्छ्वासात् प्रस्तुतः पाठः संकलितः।

पाठेऽस्मिन् यवनशासकेन औरंगजेबेन दिल्ल्यां कारागारे शिवाजिमहाराजः पातितः। तत्र कारागारे शिवाजिमहाराजस्य कृते पारतन्त्र्यस्य चिन्ता जाता। स्वमित्राणां साहाय्येन स्वबुद्धिबलेन छत्रपति शिवाजिमहाराजः कारागारात् बहिरागतः।

पाठ्यवस्तु

दिल्लीनगरे महान् कलकलः। मार्गे मार्गे शृङ्गाटके शृङ्गाटके भेरीनादः। गृहे गृहे शृङ्गारः। महाराष्ट्रराजो रोगग्रस्तः इति–आकलय्य च मुमुदिरे द्विषः। भिक्षुकाः प्रत्यहं यमुनातटे एव शष्कुली, अपूपान्, मोदकान्, पेटाः, इण्डरिकाश्च प्राप्य परस्परसहस्रैः आशीराशिभिः समवर्धयन्।

यातयामा यामिनी। अस्मिन्नपि समये नगरे महानेव वादित्रध्वनिः। तावदकस्मादेकेन महाराष्ट्र–भृत्येन त्वरितैः पदैः सोपानमारुह्य कारागारे प्रविश्य अजलिं बद्ध्वा कथितम्– "महाराज! प्रतिष्ठित इव कश्चन पचाशद्वर्षदेशीयो यवनः शिविकामारुह्य समायातोऽस्ति चिकित्सितुं महाराष्ट्रराजम्। वैद्योऽहम् इति वदन् सगर्वं प्रविशति। तदत्र प्रभुचरणा एवं प्रमाणम्। तदाकर्ण्य यावद् उत्तरं चिन्तयति महाराष्ट्रवसुधाधवस्तावद् प्राप्तोत्तर एव पादत्राण–पटपटाभिः सोपानपङ्क्तीर्ध्वनयन् प्रविवेश यवनचिकित्सकः।

ततः सर्वेऽपि ददृशुः यदेकः राजतशलाकाचमत्कृतोपनेत्रः हरितकौशेयोष्णीषशिरस्कः हरितकंचुकः आनाभिविलम्बमानसितकृष्णसान्द्रकूर्च कर्णान्तदीर्घश्मश्रुद्वयः प्रविशन् अवदत् कुत्र महाराष्ट्रराजः? को रोगः? इति तत्पृष्ठलग्न एव चैको द्वाविंशतिवर्षकल्पो यवनयुवकोऽपि कक्षस्थापित श्याममंजूषः प्रविष्टः।

अथोत्थाय माल्यश्रीकगौरसिंहाभ्यां स चिकित्सको राजपल्यङ्क समीप उपवेशितो राज्ञो मस्तकं स्पृशन् पृष्टवान्– को रोगः इति। ततस्तेषामेवमभूवन्नालापाः।

महाराष्ट्रराजः – चिकित्सक! प्रत्यक्षतो न ज्ञायते को रोगः किन्तु क्षुधा ह्रसते, अंगानि च निर्बलानि भवन्ति।

चिकित्सकः – (चक्षुषी सम्मील्य द्वयोरपि करयोर्नाडी चतसृभिरंगुलीभिः परीक्ष्य) नाड्यः शुद्धाः मन्ये

स्वतन्त्रतामपहाय परवान् संवृत्तः इति चिन्तारोगोऽयम्।

महाराष्ट्रराजः – सत्यमन्येऽपि चिकित्सका एवमेव वदन्ति। किन्तु न जाने कीदृशोऽयं रोगो यज्ज्वलयत्यङ्गानि।

चिकित्सकः– औषधं ददामि।

महाराष्ट्रराजः–अलं क्लेशेन। भवानेवं कष्टमूरीकृत्य श्रान्तवानिति गृह्यतामेषस्वल्प–उपहारः – इत्यगुलीयकमार्पयत्।

चिकित्सकः – (अङ्गुलीयकं हस्तेन संस्पृश्य) धन्यावदान्यता तत्र भवतः। परं न वयं दिल्लीवल्लभ पाणिपल्लवलालिताः परदत्तं कारुकोशमपीहामहे। न वा चिकित्साविषयेषु रोगिणां सम्मतिमपेक्षामहे। तत्रापि भवतश्चिकित्सनाय प्रवला राज्ञामाज्ञा, तत्क्षम्यताम्। (इति वक्षः समस्पृशत्)

गोरसिंहः– किं निर्णीतं भवता?

चिकित्सकः – यन्निर्णीतं तस्य प्रतीकारं विदधामि। आविद! आविद! मन्जूषामुद्घाटय। औषधं पाययित्वा क्षणेन नीरोगं विधास्यामि महाराजम्।

महाराजः– किमिदमौषधम्?

चिकित्सकः – आम्, पीयूषहालाहलं नामौषधम्। कफवातपित्तप्रकोपजो रोगः चेदिदं पीयूषं क्षणेनोल्लाघं विदधाति, पलायितुकामानां प्रवंचनामात्रं चेद् हालाहलं क्षणेन विनाशयति।

ततो निश्चितं विषमिदमिति मन्यमानाः सर्वे परस्परमवालूलुकन्। तावदेषो अङ्गुल्यग्रेण तोयमावर्त्य, पूर्णं मेलयित्वा समीपमानयत्। महाराजस्तु विवृद्धमन्युः मुखसमीपमानीयमानं सपात्रं चिकित्सकहस्तं तथा समताडयत् यथा तत् काचपात्रं समुच्छलितं कुड्याहतं शतधा समभूत्। विस्मितप्रायस्य चिकित्सकस्य च शिरसि दृढं चपेटकमाहत्य कूर्चं गृहीत्वा बलेन चकर्ष।

अथ महाराजस्तस्य कृत्रिमकूर्चं स्वहस्तेनोत्पाटितवान्। सखिलखिलाशब्दं हसन्तं तं च सावधानतया ददर्श – अरे अयं तु अस्मद् बाल्यमित्रं प्रसिद्धो योद्धा श्रीमान् मुरेश्वरोऽस्ति।

प्रसन्नो महाराजः सपदि उत्थाय तं गाढमालिलिङ्ग।

मुरेश्वरेणापि विहस्य सूचितम् – यत्साम्प्रतं यवनानां कश्चनोत्सवसमयः इत्यवसरोऽयं प्रस्थानस्य इति।

कठिन–शब्दार्थः –

द्विषः– शत्रवः। यामिनी – निशा। उरीकृत्य – स्वीकृत्य।

शृङ्गाटके – चतुष्पथे। भेरीनादः –तुरही शब्दः। आकलय्य – विचार्य।

शश्कुलीः– पूरिका (पूडी भाषायामिति)। अपूपान्–"पूआ" इति खाद्यपदार्थान् (भाषायां पूओं को इति)। इण्डरिकाः – इडली इति खाद्यपदार्थान् (भाषायाम् इडली को इति)। वदान्यता– उदारता। सम्मतिम् – परामर्शम्। हालाहलम्–विषम्। विवृद्धमन्युः – वर्धितक्रोधः। कारागारे– कारागृहे।

## अभ्यासः

वस्तुनिष्ठ–प्रश्नाः–

1. यातयामा यामिनी अत्र यातयामा शब्दस्य अर्थोऽस्ति –

(अ) प्रहरैकं गतं सा रात्रिः (ब) निशीथकालः
(स) उषःकालः (द) सूर्योदयकालः ( )

2. कीदृशोऽयं रोगो यज्ज्वलयत्यङ्गानि वाक्यमुक्तवान्–
(अ) गोरसिंह : (ब)चिकित्सकः
(स) महाराष्ट्रराजः (द) माल्यश्रीकः ( )

3. शिववीरस्य पारतन्त्र्यचिन्ता रोगः पाठः संकलितोऽस्ति –
(अ) पंचतन्त्रात् (ब) शिवराजविजयात्
(स) दशकुमारचरितात् (द)कथासरित्सागरात् ( )

रिक्तस्थानानि पूरयत–

1. वैद्योऽहम् इति .................................... प्रविशति।
2. दिल्लीवल्लभपाणिपल्लवलालिताः परदत्तं .................................... अपीहामहे।
3. .................................... प्रवंचनामात्रं चेद् हालाहलं क्षणेन विनाशयति।
4. यवनानां कश्चनोत्सवसमयः .................................... प्रस्थानस्य इति।

लघूत्तरात्मक–प्रश्नाः –

1. शिववीराय वैद्यागमनस्य सूचना केन दत्ता?

2. वैद्येन सह तस्य श्याम–मंजूषां धारयन् कः प्रविष्टः?

3. चिकित्सकेन सह केषां वार्तालापः अभवत्?

4. वस्तुतः चिकित्सकः को नाम आसीत्?

5. धन्या वदान्यता तत्र भवतः इति केन उक्तम्?

6. कः शिववीरस्य बाल्यमित्रम् आसीत्?

सप्रसंगं सस्कृतव्याख्या कार्या

1. यातयाता यामिनी। ....................................... प्रभुचरणा एवं प्रमाणम्।
2. ततो निश्चितं विषयम् इदम् इति ....................................... गृहीत्वा बलेन चकर्षः।

संप्रसंग हिन्दी व्याख्याकार्या – (सप्रसंग हिन्दी व्याख्या करिये।)

1. ततो सर्वेऽपि ददृशुः ....................................... श्याममंजूषः प्रविष्टः।
2. गोरसिंहः – किं निर्णीतं भवता?....................................... क्षणेन विनाशयति।

**व्याकरणात्मक प्रश्नाः –**

5. निम्नलिखितानां पदानां निर्दिष्टं विभक्तिवचनं लिख्यताम् –

१. राजस्थानप्रान्तस्य
२. एकोनविंशशताब्द्याम्
३. साहाय्येन
४. कारागारात्
५. हरितकञ्चकः
६. निर्बलानि

6. निम्नलिखितान् उपसर्गान् आधारीकृत्य वाक्यनिर्माणं कुरुत –

१. आ
२. प्रति

३. प्र
४. उप
५. निर्
६. वि

7. निम्नलिखितानां पदानां सन्धिविच्छेदः करणीयः –
१. इण्डरिकाश्च
२. आशीराशिभिः
३. अस्मिन्नपि
४. समायातोऽस्मि
५. ततस्तेषामवमभूवन्नालापाः
६. इत्यंगुलीयकम्

8. निम्नलिखितानां पदानां लिङ्गपरिवर्तनं करणीयम् –

| | | पुल्लिंगम् | स्त्रीलिंगम् |
|---|---|---|---|
| १. | भिक्षुकः | ..................... | ..................... |
| २. | चिकित्सकः | ..................... | ..................... |
| ३. | पवनः | ..................... | ..................... |
| ४. | भवान् | ..................... | ..................... |
| ५. | श्रीमान् | ..................... | ..................... |

...........

अष्टमः पाठः

# न्यासस्य रक्षणम्

**पाठपरिचयः-** "काव्येषु नाटकं रम्यम्" अर्थात् काव्यादीनां पठने सर्वाधिकः आनन्दः नाटकेषु एव आयाति। संस्कृतसाहित्ये प्राचीनतमः नाटककारः महाकविः भासः अस्ति। महाकविना त्रयोदश नाटकानि लिखितानि, एतानि एव 'भासनाटकचक्रम्' इति नाम्ना प्रसिद्धानि। एषु त्रयोदशसु नाटकेषु सर्वाधिकप्रसिद्धं नाटकमस्ति - '**स्वप्नवासवदत्तम्**'। अस्मिन्नाटके षड् अङ्काः सन्ति। नाटकेऽस्मिन् वत्सराज-उदयनस्य अवन्तिराजकुमार्याः वासवदत्तायाश्च प्रणयकथा वर्णिताऽस्ति। रस-भाव-गुण-रीत्यलङ्कार-संवाद-भाषादीनां महनीयसाहित्यिकतत्त्वानां यथोचितसन्निवेशात् सम्पूर्णं नाटकम् अभिनेयम् उपादेयञ्चास्ति।

अस्मादेव नाटकस्य प्रथमाङ्काद् एकः रमणीयांशः उद्धृतोऽस्ति। संन्यासिवेषधारी यौगन्धरायणः (उदयनस्य मंत्री) सामान्यवेषधारिण्या वासवदत्तया सह एकम् आश्रमं प्रविशति। आश्रमप्रवेशकाले किं भवति, आगच्छन्तु पश्यामः . . .

(प्रविश्य)

भटौ- उत्सरत उत्सरत आर्याः! उत्सरत।

(ततः प्रविशति परिव्राजकवेषो यौगन्धरायणः आवन्तिकावेषधारिणी वासवदत्ता च)

यौगन्धरायणः- (कर्ण दत्त्वा) कथमिहाप्युत्सार्यते? कुतः-

**धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलै-**
**र्मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते।**
**उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः,**
**कोऽयं भो! निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया॥१॥**

वासवदत्ता- आर्य! क एष उत्सारयति?

यौगन्धरायणः- भवति! यो धर्मादात्मानमुत्सारयति।

वासवदत्ता- आर्य! न ह्येवं वक्तुकामा, अहमपि नामोत्सारयितव्या भवामीति।

यौगन्धरायणः- भवति! एवमनिर्ज्ञातानि दैवतान्यप्यवधूयन्ते।

वासवदत्ता- आर्य! तथा परिश्रमः परिखेदं नोत्पादयति यथायं परिभवः।

यौगन्धरायणः- भुक्तोज्झित एष विषयोऽत्रभवत्या नात्र चिन्ता कार्या। कुतः-

**पूर्वं त्वयाप्यभिमतं गतमेवमासी-**
**च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः।**
**कालक्रमेण जगतः परिवर्तमाना,**
**चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः॥२॥**

भटौ- उत्सरत आर्याः! उत्सरत।

(ततः प्रविशति काञ्चुकीयः)

काञ्चुकीयः- सम्भषक! न खलु न खलूत्सारणा कार्या। पश्य-

**परिहरतु भवान् नृपापवादं न परुषमाश्रमवासिषु प्रयोज्यम्।**

**नगरपरिभवान् विमोक्तुमेते वनमभिगम्य मनस्विनो वसन्ति ॥ ३ ॥**

उभौ– आर्य ! तथा।

(निष्क्रान्तौ)

यौगन्धरायणः– हन्त ! सविज्ञानमस्य दर्शनम्। वत्से ! उपसर्पावस्तावदेव।

वासवदत्ता– आर्य ! तथा।

यौगन्धरायणः– (उपसृत्य) भोः ! किं कृतेयमुत्सारणा?

काञ्चुकीयः– भोस्तपस्विन् !

यौगन्धरायणः– (आत्मगतम्) तपस्विन्निति गुणवान् खल्वयमालापः। अपरिचयात्तु न श्लिष्यते मे मनसि।

काञ्चुकीयः– भोः श्रूयताम् ! एषा खलु गुरुभिरभिहितनामधेयस्यास्माकं महाराजदर्शकस्य भगिनी पद्मावती नाम। सैषा नो महाराजमातरं महादेवीमाश्रमस्थामनुगम्य अनुज्ञाता तत्रभवत्या राजगृहमेव यास्यति। तदद्य अस्मिन्नाश्रमपदे वासोऽभिप्रेतोऽस्याः। तद् भवन्तः–

**तीर्थोदकानि समिधः कुसुमानि दर्भान्,**
**स्वैरं वनादुपनयन्तु तपोधनानि।**

**धर्मप्रिया नृपसुता नहि धर्मपीडा–**
**मिच्छेत् तपस्विषु कुलव्रतमेतदस्याः ॥ ४ ॥**

यौगन्धरायणः– (स्वगतम्) एवम्। एषा सा मगधराजपुत्री पद्मावती नाम, पुष्पकभद्रादिभिरादेशिकैरादिष्टा स्वामिनो देवी भविष्यति। ततः–

**प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।**
**भर्तृदाराभिलाषित्वादस्यां मे महती स्वता ॥ ५ ॥**

वासवदत्ता– (स्वगतम्) राजदारिकेति श्रुत्वा भगिनिकास्नेहोऽपि मेऽत्र सम्पद्यते।

(ततः प्रविशत्युपविष्टा तापसी)

तापसी– स्वागतं राजदारिकायाः।

वासवदत्ता– (स्वगतम्) इयं सा राजदारिका अभिजनानुरूपं खल्वस्या रूपम्।

पद्मावती– आर्ये ! वन्दे।

तापसी– चिरञ्जीव ! प्रविश जाते ! प्रविश। तपोवनानि नाम अतिथिजनस्य स्वकं गेहम्।

पद्मावती– भवतु भवतु। आर्ये? विश्वस्ताऽस्मि। अनेन बहुमानवचनेनानुगृहीताऽस्मि।

वासवदत्ता– (स्वगतम्) नहि रूपमेव, वागपि खल्वस्याः मधुरा।

तापसी– भद्रे ! इमां तावद् भद्रमुखस्य भगिनिकां कश्चिद् राजा न वरयति?

चेटी– अस्ति राजा प्रद्योतो नामोज्जयिन्याः। सदारकस्य कारणाद् दूतसम्पातं करोति।

वासवदत्ता– (आत्मगतम्) भवतु भवतु। एषा चात्मीयेदानीं संवृत्ता।

तापसी– अर्हा खल्वियमाकृतिरस्य बहुमानस्य। उभे राजकुले महत्तरे इति श्रूयते।

पद्मावती– आर्य ! किं दृष्टो मुनिजन आत्मानुग्रहीतुम्? अभिप्रेतप्रदानेन तपस्विजन उपनिमन्त्र्यतां तावत् कः किमत्रेच्छतीति?

काञ्चुकीयः– यदभिप्रेतं भवत्या। भोः भोः ! आश्रमवासिनस्तपस्विनः। शृण्वन्तु–शृण्वन्तु भवन्तः। इहात्रभवती मगधराजपुत्री अनेन विश्रम्भेणोत्पादितविश्रम्भा धर्मार्थमर्थेनोपनिमन्त्रयते–

**कस्यार्थः कलशेन को मृगयते वासो यथा निश्चितं,**
**दीक्षा पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत्।**
**आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया,**
**यद् यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम् ॥ ६ ॥**

यौगन्धरायणः– (आत्मगतम्) हन्त! दृष्ट उपायः। (प्रकाशम्) भोः अहमर्थी।

पद्मावती– दिष्ट्या सफलं मे तपोवनाभिगमनम्।

तापसी– सन्तुष्टं तपस्विजनमिदमाश्रमपदम्। आगन्तुकेनानेन भवितव्यम्।

काञ्चुकीयः– भोः! किं क्रियताम्?

यौगन्धरायणः– इयं मे स्वसा। प्रोषितभर्तृकामिमामिच्छाम्यत्र भवत्या कञ्चित् कालं परिपाल्यमानाम्। कुतः–

**कार्यं नैवार्थैर्नापि भोगैर्न वस्त्रै–**
**र्नाहं काषायं वृत्तिहेतोः प्रपन्नः।**
**धीरा कन्येयं दृष्टधर्मप्रचारा,**
**शक्ता चारित्रं रक्षितुं मे भगिन्याः ॥ ७ ॥**

वासवदत्ता– (आत्मगतम्) हम्, इह मां निक्षेप्तुकामा आर्ययौगन्धरायणः। भवतु, अविचार्य क्रमं न करिष्यति।

काञ्चुकीयः– भवति! महती खल्वस्य व्यपाश्रयणा। कथं प्रतिजानीमः? कुतः–

**सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।**
**सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम् ॥ ८ ॥**

पद्मावती– आर्य! प्रथममुद्घोष्य कः किमिच्छतीत्युक्तमिदानीं विचारयितुम्। यदेष भणति, तदनुतिष्ठत्वार्यः।

काञ्चुकीयः– अनुरूपमेतद् भवत्याभिहितम्।

चेटी– चिरं जीवतु भर्तृदारिकैवं सत्यवादिनी।

तापसी– चिरं जीवतु भद्रे!

काञ्चुकीयः– भवति! तथा। (उपगम्य) भोः! अभ्युपगतमत्रभवतो भगिन्याः परिपालनमत्रभवत्या।

यौगन्धरायणः– अनुगृहीतोऽस्मि तत्रभवत्या। वत्से! उपसर्पात्रभवतीम्।

## कठिन-शब्दार्थाः

| | | |
|---|---|---|
| आश्रमसंश्रितस्य | – | आश्रमं संश्रितस्य (द्वि.त.); तपोवनालम्बितस्य; आश्रम में स्थित (आश्रित)। |
| वसतः | – | वस्+शतृ+ षष्ठी (ए.व.); निवसतः, वासं कुर्वतः; निवास करते हुए। |
| उत्सिक्तः | – | उद्धतः, गर्वयुक्तः; उद्धत, अभिमानी। |
| विनयादपेतपुरुषः | – | विनयरहितः जनः, नम्रताशून्यमानवः; विनय (नम्रता) से रहित व्यक्ति। |
| निभृतम् | – | नि+भृ+क्त (नपुं. प्रथमा वि., एकवचन); शान्तम्; शान्त। |
| ग्रामीकरोति | – | अग्रामं ग्रामं करोति, ग्राम+च्वि+कृ+ लट्लकारः (प्र.पु., ए.व.); ग्रामरूपतां नयति; गाँव/नगर की तरह अशान्त बना रहा है। |

| | | |
|---|---|---|
| उत्सारयति | – | उत्+सृ(णिच्) लट्लकारे, प्र.पु., ए.व.; दूरीकरोति; हटा रहा है, दूर करता है। |
| भुक्तोज्झितः | – | पूर्वं भुक्तः पश्चाद् उज्झितः (कर्मधारय समासः), भुज् +क्त= भुक्त, उत्+हि(हा)+क्त= उज्झित; भुक्त्वा त्यक्तः; भोगकर छोड़ दिया है। |
| चक्रारपङ्क्तिः | – | चक्रस्य अराणि चक्राराणि, तेषां पङ्क्तिः चक्रारपङ्क्तिः (ष.त.); रथाङ्गदण्डश्रेणिः; रथ के पहिए के अरे। |
| तीर्थोदकानि | – | तीर्थानाम् उदकानि (ष.त.); पवित्रतीर्थजलानि; तीर्थों का जल। |
| समिधः | – | हवनीय-काष्ठानि; हवन के लिए सूखी लकड़ियाँ। |
| स्वैरम् | – | यथेच्छम्, इच्छानुसारम्, स्वतन्त्रतापूर्वकम्; अपनी इच्छा के अनुसार। |
| आदिष्टा | – | आ+दिश्+क्त+टाप् (स्त्रीत्वे); सूचिता, कथिता, उक्ता, आज्ञापिता, ज्ञापिता, आदेशिता; आदेशित, सूचित। |
| बहुमानः | – | बहुश्चासौ मानः बहुमानः (कर्मधा.स.); अत्यादरः; अत्यधिक आदर। |
| प्रद्वेषः | – | प्रकृष्टः द्वेषः (कर्मधा.स.); द्वेषातिशयः; अत्यधिक द्वेष। |
| अभिप्रेतप्रदानेन | – | अभिप्रेतस्य प्रदानेन (ष.त.स.); अभीष्टदानेन; इच्छित वस्तु को देने से। |
| विश्रम्भेण | – | विश्वासेन; विश्वास से। |
| उत्पादितविश्रम्भा | – | जनितविश्वासा; विश्वस्त होकर। |
| दीयताम् | – | दा+लोट्लकारे (कर्मवाच्ये आत्मनेपदप्रयोगः); प्रदीयताम्, वितीर्यताम्; दी जाए। |
| स्वसा | – | भगिनी; बहिन। |
| प्रोषितभर्तृकाम् | – | प्रोषितः भर्ता यस्याः सा ताम् (बहु.स.); लक्षणम्- ''नानाकार्यवशाद् यस्याः, दूरदेशं गतः पतिः। सा मनोभवदुःखार्ता भवेत् प्रोषितभर्तृका।।''; अन्यत्रपतिकाम्; जिस स्त्री का पति दूर देश गया हो। |
| दृष्टधर्मप्रचारा | – | दृष्टः धर्मप्रचारः यस्याः सा (बहु.स.); विदितधर्मतत्त्वा; जिसके धर्मतत्त्व को देख गया ऐसी पद्मावती। |
| न्यासस्य | – | नि+अस्+घञ्; निक्षेपस्य; धरोहर की। |

**अन्वयः-**

१. धीरस्य आश्रमसंश्रितस्य वसतः वन्यैः फलैः तुष्टस्य वल्कलवतः मानार्हस्य जनस्य त्रासः समुत्पाद्यते। भोः! उत्सिक्तः विनयाद् अपेतपुरुषः चलैः भाग्यैः विस्मितः अयं कः इदं निभृतं तपोवनम् आज्ञया ग्रामीकरोति।

२. पूर्वं त्वया अपि एवं गतम् अभिमतम् आसीत्। भर्तुः विजयेन पुनः श्लाघ्यं गमिष्यसि। कालक्रमेण परिवर्तमाना जगतः भाग्यपंक्तिः चक्रारपंक्तिः इव गच्छति।

३. भवान् नृपापवादं परिहरतु, आश्रमवासिषु परुषं न प्रयोज्यम्। एते मनस्विनः नगरपरिभवान् विमोक्तुं वनम् अभिगम्य वसन्ति।

४. (भवन्तः) तपोधनानि तीर्थोदकानि समिधः कुसुमानि दर्भान् वनाद् उपनयन्तु। हि धर्मप्रियाः

नृपसुता तपस्विषु धर्मपीडाम् न इच्छेत्। एतत् अस्याः कुलव्रतम् अस्ति।

५. प्रद्वेषः बहुमानो वा सङ्कल्पात् उपजायते। भर्तृदाराभिलाषित्वात् मे अस्यां महती स्वता अस्ति।

६. कस्य कलशेन अर्थः, कः यथानिश्चितं वासः मृगयते, कः दीक्षां पारितवान्, पुनः गुरोः यद् देयं भवेत्, किम् इच्छति। इह धर्माभिरामप्रिया नृपजा आत्मानुग्रहम् इच्छति। यस्य यत् समीप्सितं भवति, तद् वदतु। अद्य अस्य किं दीयताम्?

७. मम अर्थैः कार्यं नैव, नापि भोगैः, न वस्त्रैः (कार्यमस्ति)। अहं वृत्तिहेतोः काषायं न प्रपन्नः। दृष्टधर्मप्रचारा धीरा इयं कन्या मे भगिन्याः चारित्रं रक्षितुं शक्ता।

८. अर्थः सुखं दातुं भवेत्, प्राणाः सुखं दातुं (भवेयुः), तपः सुखं दातुं भवेत्, अन्यत् सर्वं सुखं दातुं भवेत् (किन्तु) न्यासस्य रक्षणं दुःखं भवेत्।

## अभ्यासः

**१. अतिलघूत्तरात्मकप्रश्नाः –**

(क) कानि दैवतानि अपि अवधूयन्ते?
(ख) चक्रारपङ्क्तिः इव का गच्छति?
(ग) पद्मावती कस्य भगिनी अस्ति?
(घ) कुत्र परुषं न प्रयोज्यम्?
(ङ) कीदृशी पद्मावती धर्मपीडां न इच्छेत्?
(च) तपोवनानि कस्य स्वकं गेहम्?
(छ) पद्मावतीं दृष्ट्वा वासवदत्तायाः मनसि कीदृशः स्नेहः सम्पद्यते?
(ज) कस्मात् कारणात् यौगन्धरायणस्य पद्मावत्यां महती स्वता जाता?
(झ) वासवदत्तामतेन कः अविचार्य क्रमं न करिष्यति?
(ञ) किं नाम महद् दुखं (कष्टकरम्/कठिनम्)?

**२. लघूत्तरात्मकप्रश्नाः –**

(क) सैनिकाः आश्रमस्थान् जनान् किमर्थम् उत्सारयन्ति स्म?
(ख) काञ्चुकीयः पद्मावत्याः आगमनस्य किं प्रयोजनम् उक्तवान्?
(ग) सङ्कल्पात् कानि उपजायन्ते?
(घ) पद्मावती यौगन्धरायणस्य भगिन्याः (वासवदत्तायाः) चारित्रं रक्षितुं कथं समर्था?
(ङ) किं किं दातुं सुखं भवति?

**३. हिन्दीभाषायाम् आशयं लिखत–**

(क) सविज्ञानमस्य दर्शनम्।
(ख) सदारकस्य कारणाद् दूतसम्पातं करोति।
(ग) आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया।
(घ) कार्यं नैवार्थैर्नापि भोगैर्न वस्त्रैर्नाहं काषायं वृत्तिहेतोः प्रपन्नः।

(ङ)　सुखमन्यद् भवेत्सर्वं दु:खं न्यासस्य रक्षणम्।

**४. श्लोकानां पादपूर्तिं कुरुत-**

(क)　कोऽयं भो ! निभृतं तपोवनमिदं........................................।

(ख)　यद् यस्यास्ति समीप्सितं वदतु तत्........................................।

(ग)　धीरा कन्येयं दृष्टधर्मप्रचारा........................................।

(घ)　धर्मप्रिया नृपसुता नहि धर्मपीडाम्........................................।

(ग)　कालक्रमेण जगत: परिवर्तमाना........................................।

**५. अस्मिन् नाट्यांशे कानिचन पात्राणि सन्ति। पात्रस्य परिचयेन सह समुचितं मेलनं कुरुत-**

| | | |
|---|---|---|
| (क) | यौगन्धरायण: | वृद्धा स्त्री |
| (ख) | वासवदत्ता | पद्मावत्या: परिचारिका |
| (ग) | पद्मावती | अन्त:पुरस्य सेवक: |
| (घ) | चेटी | अवन्तिकावेषधारिणी |
| (ङ) | काञ्चुकीय: | महाराजदर्शकस्य भगिनी |
| (च) | तापसी | उदयनस्य प्रधानमन्त्री |

**६.　निम्नलिखितपदानि अधिकृत्य वाक्यनिर्माणं कुरुत-**

तपोवनम् – ........................................................................................................

उत्सारयति – ........................................................................................................

अपरिचयात् – ........................................................................................................

महती – ........................................................................................................

श्रूयते – ........................................................................................................

बहुमानस्य – ........................................................................................................

क्रियताम् – ........................................................................................................

भवितव्यम् – ........................................................................................................

न्यासस्य – ........................................................................................................

भगिन्या: – ........................................................................................................

**व्याकरणात्मका: प्रश्ना:**

**७. सन्धिं सन्धिविच्छेदं वा कुरुत-**

(क)　मानार्हस्य　–　........................................

(ख)　भोगै: + न　–　........................................

(ग)　इच्छाम्यत्र　–　........................................

(घ)　को मृगयते　–　........................................

(ङ)　खलु + अस्या:　–　........................................

(च)　वागपि　–　........................................

(छ) तीर्थोदकानि - ........................................

**८. अधोलिखितपदानां धातु-लकार-पुरुष-वचनादीनां निर्देशनं कुरुत-**

| पदम् | धातुः | लकारः | पुरुषः | वचनम् |
| --- | --- | --- | --- | --- |
| १. उत्सरत | ............. | ............ | ............ | ............ |
| २. उत्सार्यते | ............. | ............ | ............ | ............ |
| ३. उपसर्पावः | ............. | ............ | ............ | ............ |
| ४. यास्यति | ............. | ............ | ............ | ............ |
| ५. क्रियताम् | ............. | ............ | ............ | ............ |
| ६. भणति | ............. | ............ | ............ | ............ |
| ७. अनुतिष्ठत | ............. | ............ | ............ | ............ |
| ८. भवेत् | ............. | ............ | ............ | ............ |

**९. अधोलिखितपदानां मूलशब्द-विभक्ति-लिङ्ग-वचनादीनां निर्देशं कुरुत-**

| पदम् | मूलशब्दः | लिङ्गम् | विभक्तिः | वचनम् |
| --- | --- | --- | --- | --- |
| १. संश्रितस्य | ............. | ............ | ............ | ............ |
| २. जगतः | ............. | ............ | ............ | ............ |
| ३. स्वामिनः | ............. | ............ | ............ | ............ |
| ४. दृष्टः | ............. | ............ | ............ | ............ |
| ५. न्यासस्य | ............. | ............ | ............ | ............ |
| ६. सत्यवादिनी | ............. | ............ | ............ | ............ |
| ७. तपस्विषु | ............. | ............ | ............ | ............ |

## नवमः पाठः

# विदुरनीतिसुधा

**पाठ-परिचयः –**

अयं पाठः महाभारतस्य उद्योगपर्वणः चतुस्त्रिंशद् अध्यायाद् उद्धृतः। अयं अध्यायः विदुरनीतिः इत्येवं रूपेण प्रसिद्धः। महाभारते पुरुषार्थचतुष्टयानां धर्मार्थकाममोक्षाणां विषयाः सुनिबद्धाः। अत एव महाभारतविषये कथितं वर्तते –

धर्मे चाऽर्थे च कामे च मोक्षे भरतवर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्।।

महात्मा विदुरः विद्वान्, नीतिमान्, सज्जनः, भगवद्भक्तश्च आसीत्। महाभारते द्यूतक्रीडया पाण्डवाः पराजिताः। प्रतिज्ञानुसारेण च वनं प्रेषिता। तदनन्तरं यदा धृतराष्ट्रः दुश्चिन्तायां ग्रस्तः तदा महात्मानं विदुरं आहूय स्वस्य मनस्तापस्य शान्त्यर्थं उपायं पृच्छति स्म। तत्समये महात्मना विदुरेण धर्मस्य नीतेः च तदुपदेशो प्रदत्तः। सैव विदुरनीतिनाम्ना प्रसिद्धः।

अस्मिन् पाठे संकलितैः श्लोकैः मानव-जीवने कर्तव्याकर्तव्यस्य, नीतेः, सदाचारस्य च शिक्षा प्रदीयते। मानवः विषमपरिस्थित्याम् अपि कथं स्वविवेकस्य रक्षां कृत्वा व्यवहरणीयं व्यवहारं कुर्यात् इत्यत्र स्पष्टीकृतम्।

तथैव योगविहितं यत्तु कर्म न सिध्यति।
उपाय-युक्तं मेधावी न तत्र ग्लपयेन् मनः।।1

अनुबन्धं च सम्प्रेक्ष्य विपाकं चैव कर्मणाम्।
उत्थानमात्मनश्चैव धीरः कुर्वीत वा न वा।।2

वनस्पतेरपक्वानि फलानि प्रचिनोति यः।
स नाप्नोति रसं तेभ्यो बीजं चास्य विनश्यति।।3

यस्तु पक्वमुपादत्ते काले परिणतं फलम्।
फलाद् रसं च लभते बीजाच्चैव फलं पुनः।।4

किन्नु मे स्यादिदं कृत्वा किन्नु मे स्यादकुर्वतः।
इति कर्माणि संचिन्त्य कुर्याद् वा पुरुषो न वा।।5

सुव्याहृतानि सूक्तानि सुकृतानि ततस्ततः।
सचिन्वन् धीर आसीत् शिलाहारी शिलं यथा।।6

यदतप्तं प्रणमति न तत् संतापयन्त्यपि।
यच्च स्वयं नतं दारु न तत् संनमयन्त्यपि।।7

सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते।।8

न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः।
अन्त्येष्वपि हि जातानां वृत्तमेव विशिष्यते।।9

अकार्य-करणाद् भीतः कार्याणां च विवर्जनात्।
अकाले मन्त्रभेदाच्च येन माद्येन्न तत् पिबेत्।।10

जिता सभा वस्त्रवता मिष्टाशा गोमता जिता।
अध्वा जितो यानवता सर्वं शीलवता जितम्।।11

शीलं प्रधानं पुरुषे तद यस्येह प्रणश्यति।
न तस्य जीवितेनार्थो न घनेन न बन्धुभिः।।12

सम्पन्नतरमेवान्नं दरिद्रा भुंजते सदा।
क्षुत् स्वादुतां जनयति सा चाढ्येषु सुदुर्लभा।।13

रथं शरीरं पुरूषस्य राजन्नात्मा नियतेन्द्रियाण्यस्य चाश्वा।
तैरप्रमत्तः कुशली सदश्वैर्दान्तैः सुखं याति रथीव धीरः।।14

आत्मनात्मानन्विच्छेन मनो-बुद्धीन्द्रियैर्यतैः।
आत्मा ह्येवात्मनो बन्धुरात्मैव रिपुरात्मनः।।15

समवेक्ष्येह धर्मार्थौ सम्भारान् योऽधिगच्छति।
स वै सम्भृतसम्भारः सततं सुखमेधते।।16

आक्रोश-परिवादाभ्यां विहिंसन्त्यबुधा बुधान्।
वक्ता पापमुपादत्ते क्षममाणो विमुच्यते।।17

अभ्यावहति कल्याणं विविधं वाक् सुभाषिता।
सैव दुर्भाषिता राजन्नर्थायोपपद्यते।।18

**अन्वयः –**

१. तथा एव यत् उपाययुक्तं योगविहितं कर्म तु न सिध्यति, तत्र मेधावी मनः न ग्लपयेत्।

२. धीरः कर्मणाम् अनुबन्धं विपाकं चैव आत्मनः उत्थानं चैव सम्प्रेक्ष्य कुर्वीत वा न वा (कुर्वीत)।

३. यः वनस्पतेः अपक्वानि फलानि प्रचिनोति, सः तेभ्यः रसं न आप्नोति। अस्य बीजं च विनश्यति।

४. यः तु काले परिणतं पक्वं फलम् उपादत्ते, सः फलात् रसं लभते बीजात् च एव पुनः फलं (लभते)।

५. इदं कृत्वा मे किम् नु स्यात्, अकुर्वतः मे किं नु स्यात्, इति पुरुषः संचिन्त्य कर्माणि कुर्यात् वा न वा (कुर्यात्)

६. यथा शिलाहारी शिलं (संचिन्वन् आस्ते तथा) धीरः ततस्ततः सुव्याहृतानि सूक्तानि सुकृतानि (च) संचिन्वन् आसीत।

७. यत् (धातुः) अतप्तं प्रणमति तत् न अपि संतापयन्ति। यत् च दारु स्वयं नतं तत् न अपि संनमयन्ति।

८. धर्मः सत्येन रक्ष्यते। विद्या योगेन रक्ष्यते। रूपं मृजया रक्ष्यते। कुलं च वृत्तेन रक्ष्यते।

९. वृत्तहीनस्य कुलं न प्रमाणम् इति मे मतिः। अन्त्येषु अपि जातानां हि वृत्तम् एव विशिष्यते।

१०. अकार्य-करणात् कार्याणां विवर्जनात् च अकाले मन्त्रभेदात् च भीतः (सन्) येन माद्येत् तत् न पिबेत्।

११. वस्त्रवता सभा जिता। गोमता मिष्टाशा जिता। यानवता अध्वा जितः। शीलवता तु सर्वं जितम्।

१२. पुरुषे शीलं प्रधानम्। तत् यस्य इह प्रणश्यति, तस्य न जीवितेन, न धनेन, न बन्धुभिः अर्थः।

१३. दरिद्राः सदा सम्पन्नतरम् अन्नम् एव भुंजते। (हि) क्षुत् स्वादुतां जनयति। सा च आढ्येषु सुदुर्लभा।

१४. राजन् । पुरूषस्य शरीरं रथः। आत्मा नियन्ता। इन्द्रियाणि च अस्य अश्वाः तैः सदश्वैः दान्तैः अप्रमत्तः कुशली धीरः रथी इव सुखं याति।

१५. यतैः मनोबुद्धीन्द्रियैः आत्मना आत्मानम् अन्विच्छेत्। हि आत्मा एव आत्मा बन्धुः, आत्मा एव आत्मनः रिपुः।

१६. यः इह धर्मार्थौ समवेक्ष्य सम्भारान् अधिगच्छति, सः वै सम्भृतसम्भारः (सन्) सततं सुखम् एधते।

१७. अबुधाः आक्रोश-परिवादाभ्याम् बुधान् विहिंसन्ति। वक्ता पापम् उपादत्ते क्षममाणः च विमुच्यते।

१८. राजन्। सुभाषिता वाक् विविधं कल्याणं अभ्यावहति। सा एव दुर्भाषिता (सती) अनर्थाय उपपद्यते।

**कठिन शब्दार्थाः –**

| | |
|---|---|
| मेधावी | = बुद्धिमान् |
| ग्लपयेत | = ग्लानिं न कुर्यात् |
| अनुबन्धम् | = प्रयोजनम् |
| सम्प्रेक्ष्य | = सम्यक् दृष्ट्वा |
| विपाकम् | = परिणामम् |
| सुव्याहृतानि | = सम्यक् कथितानि |
| शिलाहारी | = शिलोञ्छवृत्तिजीवी |
| मृजया | = मार्जनेन |
| अन्त्येष्वपि | = निम्नकुलेषु |
| अध्वा | = मार्गः |
| आढ्येषु | = धनिषु |

| | |
|---|---|
| क्षुत् | = क्षुधा |
| रथीव | = सारथीव |
| समवेक्ष्य | = सम्यक् रूपेण दृष्ट्वा (विचार्य) |
| सम्भारान् | = सामग्रीं (आवश्यक वस्तुएं) |
| अभ्यावहति | = प्रदानं करोति |

**वस्तुनिष्ठ प्रश्नाः –**

1. यः पक्वं फलं चिनोति सः किं प्राप्नोति ?

   (अ) रसं बीजञ्च (ब) वृक्षं

   (स) कालं (द) रुग्णतां

2. विद्या केन रक्ष्यते –

   (अ) पुस्तकेन (ब) ज्ञानेन

   (स) योगेन (द) उपायेन

3. शीलवान् जनः कं जयति –

   (अ) मार्गं (ब) सभां

   (स) फलं (द) सर्वं

4. उत्तमम् अन्नं के खादन्ति –

   (अ) धनिकाः (ब) दरिद्राः

   (स) व्यवसायिनः (द) सुसम्पन्नाः

5. मनुष्यस्य इन्द्रियाणि कीदृशानि सन्ति –

   (अ) अश्वसदृशानि (ब) रथ सदृशानि

   (स) भूमिसदृशानि (द) पल्लवसदृशानि

**लघूत्तरात्मकप्रश्नाः –**

1. पुरुषेण कार्यारम्भे किं चिन्तनीयम् ?
2. सत्येन किं रक्ष्यते ?
3. जनस्य प्रमाणं किं वर्तते ?
4. कस्य करणेन कस्य च त्यजनेन भेतव्यम् ?
5. कस्य नाशेन जीवनस्य सार्थकत्वं नश्यति ?

**निबन्धात्मकप्रश्नाः –**

१. पाठमिमनुसृत्य मानवः व्यवहार–गुणान् वर्णयत।

२. विदुरनीति–ग्रन्थस्य परिचयो देयः।

**अधोलिखितानां पद्यानां सप्रसंगं व्याख्या कार्या –**

१. वनस्पतेरपक्वानि फलानि प्रचिनोति यः।
   स नाप्नोति रसं तेभ्यो बीजं चास्य विनश्यति।।

२. सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।
   मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते।।

३. आत्मनात्मानमन्विच्छेन मनो-बुद्धीन्द्रियैर्यतैः।
आत्मा ह्येवात्मनो बन्धुरात्मैव रिपुरात्मनः।।

**अधोलिखिते श्लोके छन्दो निर्देशं कृत्वा, लक्षणेन संगमयत।**

१. यदतप्तं प्रणमति न तत् संतापयन्त्यपि।
यच्च स्वयं नतं दारु न तत् संनमयन्त्यपि।।

## व्याकरणात्मकप्रश्नाः

**6. अधोलिखितेषु पदेषु धातु-लकार-पुरुष-वचनानां निर्देशं कुरुत -**

| | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| 1. सिध्यति | .......... | .......... | .......... | .......... |
| 2. कुर्वीत | .......... | .......... | .......... | .......... |
| 3. कुर्याद् | .......... | .......... | .......... | .......... |
| 4. प्रणयति | .......... | .......... | .......... | .......... |
| 5. विमुच्यते | .......... | .......... | .......... | .......... |

**7. अधोलिखितेषु पदेषु शब्द विभक्ति वचन-लिङ्ग-वचनानां निर्देशं कुरुत -**

| | शब्दः | विभक्तिः | लिङ्गम् | वचनम् |
|---|---|---|---|---|
| 1. धीरः | ................ | ................ | ................ | ................ |
| 2. मनः | ................ | ................ | ................ | ................ |
| 3. कर्माणि | ................ | ................ | ................ | ................ |
| 4. आद्येषु | ................ | ................ | ................ | ................ |
| 5. आत्मनः | ................ | ................ | ................ | ................ |

**8. अधोलिखितेषु पदेषु उपसर्ग, धातु-प्रत्ययानां निर्देशं कुरुत -**

| | उपसर्ग | धातु | प्रत्यय |
|---|---|---|---|
| 1. सम्प्रेक्ष्य | .......... | .......... | .......... |
| 2. सुव्याहृतानि | .......... | .......... | .......... |
| 3. विपाकम् | .......... | .......... | .......... |
| 4. उत्थानम् | .......... | .......... | .......... |
| 5. परिणतम् | .......... | .......... | .......... |

**9. अधोलिखितानां शब्दानां संधि-विच्छेदं कृत्वा, सन्धिनाम निर्देशं कुरुत -**

| | संधि-विच्छेदः | संधिनाम |
|---|---|---|
| 1. चैव | ................. | .................... |
| 2. ततस्ततः | ................. | .................... |
| 3. संतापयन्त्यपि | ................. | .................... |
| 4. अन्तेष्वपि | ................. | .................... |
| 5. रिपुरात्मनः | ................. | .................... |

**10. अधोलिखितेषु पद्येषु समासविग्रहं कृत्वा समासस्य नाम-निर्देशं कुरुत –**

| | **समास-विग्रह** | **समास नाम** |
|---|---|---|
| 1. योगविहितम् | ................ | .................... |
| 2. शिलाहारी | ................ | .................... |
| 3. सुभाषिता | ................ | .................... |
| 4. धर्मार्थौ | ................ | .................... |
| 5. संभृतसम्भार: | ................ | .................... |

**11. अधोलिखितानि वाक्यानि शुद्धानि कर्तव्यानि –**

1. कर्म: संचिन्त्य मनुष्य: उपाययुक्त भवेत्।
2. सज्जना: सदैव हितकारी भवन्ति।
3. अन्यासं विद्या रक्ष्यते।
4. वृक्षं फलानि गृहयते।
5. सर्वं कल्याणं शोभना वाणी प्रयोक्तव्य:।

**12. अधोलिखितानां पदानां प्रयोगं कृत्वा वाक्यनिर्माणं कुरुत –**

1. परिणामम्
2. बुद्धिमान्
3. मार्जनेन
4. प्रयोजनम्
5. धनिषु

**13. अधोलिखिते श्लोके अलंकार निर्देशं कृत्वा लक्षणेन संगमयत।**

रथं शरीरं पुरुषस्य राजन्नात्मा नियतेन्द्रियाण्यस्य चाश्वा।
तैरप्रमत्त: कुशली सदश्वैर्दान्तै: सुखं याति रथीव धीर:।।

-----------

## दशमः पाठः

# अमूल्यं वस्तु

## (मंजुनाथग्रन्थावल्याम्)

### पाठ–परिचयः

इयं कथा देवर्षिश्रीकलानाथशास्त्रिणा डॉ. रमाकान्तपाण्डेयेन च सम्पादितस्य "भट्टश्रीमथुरानाथशास्त्रिमंजुनाथग्रन्थावलिः" इत्यस्य द्वितीयभागस्य प्रथमखण्डात् "उपन्यासाःकथाश्च" इत्यस्मात् गृहिता। अस्यां कथायां कविः मातृभूमेः महत्त्वं प्रतिपादयति। मातृभूमेः रजः महनीयम् अमूल्यतरं भवति। तस्याग्रे बहूनि अमूल्यानि बहुमूल्यानि वस्तून्यपि आदरं न प्राप्नुवन्ति। अतएव कथ्यते "जननी जन्मभूमिश्च स्वर्गादपि गरीयसी" इति।

भट्ट श्री मथुराशास्त्रिमहोदयस्य जन्म राजस्थानवासिनाम् उत्तरभारते निवसतामान्ध्राभिजनानां विद्वद्ब्राह्मणानां कुले जयपुरेऽभूत्। एषां शिक्षा जयपुरीये महाराजासंस्कृतमहाविद्यालये अभवत्। साहित्याचार्य परीक्षामुत्तीर्य महाराजासंस्कृतमहाविद्यालये प्राध्यापकपदे सेवामारब्धुमयं प्रोत्साहितो वयस्यैः। संस्कृतरत्नाकरादिमासिक पत्रेषु लेखकत्वेन सम्पादकत्वेन चास्य साहित्यसेवा तदानीं प्रसिद्धिं गताऽभूत्। प्रायः पंचसप्ततिवर्षात्मके समग्रेऽप्यायुषि भट्टश्रीमथुरानाथशास्त्रिणाऽविरतं संस्कृतसाहित्यसेवाव्रतं निरूढम्।

### कथा

कञ्चिद्देशमेको राजा प्रशास्ति स्म। नासीत्तस्यैकोऽपि पुत्रः, केवलमासीदेका कन्या। तां स पुत्रवदैषील्लोकं चावदद्यन्ममाऽन्तरमेषैव सिंहासनस्य शोभां वर्द्धयिष्यति। राजा तच्छिक्षायै विदुषो बुद्धिमतश्च पण्डितान्नियुक्तवान्। राजपुत्री तु स्वल्पकालेनैव स्वपरिश्रमेण सर्वविद्याम्पन्नाऽजनि। यावत्सा पञ्चदशवर्षायुरभवत्तावत्तत् परिणयार्थमन्यराजवंशेभ्यः संदेशा आगन्तुमारेभिरे।

राजा सम्बन्धस्य वार्तां वारं वारं पर्यहरत्। एकदा तस्य मन्त्रिणस्तं प्रार्थयन्त – "महाराज! राजकुमार्या विवाहसम्बन्धोऽधुना तु कुत्रचिन्निश्चितः कर्त्तव्यः"। राजाऽवदत् – "सम्यगुक्तम्। श्वो राजकुमार्या सह वार्तालापं करिष्ये"। अपरेद्युः राजा स्वकीय प्रधानमन्त्रिणामाज्ञापयद्यत् सम्प्रति देशदेशेषु घोष्यतां यद्राजकुमारी तमेव राजपुत्रं वरयिष्यति योऽमूल्यं वस्तु समानीयोपहरिष्यति।

इमां घोषणां श्रुत्वा दूरदूरदेशेभ्यो राजपुत्रा एकैकशो बहुमूल्यानि वस्तून्यादायोपस्थितानि कर्तुं प्रारप्सत। कश्चिद् बहुमूल्येन वृहद्धीरकेणाऽगच्छदन्योऽन्योऽद्वितीयं कृपाणमादायोपस्थितोऽभूत्। अपरस्तु महार्घ्यं चीनांशुकमानैषीदेवं बहवो राजपुत्रा अनेकानि वस्तून्यानैषुः। किन्तु राजकुमारी सा तानि दृष्ट्वा "नैतानि ममाभिरुचितानि" इत्युक्त्वा प्रतिददाति स्म।

एवं स्वल्पकाले गच्छति राजस्थानस्यैको राजपुत्र आगच्छत्। तस्य कापि शोभासामग्री नासीत्। स एक एवाश्वमेकमारूढः सन्नागमत्। आगत्यैव स स्वागमनसूचनामकारयत्। राजभृत्याश्च तमवदन् – "किं मुधा कष्टमनुभवति भवान्। महान्तोऽत्रागच्छन् प्रतिगताश्च। सा तु विक्षिप्तचित्ता जातेति प्रतीयते। न कस्यापि किंचिदपि शृणोति।" राजकुमारोऽ वदत् –"न काचित्क्षतिः, यूयं तु केवलं ममाऽगमनसूचनां तस्यै दत्त"।

राजकुमारी यथापूर्वं सूचिता। राजकुमारो बहिरश्वं बध्वा राजकुमार्याः सविधमुपस्थातुमन्तः पुरप्रासादास्य द्वारं प्राप्तः। बहिर्भवने त्वयमुपविवेश, अन्तस्तु जवनिकान्तरिता राजपुत्री व्यराजत। राजकुमार एकं हस्तवस्त्रं यस्यांचले किंचिद्बद्धमासीद्दास्यै दत्त्वा राजपुत्र्यै समर्पयेत्युवाच। दासी खण्डवस्त्रं गृहीत्वा तिरस्कारसूचकं हास्यं चकार। सोऽशुको राजकुमार्या हस्तं यावत्प्राप्नोति तावद्राजकुमार एवं कथयितुमारेभे–

"वर्षद्वयादारभ्याऽद्यावधि एषोऽहं जगति पर्यटन्नस्मि। अनेकानि वनानि, बहून् नदीन्, कतिचित्सागरान्, बहुतराश्च नदीः साभिलाषं व्यलोकयम्। बहून्यमूल्यानि वस्तून्यन्वैषयं च। किन्तु तान्यादाय यदा प्रत्यागच्छन्नासं तदा किं पश्यामि यदेक क्षुद्रराज्यमाक्रम्यन्ती पराक्रान्तस्यैकस्य भूपतेः सेना युद्धयमाना तिष्ठति। लघुराज्यस्य सैनिकाः बहु युयुधिरे किन्तु वराकास्ते विशालसेना सम्मुखे किं कुर्युः?तदैव क्षुद्रराज्याधिपतिः कैश्चित्सैनिकैः सह दुर्गद्वारमुद्घाट्य स्थितोऽभवत्। एवं सति दुर्गं प्रवेष्टुमाक्रमणकारिणोः राज्ञः सेना सरभसमग्रऽधावन्, महद् युद्धं चाभवत्। राजा स्वल्पसैनिकैः सह शत्रुसेनां नाशयन्नासीत्। आक्रमणकारिणो राज्ञः सेना बह्वीं हानिमनुभूयाऽप्यग्रे गन्तुं न शशाक। अकस्मात् कृपाणं चालयतो राज्ञो दुर्गस्य प्राङ्गणात्पादः प्राऽस्खलत्। यावत्स सावधानो भवति तावच्छत्रु– खड्गस्तस्य कण्ठोपरि पतितः,तत्क्षणमेव स वीरगतिं प्राप्तः। मया तु पौरुषस्य, साहसस्य, जन्मभूमिप्रेम्णश्चेदृशं निदर्शनं न कदापि पूर्वं दृष्टम्। परिपन्थिनो निर्ममुः। अहमपि राजार्थं द्वे अश्रुणी तत्रैव प्रावाहयम्। प्रत्यागमनकाले च जनन्याः सुपुत्रस्य भस्मीभूतशरीरस्य तस्यैव रक्तरञ्जितामिमां मृत्तिकां बध्वाऽऽगतोऽस्मि। मम बुद्ध्याऽस्माच्छ्रेष्ठतरं किंचिदपि वस्तु जगति न भवितुं शक्नोति।

राजकुमारी सर्वाःवार्ताः श्रुत्वा स्वपितरमाजुहाव अवदच्च– यदि भवन्त उचितं मन्यन्ते तर्हि राजपुत्रेणानेन सह मत्सम्बन्धो विधीयताम्। यतो मे मतावयं वीरोऽस्ति। वीरत्वस्य मूल्यं जानाति। प्राणव्ययेनापि चासौ भवतां देशं सिंहासनं चाऽभिरक्षेत्।"

राजापि राजपुत्र्याः कथनेनाऽनुमतोऽभवत्। राजकुमार्या विवाहं तेन राजकुमारेण सह चकार। राजकुमारस्तत्रैव राज्यस्याधिपतिर्भूत्वा न्यवसत्।

जन्मभूमेश्च धर्मस्य यशसश्चाभिरक्षणे।
ये प्राणानां बलिं प्रादुस्तेभ्यः किं मूल्यवत्तरम्।।

कठिन–शब्दार्थाः

परिणयार्थम् – विवाहार्थम् (विवाह के लिये)। महार्घ्यम् – बहुमूल्यम्। महान्तः – महानुभावाः। राजभृत्याः – राजसेवकाः। सरभसम् – शीघ्रम्।

## अभ्यासः

लघूत्तरात्मकप्रश्नाः

प्र01. अधोलिखितानां प्रश्नानां उत्तरं लिखत –

(क) राजकुमार्याः विवाहसम्बन्धे राजानं के प्रार्थयन्ति ?
(ख) बहुमूल्यानि वस्तूनि कां न अभिरुचितानि ?
(ग) राजकुमारः कति वर्षादारभ्य जगति पर्यटनं करोति ?
(घ) क्षुद्रराज्याधिपतिः कस्य प्रहारेण वीरगतिं प्राप्तः ?
(ड.) वीरत्वस्य मूल्यं कः जानाति स्म ?

निबन्धात्मकप्रश्नाः

प्र02. अधोलिखितानां गद्याशानां हिन्दी भाषायाम् अनुवादं कुरुत –

(क) कंचितद्देशेको ........................................ समानीयोपहरिष्यति।

(ख) इमां घोषणां श्रुत्वा ........................................ सूचनां तस्यै दत्त।
(ग) वर्षद्वयादारभ्य .................................... युद्धं चाभवत्।
(घ) राजा स्वल्पसैनिकैः सह .................................. भवितुं शक्नोति।

प्र03. कथायाः सारं प्रतिपादयत।
प्र04. राजकुमारीमाश्रित्य एकस्याः लघुकथायाः रचनां कुरुत।

व्याकरणप्रश्नाः

प्र05. (क) अधोलिखितानां पदानां सन्धि–विच्छेदं कृत्वा सन्धिनामनिर्देशं कुरुत –

| | | |
|---|---|---|
| (1) परिणयार्थम् | (2) राजाऽवदत् | (3) योऽमूल्यम् |
| (4) बहून्यमूल्यानि | (5) साभिलाषम् | (6) एकैकशो |

(ख) अधोलिखितेषु पदेषु सन्धिं कुरुत् –

| | | |
|---|---|---|
| (1) न + आसीत् | (2) तत् + शिक्षायै | (3) कुत्रचिद्+निश्चितः |
| (4) वस्तूनि+आदाय | (5) आगत्य+एव | (6) बहिः+भवने |

(ग) अधोलिखितेषु पदेषु मूलधातु–लकार–पुरुष–वचनानां निर्देशं कुरुत –

| | मूलधातु | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (1) वर्द्धयिष्यति | | | | |
| (2) ददाति | | | | |
| (3) आगच्छत् | | | | |
| (4) शृणोति | | | | |
| (5) चकार | | | | |
| (6) शक्नोति | | | | |
| (7) जानाति | | | | |
| (8) रक्षेत् | | | | |

(घ) अधोलिखितेषु पदेषु मूलशब्द–विभक्ति–लिङ्ग–वचनानां निर्देशं कुरुत–

| | मूलशब्दः | विभक्तिः | लिङ्गम् | वचनम् |
|---|---|---|---|---|
| (1) विदुषः | | | | |
| (2) परिश्रमेण | | | | |
| (3) राजकुमार्या | | | | |
| (4) तस्यै | | | | |
| (5) जगति | | | | |
| (6) भूपतेः | | | | |
| (7) भवन्तः | | | | |
| (8) मम | | | | |

(ङ) अधोलिखितेषु पदेषु प्रकृतेः प्रत्ययस्य च निर्देशं कुरुत –

| | प्रकृतिः | प्रत्ययः |
|---|---|---|
| (1) कर्तुम् | | |

(2) निश्चितः
(3) समानीय
(4) श्रुत्वा
(5) प्राप्तः
(6) महद्
(7) भवितुम्
(8) आसनम्

(च) अधोलिखितानां पदानां समासविग्रहं कृत्वा समासस्य नामनिर्देशं कुरुत –

समासविग्रहः समासस्य नाम

(1) राजवंशः
(2) प्रधानमन्त्रिणाम्
(3) हस्तवस्त्रम्
(4) वीरगतिम्
(5) राज्याधिपतिः
(6) राजपुत्रेण

(छ) कथामध्ये ये उपसर्गप्रत्यययुक्तपदानि आगच्छन्, तेषामनुरूपं अन्यानि उदाहरणानि लिखत।

उत्तरमाला

प्रश्नः 1 (क) मन्त्रिणः (ख) राजकुमारीम् (ग) वर्षद्वयाद् (घ) खड्गस्य (ङ) राजपुत्रः

# एकादषः पाठः

## नीत्युपदेषाः

### (नीतिषतकात्)

पाठ–परिचयः

अयं पाठः "नीतिशतकात्" संगृहीतः। नीतिशतकग्रन्थस्य लेखकः महाकविः भर्तृहरिः विद्यते। संस्कृतसाहित्ये अयं कविः विशिष्टं पदमलङ्करोति। जनश्रुत्यानुसारेण भतृहरिः विक्रमादित्यस्य ज्येष्ठः भ्राता आसीत्, यः 644 खीष्टाब्दे कहरूट युद्धे हूणान् पराजितवान्। तदनुसारं भर्तृहरेः कालोऽपि अस्मिन्नेव समये निश्चितः विद्वद्भिः।

भर्तृहरिः न केवलं कविरासीत् परन्तु महान् विद्वानपि आसीत्। तस्य शतकत्रयं जगति प्रसिद्धं खलु– नीतिशतकम्–वैराग्यशतकम्–शृंगारशतकम् च। नीतिशतके नीति–रीति–सदाचार–पद्धति–धैर्य–शौर्य–साहस– उदारता–परोपकारादीनां सदुपदेशैः युक्तानि पद्यानि सुललितायां मधुरायां च भाषायां विराजन्ते।

वैराग्यशतके वैराग्यवर्धकानि पद्यानि विलसन्ति। तत्र भोगविलासादीनाम्, इन्द्रियसुखानां नश्वरता दर्शिता। छल–कपटयुक्तस्य संसारस्य च क्षणभंगुरता साधिता।

शृंगारशतके श्रृंगाररसेन सम्बद्धानि पद्यानि विद्यन्ते।

भर्तृहरेः शैली प्रसादगुणयुक्ता, भाषा च सरला सरसा परिष्कृता चास्ति। प्रायेण अयं कविः वैदर्भी–शैलीमेव अनुसृतवान्।

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः<br>
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः।<br>
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते<br>
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।।

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो<br>
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्यये।<br>
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता<br>
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम्।।

जाड्यं धियो हरति सिंचति वाचि सत्यं<br>
मानोन्नतिं दिशति पापमपाकरोति।

चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गति कथय किं न करोति पुंसाम्।।

वहति भुवनश्रेणिं शेषः फणाफलकस्थितां
कमठपतिना मध्येपृष्ठं सदा च धार्यते।
तमपि कुरुते क्रोडाधीनं पयोधिरनादरा–
दहह! महतां निःसीमानश्चरित्रविभूतयः।।

सन्तप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते।
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते।।

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम्।।

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयी भुजयोर्वीर्यमतुलम्।
हृदि स्वच्छावृत्तिः श्रुतमधिगतं च श्रवणयो–
र्विनाऽप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम्।।

श्रोतं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन।
विभाति कायः करुणापराणां
परोपकारैर्न तु चन्दनेन।।

पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकासयति कैरवचक्रवालम्।

नाऽभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहितेषु कृताभियोगाः।।

अन्वयः

पद्य 1 – केयूराणि पुरुषं न भूषयन्ति, चन्द्रोज्ज्वलाः हाराः न, स्नानं न, विलेपनं न, कुसुमं न, अलङ्कृता मूर्धजाः न (भूषयन्ति)। एका वाणी पुरुषं समलङ्करोति या संस्कृता धार्यते। भूषणानि क्षीयन्ते खलु, वाग्भूषणं सततं भूषणम् (भवति)।

पद्य 2 – ऐश्वर्यस्य सुजनता विभूषणम्, शौर्यस्य वाक्संयमः (विभूषणम्), ज्ञानस्य उपशमः, श्रुतस्य विनयः, वित्तस्य पात्रेव्ययः, तपसः अक्रोधः, प्रभवितुः क्षमा, धर्मस्य निर्व्याजता (विभूषणम्), सर्वकारणम् इदं शीलं सर्वेषाम् अपि परं भूषणम्।

पद्य 3 – सत्सङ्गति पुंसां धियः जाड्यं हरति, वाचि सत्यं सिंचति, मानोन्नतिं दिशति, पापम् अपाकरोति, चेतः प्रसादयति, दिक्षु कीर्तिं तनोति। तत् कथय (सत्सङ्गति पुंसां) किं न करोति?

पद्य 4 – शेषः फणाफलकस्थितां भुवनश्रेणिं वहति, स च कमठपतिना सदा मध्येपृष्ठं धार्यते, तम् अपि पयोधिः अनादरात् क्रोडाधीनं कुरुते। अहह! महतां चरित्रविभूतयः निःसीमानः (भवन्ति)।

पद्य 5 – मनसि वचसि काये (च) पुण्यपीयूषपूर्णाः, उपकारश्रेणिभिः त्रिभुवनं प्रीणययन्तः, परगुणपरमाणून् पर्वतीकृत्य निजहृदि नित्यं विकसन्तः सन्तः कियन्तः सन्ति?

पद्य 6 – सन्ततप्तायसि संस्थितस्य पयसः नाम अपि न ज्ञायते, तदेव नलिनीपत्रस्थितं (सत्) मुक्ताकारतया राजते, तत् स्वात्यां सागरशुक्तिमध्यपतितं (सत्) मौक्तिकं जायते, (हि) प्रायेण अधममध्यमोत्तमगुणः संसर्गतो जायते।

पद्य 7 – विपदि धैर्यम्, अथ अभ्युदये क्षमा, सदसि वाक्पटुता, युधि विक्रमः, यशसि च अभिरुचि, श्रुतौ व्यसनम्, इदं हि महात्मनां प्रकृतिसिद्धम्।

पद्य 8 – करे श्लाघ्यः त्यागः, शिरसि गुरुपादप्रणयिता, मुखे सत्या वाणी, भुजयोः विजयि अतुलं वीर्यम्, हृदि स्वच्छा वृत्तिः, श्रवणयोः च अधिगतं श्रुतम्, इदम् प्रकृतिमहताम् ऐश्वर्येण विना अपि मण्डनम्।

पद्य 9 – श्रोतं श्रुतेन एव विभाति, कुण्डलेन न, पाणिः दानेन (विभाति), तु कङ्कणेन न, करुणापराणां कायः परोपकारैः (विभाति), तु चन्दनेन न (विभाति)।

पद्य 10 – न अभ्यर्थितः दिनकरः पद्माकरं विकचीकरोति, (नाभ्यर्थितः) चन्द्र कैरवचक्रवालं विकासयति, (नाभ्यर्थितः) जलधर अपि जलं ददाति, हि सन्तः स्वयं परहितेषु कृताभियोगाः (भवन्ति)।

कठिन–शब्दार्थाः

पद्य 1 – केयूराणि = बाहुभूषणानि (बाजूबन्द)। चन्द्रोज्ज्वलाः = इन्दुधवलाः। मूर्धजाः = केशाः (केश)। भूषणम् = अलङ्कारः (आभूषण)।

पद्य 2 – ऐश्वर्यस्य = प्रभुत्वस्य (समृद्धि का)। उपशमः = शान्तिः (शान्ति)। श्रुतस्य = शास्त्रश्रवणस्य (शास्त्र का)। प्रभवितुः = समर्थशालिनो जनस्य (समर्थ का)। निर्व्याजता = नि कपटता।

पद्य 3 – पुंसाम् = नराणाम् (पुरुषों के)। धियः = बुद्धेः (बुद्धि की)। अपाकरोति = दूरीकरोति (दूर करता है)। दिशति = सम्पादयति (देता है)। तनोति = विस्तारयति (फैलाता है)।

पद्य 4 – शेषः = शेषनागः। फणाफलकस्थिताम् = फणा एव फलकं तस्मिन् स्थिता, ताम् (फण रूपी फलको पर स्थित)। कमठपतिना = विष्णोरवतारभूतेन कच्छपाधिराजेन (कच्छपराज के द्वारा)। पयोधिः = समुद्रः। निःसीमानः = अपरिमिताः।

पद्य 5 – पुण्यपीयूषपूर्णा = सुकृतसुधापूरिताः (पुण्य रूपी अमृत से भरे हुए)। त्रिभुवनम् = लोकत्रयम् (तीनों लोकों को)। परगुणपरमाणून् = इतरेषां सूक्ष्मगुणान् (दूसरों के सूक्ष्म गुणों को)। विकसन्तः = हर्षं प्राप्नुवन्तः (हर्ष को प्राप्त होते हुए)। सन्तः = सत्पुरुषाः (सज्जन लोग)। कियन्तः = कति संख्याका (कितने)।

पद्य 6 – सन्ततप्तायसि = ज्वलिते लोहे (गर्म लोहे पर)। नलिनीपत्रस्थितम् = कमलिनीपत्रमध्यस्थितम् (कमल के पत्तों पर पड़ा हुआ। राजते = शोभते (सुशोभित होता है)। संसर्गतः = सम्पर्कवशात् ( संगति से)।

पद्य 7 – विपदि = आपत्तिकाले (आपत्ति आने पर)। सदसि = सभायाम् (सभा में)। अभिरुचिः = अभिलाषः (अभिलाषा)। श्रुतौ = वेदशास्त्राभ्यसने (शास्त्रज्ञान में)। व्यसनम् = आसक्तिः (प्रवृत्ति)। प्रकृतिसिद्धम् = स्वभावसिद्धम् (स्वभाव में सिद्ध)।

पद्य 8 – श्लाघ्यः = प्रशंसनीयः। अतुलम् = अद्वितीयम्। श्रुतम् = शास्त्र–ज्ञानम्। प्रकृतिमहताम् = निसर्गसज्जनानाम् (स्वभाव से महान्)।

पद्य 9 – श्रोत्रम् = कर्णः (कान)। श्रुतेन एव = वेदशास्त्रादिश्रवणेनैव (वेदशास्त्रादि सुनने से ही)। करुणापराणाम् = दयालुनां जनानाम्। विभाति = विराजते।

पद्य10 – न अभ्यर्थितः = अप्रार्थितः (बिना किसी के प्रार्थना किये हुए)। दिनकरः = सूर्यः। पद्माकरम् = कमलवनम्। विकचीकरोति = विकासयति। कैरवचक्रवालम् = कुमुदसमूहम्।

## अभ्यासः

वस्तुनिष्ठप्रश्नाः

प्रश्नः 1 (क) पुरुषं का समलङ्करोति?

(1) स्नानम् (2) केयूराणि

(3) वाणी (4) भूषणम्

(ख) श्रोत्रं केन विभाति?

(1) कुण्डलेन (2) कङ्कणेन

(3) परोपकारेण (4) श्रुतेन

(ग) सन्तताप्तायसि संस्थितस्य कस्य नामापि न ज्ञायते?

(1) पयसः (2) मौक्तिकस्य

(3) नलिन्याः (4) भूषणस्य

अतिलघूत्तरात्मकप्रश्नाः

प्रश्नः 2 अधोलिखितानां प्रश्नानां उत्तरं लिखत–

(क) कीदृशी वाणी पुरुषं समलङ्करोति?

(ख) परं भूषणं किम्?

(ग) का दिक्षुः कीर्तिं तनोति?

(घ) अधममध्यमोत्तमगुणाः कस्मात् जायते?

(ङ) महात्मनां व्यसनं कस्मिन् भवति?

लघूत्तरात्मकप्रश्नाः

प्रश्नः 3 निम्नलिखितानां श्लोकानां भावार्थं लिखत –

(क) क्षीयन्ते खलु भूषणानि।

(ख) सर्वशास्त्रेष्वनुपहतविधिः श्रेयषामेष पन्था।

(ग) महतां निःसीमानश्चरित्रविभूतयः।

(घ) प्रकृतिसिद्धमिदं हि महात्मनाम्।

निबन्धात्मकप्रश्नाः

प्रश्नः 4 अधोलिखितानां पद्यानां सप्रसंगव्याख्यां कुरुत–

(क) केयूराणि न .................................... वाग्भूषणं भूषणम्।

(ख) सन्तप्तायसि संस्थितस्य .................................... संसर्गतो जायते।

(ग) श्रोत्रं श्रुतेनैव .................................... तु चन्दनेन।

प्रश्नः 5 "पद्माकरं .................................... परहितेषु कृताभियोगाः" अस्मिन् पद्ये किं छन्दः, तल्लक्षणं लिखित्वा उदाहरणे संगमयत

प्रश्न 6 संसर्गस्य महत्त्वं प्रतिपादयत्।

व्याकरणप्रश्नाः

प्रश्नः 7 (क) अधोलिखितानां पदानां सन्धि–विच्छेदं कृत्वा सन्धिनामनिर्देशं कुरुत –

(1) चन्द्रोज्ज्वलाः (2) नालङ्कृता (3) वाण्येका

(4) अक्रोधस्तपसः (5) निर्व्याजता (6) कृताभियोगाः

(ख) अधोलिखितानां पदानां सन्धिं कुरुत –

(1) ज्ञानस्य + उपशमः (2) प्रभवितुः + धर्मस्य (3) प्रायेण + अधमः

(4) विना+अपि+ऐश्वर्येण (5) जलधरः+ अपि (6) लाघ्यः + त्यागः

(ग) अधोलिखितेषु पदेषु धातु–लकार–पुरुष–वचनानां च निर्देशं कुरुत–

| मूलधातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|
| (1) धार्यते | | | |
| (2) हरति | | | |
| (3) तनोति | | | |
| (4) जायते | | | |
| (5) विभाति | | | |
| (6) राजते | | | |
| (7) ददाति | | | |
| (8) ज्ञायते | | | |

(घ) अधोलिखितेषु पदेषु मूलशब्द–विभक्ति–लिङ्ग–वचनानां निर्देशं कुरुत–

| मूलशब्दः | विभक्तिः | लिङ्गम् | वचनम् |
|---|---|---|---|
| (1) विलेपनम् | | | |
| (2) शक्त्या | | | |
| (3) शौर्यस्य | | | |
| (4) तपसः | | | |
| (5) वाचि | | | |
| (6) निःसीमानः | | | |
| (7) विभूतयः | | | |
| (8) स्वात्याम् | | | |

(ङ) अधोलिखितेषु पदेषु प्रकृतेः–प्रत्ययस्य च निर्देशं कुरुत–

| | प्रकृतिः | प्रत्ययः |
|---|---|---|
| (1) अलङ्कृता | | |
| (2) भूषणम् | | |
| (3) उपशमः | | |
| (4) विनयः | | |
| (5) कीर्तिम् | | |
| (6) स्थिताम् | | |

(7) विपदि

(8) दानेन

(च) अधोलिखितानां पदानां समासविग्रहं कृत्वा समासस्य नामनिर्देशं कुरुत–

| समासविग्रहः | समासस्य नाम |
|---|---|
| (1) सत्संगतिः | |
| (2) वाग्भूषणम् | |
| (3) मानोन्नतिम् | |
| (4) कमठपतिना | |
| (5) महात्मनाम् | |

उत्तरमाला

प्रश्नः 1 (क) 3 (ख) 4 (ग) 1

प्रश्नः 2 (क) संस्कृता (ख) शीलम् (ग) सत्सङ्गतिः

(घ) संसर्गतः (ङ) श्रुतौ

## द्वादषः पाठः

# राजस्थानस्य स्वातन्त्र्यवीरपथिकः

पाठ—परिचयः

श्री वासुदेवशास्त्रिमहोदयेन ''राजस्थानस्य स्वातन्त्र्यवीरः पथिकः'' नामकस्य नाटकस्य रचना कृता। पंच अंकात्मकेऽस्मिन् नाटके राजस्थानस्य स्वतन्त्रता सेनानीनां राष्ट्रियान्दोलने अद्वितीय—योगदानस्य वर्णनम् अस्ति। अस्य नाटकस्य रचयितुः श्रीवासुदेवशास्त्रिमहोदयस्य जन्म 19 जनवरी 1936 तमे वर्षे चितौड़मण्डलस्य पाण्डोलीनामक ग्रामेऽभवत्। अस्य पितुः नाम श्रीप्यारचन्द्रखण्डेलवालः (ब्राह्मणः) आसीत्। भवान् ''संस्कृत सुषमा'', ''बालसंस्कृतम्'', संस्कृत शिक्षण एवं संस्कृत व्याकरणं, हिन्दी व्याकरणं च इत्यादीनाम् पुस्तकानां लेखकरूपेण प्रसिद्धः अस्ति।

पाठ—सन्दर्भः —

प्रस्तुतनाट्यांशे श्रीविजयसिंहपथिकस्य राष्ट्रिये आन्दोलने भूमिका वर्णिता। पथिकः राजस्थानस्य सत्याग्रहसंग्रामस्य प्रथमः सेनापतिः मन्यते। मेवाडस्य अन्तर्गते बीजोल्यामण्डले शासकेन कृषकेभ्यः इयं घोषणा कृता यत् सर्वे कृषकाः स्वक्षेत्रे उत्पन्नधान्यस्य भागत्रयं राजकोषे दास्यन्ति। अतः सर्वे कृषकाः अन्नं शासकाय कररूपे ददति स्म। कृषकाणां स्व पुत्रपुत्र्यः च बुभुक्षया पीड़िताः भवन्ति स्म। तेषाम् अतीव दयनीयदशा अभवत्। सर्वे मिलित्वा पथिकसमीपं गच्छन्ति, स्ववेदनां च कथयन्ति। पथिकः शासकाय अन्नं दातुं निषेधं करोति। पथिकः सत्याग्रहं करोति। अन्ते शासकः पथिकस्य समक्षं नतमस्तकः भवति। पथिकः न केवलं राजस्थानस्वातन्त्र्यान्दोलनस्य अग्रणी आसीत्, अपितु सः समग्ररूपेण राष्ट्रियव्यक्तित्वस्य धनी अपि आसीत्।

शासकः — (मनसि) अस्मिन् मेदपाटान्तर्गत—बीजोल्यामण्डले क्षेत्राणि शस्यश्यामलानि सन्ति। अतः कर रूपेण अत्यधिकम् अन्नं गृहीतव्यम्। भो द्वारपाल। इत आगच्छ।

द्वारपालः — कथयतु भवान्।

शासकः — सर्वत्र मेदपाटे घोषणां करोतु यत् क्षेत्रेषु यदन्नं भविष्यति। तस्य त्रिभागं राजकोषे सर्वे अनिवार्य रूपेण दास्यन्ति।

सर्वे कृषकाः — अहह! अयं सर्वथान्यायोऽस्ति।

नाथूलालः — हा, अद्यत्वेऽस्माकम् अशुभानि दिनानि सन्ति।

(शासकः हीरालालस्य गृहं गत्वा)।

शासकः — कथयतु तव क्षेत्रे कियदन्नमुत्पन्नम्?

हीरालालः — केवलं बोरीद्वयं गोधूममुत्पन्नम्।

शासकः — तर्हि सार्धबोरीम् एकां देहि मह्यम्।

(हीरालालः रुदन् अन्नं ददाति)

शासकः– (नाथूलालं प्रति) कथयतु तव क्षेत्रे कियदन्नमुत्पन्नम्?

नाथूलालः – केवलं बोरीत्रयमन्नं समुत्पन्नम्।

शासकः – तर्हि बोरीद्वयं देहि मह्यम्।

(नाथूलालः रुदन् अन्नं ददाति)

(शासकः स्वगृहम् अगच्छत्। हीरालालः अपि नाथूलालस्य गृहं गच्छति)

हीरालालः – भो! चलतु आवां सर्वान् कृषकानाहूय विजयसिंहपथिकस्य समीपं गच्छावः।

नाथूलालः – सः तु सामान्य शिक्षकः, सः किं साहाय्यं कर्तुं शक्नोति?

हीरालालः – सः सामान्य शिक्षकः नास्ति। स तु क्रान्तिकारी देशभक्तः अस्ति।

नाथूलालः – तर्हि गन्तव्यमस्माभिः।

(सर्वे कृषकाः मिलित्वा पथिकस्य गृहं गच्छन्ति)

हीरालालः – भो श्रीमन्! शासकः अस्मान् प्रत्यन्यायं करोति।

पथिकः – किमस्ति वृत्तम्?

हीरालालः – सः सर्वेभ्यः कृषकेभ्यः समुत्पादितमन्नस्य त्रिभागं कररूपेण गृह्णाति।

नाथूलालः – भो गुरुदेव! अन्नं तु शासकः खादति शिशवोऽस्माकं बुभुक्षिताः शेरते।

पथिकः – कस्मात् कालात् क्रूरचक्रमिदं चाल्यते?

नाथूलालः – विगतत्रिवर्षात्।

पथिकः – निर्धनकृषकान् शासकोऽयं लुण्ठति। अतः कररूपेण अन्नदानम् अवरुद्धं कुरुत। न कोऽपि कृषकः एकमपि अन्नकणं दास्यति शासकाय।

सर्वे कृषकाः – भो गुरुदेव! वयम् इत्थमेव करिष्यामः।

(तदन्तरं सर्वे स्वगृहं गच्छन्ति, शासकः हीरालालस्य गृहमागच्छति)

शासकः – कथयतु तव क्षेत्रे कियदन्नमुत्पन्नम्?

सर्वेकृषकाः – भो शासकमहाभाग! वयं तुभ्यमेकमपि अन्नस्य कणं न दास्यामः।

शासकः – कथं न दास्यथ?

सर्वे कृषकाः – प्राणत्यागोऽपि भवतु नाम किन्तु अन्यायस्य विरोधं करिष्यामः।

(पथिकः आगच्छति)

पथिकः– भो शासक महोदय! श्रूयताम्। यदि भवान् नीतिपूर्वकं कर रूपेण अन्नं गृहीष्यति तर्हि सर्वे दास्यन्ति, अनुचितरूपेण न दास्यन्ति।

शासकः – कथं न दास्यन्ति। सर्वान् कारागृहे प्रेषयिष्यामि।

पथिकः– सत्याग्रहमहं करोमि। न कोऽपि कृषकः अनुचितरूपेण एकमप्यन्नकणं दास्यति।

शासकः – सुष्ठु भणति भवान्। स्वनिर्णये संशोधनं करोमि। सर्वेभ्यः कृषकेभ्यः समुत्पादितमन्नस्य दशमं भागं गृहीष्यामि।

पथिकः – समुचितमिदम्। भो! कृषकाः श्रूयन्ताम्। भवन्तः समुत्पादितान्नस्य दशमं भागं शासकाय कररूपेण ददतु।

सर्वे कृषकाः – जयतु जयतु पथिकः जयतु।

संघे शक्ति कलौ युगे

(पंचवर्षानन्तरं हीरालालस्य पुत्रः मोहनः नगरात् आगच्छति)

मोहनः – भो पितः! किं भवतास्माकं ग्रामस्य पूर्वशिक्षकस्य विजयसिंहपथिकस्य विषये श्रुतम्।

हीरालालः – आम् स एवास्माकं ग्रामे कृषकान्दोलनं सफलमकारयत्।

मोहन – सम्प्रति सः ''प्रताप'' नामकस्य पत्रस्य सम्पादनमपि करोति।

हीरालालः – तर्हि शोभनं कार्यं करोति।

मोहनः – सः राजस्थानकेसरी नामकस्य पत्रस्य प्रकाशनमपि करोति।

हीरालालः – पत्रेऽस्मिन् सः शासकेन कृतां राजस्थानस्य जनतायाः सामाजिकार्थिक – परिस्थितिं प्रकटीकरोति। (ततस्ततः)

मोहनः – सः राजस्थानस्य प्रजामण्डले राष्ट्रियान्दोलनं प्रारब्धवान्। सः कारागृहमपि अगच्छत्। तत्र कारागृहेऽपि अनेकेषां पुस्तकानां प्रणयनमकरोत्।

हीरालालः – तर्हि गुरुदेवः देशस्य कृते महान् पुरुषोऽस्ति।

मोहनः – महात्मा गाँधी अपि इमम् प्रति प्रभावितोऽस्ति।

हीरालालः – प्रभाववानस्ति सः।

मोहनः – सः जनान्दोलनं सक्रियं कर्तुमनेकसंस्थानां स्थापनामकरोत्।

हीरालालः – अतिशोभनं करोति सः।

मोहनः – सः देशस्य क्रांतिकारी नेतास्ति। आंग्लसर्वकारः इमं कारागृहे प्रेषितुमिच्छति किन्तु सः गुप्तवेशेन इतस्ततः दिनानि यापयाति।

हीरालालः – तर्हि सः देशस्य कृतेऽत्यधिकं कार्यं करोति।

मोहनः – सः अनेकवारं सशस्त्रं युद्धं कृत्वा आंग्लसैनिकेभ्यः आत्मानं मुक्तवान्।

हीरालालः – अतिसाहसिकः सः।

मोहनः – सः अनेकवारं बुभुक्षितः पिपासार्दितः रुग्णः च अभवत्, किन्तु आत्मसमर्पणं नैवाकरोत्।

हीरालालः – अतिशोभनम्।

मोहनः – अनेन त्यागेन सः सर्वेषां जनानां नेतृत्वपदमप्राप्नोत्। पथिकेन प्रेरणां लब्ध्वा समस्तदेशस्य नेतारः स्वतंत्रताप्राप्त्यर्थं संघर्षशीलाः सन्ति। इत्थं विजयसिंहपथिकः राजस्थाने राष्ट्रियान्दोलनस्य प्रथमः प्रवर्तकः मन्यते।

### कठिनशब्दार्थाः

मेदपाटान्तर्गत – मेदपाटस्य अन्तर्गते (मेवाड के अन्तर्गत)

रूदन् – मनसि वेदनां कुर्वन् (मन में पीड़ा करते हुए/रोता हुआ)

आहूय – आह्वानं कृत्वा (बुलाकर के)

गन्तव्यम् – गमनीयम् (जाना चाहिए)

बुभुक्षिताः – क्षुधिताः (भूखे)

लुण्ठति – वंचयति (ठगता है)

संघे – संगठने (संगठन में)

लब्ध्वा – प्राप्तं कृत्वा (प्राप्त करके)

### अभ्यासः

वस्तुनिष्ठप्रश्नाः –

(1) राजस्थान सत्याग्रह संग्रामस्य प्रथम सेनापतिः कः मन्यते?

(अ) हीरालालः (ब) नाथूलालः

(स) मोहनः (द) पथिकः ( )

(2) हीरालालस्य पुत्रः कः आसीत्?

(अ) नाथूलालः (ब) पथिकः

(स) मोहनः (द) कोऽपि न ( )

(3) ''प्रताप'' नामकस्य पत्रस्य सम्पादनं कः करोति?

(अ) शासकः (ब) पथिकः

(स) नाथूलालः (द) हीरालालः ( )

(4) शासकेन कृतायाः राजस्थानस्य जनतायाः सामाजिकार्थिकपरिस्थित्याः प्रकाशकपत्रमासीत्।

(अ) प्रतापः (ब) राजस्थानकेसरी

(स) देवपुत्रः (द) पांचजन्यः ( )

(5) हीरालालः नाथूलालः च सर्वान् कृषकान् कस्य समीपम् अनयताम्?

(अ) शासकस्य (ब) सुभाषस्य

(स) पथिकस्य (द) मोहनस्य ( )

अतिलघूत्तरात्मकप्रश्नाः –

1. बीजोल्यामण्डलं कस्य अन्तर्गते आसीत्?
2. बीजोल्या मण्डले क्षेत्राणि कीदृशानि सन्ति?
3. शासकस्य घोषणानुसारेण कृषकाः कतिभागं अन्नं राजकोषे दास्यन्ति?

4. रूदन् अन्नं कः ददाति?
5. हीरालालः कति अन्नं ददाति?
6. बोरीद्वयम् अन्नं कः ददाति?

लघूत्तरात्मकप्रश्नाः (पूर्णवाक्येन उत्तरत)

1. हीरालालः कस्य गृहं गच्छति?
2. कृषकेभ्यः समुत्पादितमन्नस्य त्रिभागं कररूपेण कः गृह्णाति?
3. बुभुक्षिताः के शेरते?
4. कस्मात् कालात् क्रूरचक्रमिदं चाल्यते?
5. कस्मिन् युगे संघे शक्तिः भवति?
6. पथिकं प्रति कः प्रभावितोऽस्ति?
7. जनाः पथिकं कस्मात् कारणात् स्मरन्ति?

निबन्धात्मकप्रश्नाः

1. विजयसिंह पथिकस्य राष्ट्रियान्दोलने किं योगदानम् आसीत्?
2. पथिकः मेदपाटान्तर्गत बीजोल्यामण्डले कृषकानां समस्या–समाधानं कथं कृतम्?
3. ''विगतत्रिवर्षात् इदं क्रूरचक्रं चाल्यते'' इति श्रुत्वा पथिकेन किं कथितम्?

व्याकरणात्मकप्रश्नाः

(1) अधोलिखितपदानां मूल शब्दं, लिंगं, विभक्तिं, वचनं च लिखत–

| | पदानि | मूलशब्दः | लिंगम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|
| 1. | सैनिकेभ्यः – | | | | |
| 2. | कारागृहे – | | | | |
| 3. | सर्वेषाम् – | | | | |
| 4. | नेतारः – | | | | |
| 5. | अस्माभिः – | | | | |

(2) अधोलिखितक्रियापदानां मूलधातुः लकारः पुरुषं वचनं च लिखत–

| | क्रियापदानि | मूलधातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| 1. | मन्यते – | | | | |
| 2. | यापयति – | | | | |
| 3. | इच्छति – | | | | |
| 4. | जयतु – | | | | |
| 5. | ददन्तु – | | | | |

(3) अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखत–

| | पदानि | सन्धिविच्छेदम् | सन्धेःनामानि |
|---|---|---|---|
| 1. | मेदपाटान्तर्गत – | | |
| 2. | प्रत्यन्यायम् – | | |
| 3. | कारागृहेऽपि – | | |
| 4. | नैवम् – | | |
| 5. | पिपासार्दिता – | | |

(4) अधोलिखितपदानां प्रकृतिप्रत्ययौ लेख्यौ –

| | पदानि | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| 1. | लब्ध्वा – | | |
| 2. | गत्वा – | | |
| 3. | आहूय – | | |
| 4. | कर्तुम् – | | |
| 5. | रुदन् – | | |

(5) अधोलिखितपदानां प्रयोगं कृत्वा वाक्यनिर्माणं कुरुत–

1. दास्यन्ति –
2. गोधूमम् –
3. रुदन् –
4. लुण्ठति –
5. प्रवर्तकः –

(6) अधोलिखितानि अशुद्धवाक्यानि शोधनीयानि।

1. हीरालालः शासकाय अन्नं ददति।
2. सर्वे कृषकः मिलित्वा पथिकस्य गृहं गच्छति।
3. अहं स्वनिर्णये संशोधनं करोति।
4. वयं तु अन्यायस्य विरोधं कुर्वः।
5. सः सामान्यशिक्षकः न सन्ति।

वस्तुनिष्ठप्रश्नानाम् उत्तरतालिका– (1) द (2) स (3) ब (4) ब (5) स

# त्रयोदषः पाठः

## लक्ष्मीस्वभावः

पाठपरिचयः

निखिलेऽपि संस्कृतवाङ्मये कविकुलगुरुः कालिदासो यथा रचनाचातुर्येण कल्पनावैचित्र्येण पद्यवन्धे गरिष्ठो वरिष्ठः च तथैव गद्यकाव्यनिबन्धने कविवरो बाणोऽतिशेतेऽन्यान् सर्वानप्यभिरूपान्। गद्यकाव्यबन्धे दण्डी सुबन्धुश्चेति द्वावेतौ बाणेन समं सुनामग्राहमुलेख्यौ। परं बाणो गरिष्ठो वरिष्ठश्च त्रयाणाम् एतेषां भूयिष्ठया मनोभावाभिव्यक्त्या, साधिष्ठया कौशल्या म्रदिष्ठया मनोहरतया पदपरिष्कृत्या च।

प्राचीनचीनदेशोद्भवो यात्री ह्वेनसांगनामा 629 तः 645 खीष्टीयवर्षपर्यन्तं भारतं बभ्राम। स हि स्वयात्रावर्णनप्रसङ्गे उत्तर भारतसम्राजो हर्षदेवस्य सविस्तरं वर्णनं कृतवान्। महाराजहर्षदेवः (606 तः 648 खीष्टीयवर्षपर्यन्तं) थानेश्वरनाम्निस्थाने राज्यं कृतवान्। स चायं हर्षः बाणभट्टेन स्वीये हर्षचरिते सविशेषं वर्णितः। एतेन बाणभट्टस्य समयः सप्तशतकं सिद्धयति। वात्स्यायनवंशोद्भवस्य बाणस्य पिता चित्रभानुः माता च राज्यदेवी आसीत्। तत्पूर्वजाः विहारप्रान्तस्य शोणाख्यस्य महानदस्य तटे प्रीतिकूट– नामके ग्रामे न्यवसन्।

बाणभट्टेन गद्यमयं ग्रन्थद्वयं प्रणीतं हर्षचरितं कादम्बरी चेति। हर्षचरितम् आख्यायिका कादम्बरी च कथा इति स्वयमेव कविना बाणेनोक्तम्। अयं पाठः कादम्बरीतः गृहीतः।

कादम्बरी रसज्ञानामाहारोऽपि न रोचते।

इत्येषा उक्तिः अस्य ग्रन्थस्य लोकप्रियतां प्रकटयति। अस्याः कथायाः खण्डद्वयम् पूर्वार्धमुतरा–र्धञ्च। कादम्बर्याः एव भागः शुकनासोपदेशः। उज्जायिनी एका प्रसिद्धा नगरी। तत्र राज्ञः तारापीडस्य कुमारं चन्द्रापीडं यौवराज्यभिषेकसमये आमात्यं उपदिशतिस्म। यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता एकैकमप्यनर्थाय किमुयत्र चतुष्टयम् इति वाक्यं लोकविश्रुतम् अनुभूतञ्च। विषयमेनं विशदीकृत्य शुकनासः राजकुमारं प्रथमं लक्ष्म्याः मदं वर्णयति स्म। अत्र लक्ष्मीमदेन के के अनर्थाः सम्भवन्तीति इति विवरणं वर्तते अत्र।

पाठ्यवस्तु

एवं समतिक्रामत्सु केषुचित् दिवसेषु राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः प्रतीहारानुपकरणसम्भारसंग्रहार्थमादिदेश। समुपस्थितयौवराज्यभिषेकञ्च तं कदाचिद्दर्शनार्थमागतामारुढ – विनयमपि विनीततरमिच्छन् कर्तुं शुकनास सविस्तरमुवाच।

तात! चन्द्रापीड! विदितवेदितव्यस्य अधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलञ्च निसर्गत एव अभानुभेद्यमरत्नालोकच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्। अपरिणामोपशमो दारुणो लक्ष्मीमदः। कष्टमनञ्जनवर्त्तिसाध्यमपरम् ऐश्वर्य्यातिमिरान्धत्वम्। अशिशिरोपचारहार्य्योऽतितीव्रः दर्पदाहज्वरोष्मा। सततममूलमन्त्रशाम्यः विषमो विषयविषास्वादमोहः। नित्यमस्नानशौचवाध्यः बलवान् रागमलावलेपः। अजस्रमक्षपावासानप्रबोधाघोरा च राज्यसुखसन्निपातनिद्रा भवति, इत्यतः विस्तरेणाभि–धीयसे। गर्भेश्वरत्वमभिनवयौवनत्वम् अप्रतिमरुपत्वम् अमानुषैशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा। सर्वाविनयानामेषामायतनम्, किमुत समवायः।

आलोकयतु तावत् कल्याणाभिनिवेशीलक्ष्मीमेव प्रथमम्। इयं हि लक्ष्मीः क्षीरसागरात् पारिजात पल्लवेभ्यो रागम् इन्दुशकलात् एकान्तवक्रताम्, उच्चैःश्रवश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्, मदिरायाः मदम्, कौस्तुभमणेरतिनैष्ठुर्यम्, इत्येतानि सहवासपरिचयवशात् विरहविनोद चिह्नानि गृहीत्वैव उद्गता। न हि एवं विधमपरिचितमिह जगति किञ्चिदस्ति यथेयमनार्या। लब्धाऽपि खलु दुःखेन परिपाल्यते। न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलक्रममनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति। नाचारं पालयति। न सत्यमनुबुद्ध्यते। गन्धर्वनगरलेखेव पश्यत एव नश्यति। सरस्वतीपरिगृहीतम् ईर्ष्यया इव नालिङ्गति। गुणवन्तमपवित्रमिव न स्पृशति। सुजनमनिमित्तमिव न पश्यति। अभिजातमहिमिव लङ्घयति। शूरं कण्टकमिव परिहरति। दातारं दुस्स्वप्नमिव न स्मरति। विनीतं पातकमिव नोपसर्पति। परस्परविरुद्धं च इन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजचरितम्। तथाहि तोयराशिसम्भवापि तृष्णां संवर्धयति। अमृतसहोदरापि कटुकविपाका। विग्रहवत्यपि अप्रत्यक्षदर्शना यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्मकेवलमुद्वमति।

अनया दुराचारया कथमपि दैववशेन परिगृहीताः विक्लवाः भवन्ति राजानः। सर्वाविनया–धिष्ठानतां च गच्छन्ति। केचित् सम्पद्भिः प्रलोभ्यमानाः रागावेशेन बाध्यमानाः विह्वलतामुपयान्ति। ग्रहैरिव गृह्यन्ते, भूतैरिव अभिभूयन्ते, अधर्मभग्नगतयः पङ्गव इव परेण सञ्चार्यन्ते। आसन्नमृत्यव इव बन्धुजनमपि नाभिजानन्ति। इषव इव पानवर्धिततैक्ष्ण्याः परप्रेरिता विनाशयन्ति।

तदेवं प्रायेऽति कुटिलराजतन्त्रे अस्मिन्महामोहकारिणि च यौवने कुमार! तथा प्रयतेथा यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपलभ्यसे सुहृद्भिः, न शोच्यसे विद्वद्भिः, नावलुप्यसे सेवकवृकैः, न वञ्च्यसे धूर्तैः, न प्रलोभ्यसे वनिताभिः, नापह्रियसे सुखेन। कामं भवान् प्रकृत्यैव धीरः। पित्रा च समारोपितसंस्कारः। तरलहृदयम्, अप्रतिबुद्धञ्च मदयन्ति धनानि, तथापि भवद्गुणसन्तोषो मामेवं मुखरी कृतवान्।

उपशान्तवचसि शुकनासे चन्द्रापीडः ताभिरुपदेशवाग्भिः प्रक्षालित इव, उन्मीलित इव, स्वच्छीकृत इव, अभिषिक्त इव, अलङ्कृत इव, पवित्रिकृत इव प्रीतहृदयो मुहूर्तं स्थित्वा स्वभवनमाजगाम।

कठिनशब्दार्थः

प्रतीहारान् – द्वारपालान्

विदितवेदितव्यस्य – विदितं ज्ञातं वेदितव्यं समस्तो ज्ञातव्यविषयो येन तस्य तादृशस्य।

अधीतसर्वशास्त्रस्य – अधीतानि पठितानि सर्वाणि समस्ताानि शास्त्राणि वेदादीनि येन तस्य तादृशस्य।

निसर्गतः – स्वभावतः।

अभानुभेद्यम् – न सूर्येण उच्छेद्यम्।

अरत्नालोकच्छेद्यम् – न मणीनां कान्त्या विना शयितुं शक्यम्।

अपनेयम् – दूरीकर्तुं शक्यम्।

अपरिणामोप शमो – न विद्यते परिणामे अन्तिमावस्थायाम् उपशमः परिणामेऽपशमात्।

अनञ्जनवर्तिसाध्यमपरम् – अन्धत्वरोगातिरिक्तम्।

ऐश्वर्यतिमिरान्धत्वम् – ऐश्वर्यं धनसम्पत्तिरेव तिमिरं नयनव्याधिः तेन अन्धत्वम् आलोकशून्यत्वम्।

अशिशिरोपचारहार्योऽतितीव्र – न स्रक्चन्दनादिशैत्यव्यापारेण परिहर्तुं योग्य इति अत्युष्णः।

| | | |
|---|---|---|
| समवायः | – | समूहः। |
| अभिनिवेशी | – | आग्रहान्वितः। |
| शकलात् | – | खण्डात्। |
| उच्चैःश्रवसः | – | इन्द्रस्य अश्वात्। |
| मदिरा | – | सुरा। |
| अनार्या | – | नीचस्वभावा। |
| अभिजनम् | – | सत्कुलम्। |
| वैदग्ध्यम् | – | कौशलम्। |
| श्रुतम् | – | शास्त्रज्ञानम्। |
| अनिमित्तम् | – | अपशकुनम्। |
| अहिः | – | सर्पः। |
| विपाकः | – | परिणामः। |
| उन्मीलितः | – | विकसितः। |

## अभ्यासः

वस्तुनिष्ठप्रश्नाः

1. लक्ष्मीस्वभावः इति पाठः समुद्धृतोऽस्ति –

(अ) हर्षचरितात् (ब) कादम्बरीतः

(स) दशकुमार चरितात् (द) शिवराजविजयात् ( )

रिक्तस्थानानि पूरयत –

(अ) लक्ष्मीः ............................... सागरात् उद्गता।

(ब) लक्ष्मीमदेन राजानः ............................... भवन्ति।

(स) ............................... नगरलेखेव पश्यत एव नश्यति।

(द) ............................... अपवित्रमिव न स्पृशति।

3. "क" खण्डं "ख" खण्डेन सह योजयत –

| क | | ख |
|---|---|---|
| (अ) तारापीडः | – | महाकविः |
| (ब) चन्द्रापीडः | – | अनार्या |
| (स) शुकनासः | – | युवराजः |
| (द) लक्ष्मीः | – | अमात्यः |
| (य) बाणः | – | महाराजः |

लघूत्तरात्मकप्रश्नाः –

1. तारापीडः कः ?
2. तारापीडस्य पुत्रस्य किं नाम ?
3. शुकनासः कस्य अमात्यः ?
4. अविनयानां आयतनानि कांनि ?
5. लक्ष्मीः कस्मात् उद्गता ?
6. लक्ष्मीः कस्य सहोदरा ?
7. जगति अनार्या का ?
8. लक्ष्मीमदेन राजानः कथम् आचरन्ति ?
9. यौवने राजभिः कथं प्रयतनीयम् ?
10. लक्ष्मी किं न पश्यति ?
11. लक्ष्मी किं न गणयति ?
12. दीपशिखेव लक्ष्मी किम् उद्वमति ?

(3) सप्रसंगं संस्कृतव्याख्या कार्या –

(1) विदितवेदितव्यस्य ................................ विषयविषास्वादमोहः।

(2) तदेवं प्राये कुटिलराजतन्त्रे ................................ नापह्रियसे सुखेन।

(4) सप्रसंगं हिन्दीव्याख्या कार्या –(सप्रसंग हिन्दी व्याख्या करिये)

(1) आलोकयतु तावत् कल्याणाभिनिवेशी ................................ सरस्वतीपरिगृहीतम् ईर्ष्यया इव।

(2) अनया दुराचारया ................................ परप्रेरिता विनाशयन्ति।

व्याकरणात्मकप्रश्नाः

(5) निम्नलिखितानां वाक्यानां वाच्य परिवर्तनं करणीयम्

(1) लक्ष्मीमेव प्रथम् आलोकयतु। ................................ ।

(2) न परिचयं रक्षति। ................................ ।

(3) न अभिजनमीक्षते। ................................ ।

(4) न शीलं पश्यति। ................................ ।

(5) न श्रुतम् आकर्णयति। ................................ ।

(6) न आचारं पालयति। ................................ ।

(6) इमानि पदानि प्रयुज्य वाक्यानि रचयत–

(1) विक्लवाः ................................ ।

(2) कदाचित् ................................ ।

(3) कामम् ................................ ।

(4) प्रीतहृदयः ................................ ।

(7) निम्नलिखितानां शब्दानां निर्दिष्टं विभक्तिवचनं लिख्यताम् –

| | विभक्तिः | वचनम् |
|---|---|---|
| (1) शास्त्रस्य | .............................. | .............................. |
| (2) अभिजातः | .............................. | .............................. |
| (3) सागरात् | .............................. | .............................. |
| (4) राजानः | .............................. | .............................. |
| (5) महामोहकारिणि | .............................. | .............................. |
| (6) दुराचारया | .............................. | .............................. |

(8) निम्नलिखितपदानां लिङ्गपरिवर्तनं करणीयम्

| | पुँल्लिङ्गम् | स्त्रीलिङ्गम् |
|---|---|---|
| (1) | दारुणः | .............................. |
| (2) | महान् | .............................. |
| (3) | अयम् | .............................. |
| (4) | अभिनिवेशः | .............................. |
| (5) | अनार्यः | .............................. |
| (6) | सहोदरः | .............................. |

(9) निम्नलिखितान् उपसर्गान् आधारीकृत्य वाक्यनिर्माणं कर्तव्यम्

(1) परि .............................. । (2) अभि .............................. ।

(3) आ .............................. । (4) अनु .............................. ।

(5) प्र .............................. । (6) अति .............................. ।

(10) निम्नलिखितानां पदानां प्रकृति प्रत्ययौ लेखनीयौ–

(1) विह्वला .................................. ..................................

(2) प्रकृतिः .................................. ..................................

(3)उद्गता .................................. ..................................

(4) वैदग्ध्यम् .................................. ..................................

(5) परिगृहीतम् .................................. ..................................

(6) उपकरणम् .................................. ..................................

(11) अधोलिखितपदेषु समासविग्रहं कृत्वा समासस्य नामनिर्देशं कुरुत –

(1) राज्यलक्ष्मीः .................................. ..................................

(2) अनार्या .................................. ..................................

(3) इन्दुशकलाद् .................................. ..................................

(4) क्षीरसागरः .................................. ..................................

(5) अधीतसर्वशास्त्रस्य .................................. ..................................

(6) अनर्थपरम्परा .................................. ..................................

.(12) अधोलिखितपदेषु सन्धिविच्छेदं कृत्वा सन्धिनामनिर्देशं कुरुत –

(1) नाल्पम् ..................................

(2) एकैकमप्येषामायतनम् ..................................

(3) नाचारम् ..................................

(4) दीपशिखेव ..................................

(5) नोपहस्यसे ..................................

(6) शुकनासोपदेशः ..................................

———————————

# चतुर्दशः पाठः

# आत्मावलोकनम्

अयं पाठः देवर्षि कलानाथशास्त्रिणा विरचितात् काव्यसंग्रहात् उद्धृतोऽस्ति। अस्मिन् पाठे कविः भारतवर्षस्य विविधक्षेत्रेषु पर्यटन् स्वमनोगतान् भावान् वर्णितवान्। दक्षिणभारते सागरस्य धैर्यं गाम्भीर्यं च दृष्ट्वा स्वचरिते इमान् गुणान् अवलोकयति, गंगायाः तटे गंगायाः शैत्ये पावनत्वं च स्वजीवने पश्यति, हिमालयं गत्वा तस्य शीतोष्णद्वन्द्वसहिष्णुत्वं शरणागतवत्सलत्वं प्रभृतिगुणानां तुलना स्वस्मिन् कृत्वा व्यथितः भवति। अतः आत्मसमीक्षणयुक्तोऽयं पाठः अस्मान् सन्मार्गे प्रेरयति।

### कस्मै किं ब्रूयात् ?

(1)

भारतमुवि पर्यटन, गतोऽहंदक्षिणजलधिम्।
परिरक्षति यो विद्रुममुक्तामयं शेवधिम्।
धीरगभीरो वर्षीयानाब्धिर्मां दृष्ट्वा।
स्मयमानः पप्रच्छ तरंगपृषद्भिः स्पृष्ट्वा।
लक्षाब्दैरपि सोऽहं वेलामनुल्लंघयन्।
प्रहरी वस्तिष्ठामि सर्वदा, विश्रममभजन्।
किं युष्माभिः कदाप्यनुसृता प्रकृतिः सेयम् ?
विविधतरंगाकुलतायामविचलितैः स्थेयम्।
तदवधि मानसमूहापोहतरंगैर्भग्नम्।
आत्मन्यक्कृतिभावनासु वर्तते निमग्नम्।

(2)

काशिकधरणीमटन् जाह्नवीतटमनुयातः।
तत्प्रवाहमध्येऽहं प्राप्तो लघुनौकातः।
गंगाशिशिरतरंगा मां प्रपच्छुर्निभृतम्।
किं युष्माभिर्भागीरथ्याः किमपि शिक्षितम्?

या ददाति मुक्तैर्हस्तैर्गृह्णाति न किंचित्।

यया विभेदो विनिमयश्च न ज्ञातः कश्चित्।

निजः परो वेत्यभिलक्ष्यैव सहायीभवताम्।

दानस्य प्रतिदानमिच्छतां को वा भवताम्।

गंगा सलिले स्नातुं जातु भवेदधिकारः?

तदवधि मत्कर्णौ भिनत्ति कश्चन धिक्कारः।।

(3)

यदा निदाघे हिमगिरिमगमं शीतलतायाम्।

विश्रममिच्छन् स्थितो देवदारोश्छायायाम्।

हिमवानपि मां दृष्ट्वा प्रष्टुमना इव जातः।

त्वं मां पश्यसि, परः शतं वर्षेभ्यो भ्रातः।

प्रत्यब्दं सहस्रकिरणस्यास्तीयं सरणी।

वह्निर्ग्रीष्मे वर्षति, ताम्यति निखिला धरणी।

किन्त्वहमविगणयन्नुष्णत्वं वा सन्तापम्।

किं कदापि वैकल्यं वोग्रत्वं वा प्रापम्?

सर्वे यूयं मया रक्षिता गुरुदुरितेभ्यः।

शीतलतां वितरामि पशुभ्यः पञ्चजनेभ्यः।

किं यूयं तापस्य सन्निधौ शीतलताया।

आतपस्य सन्निधौ तरूणामिव छायायाः।

किमपि गुणं गृह्णीथ, कणं वा मम संयोगात्?

एतदुपरि मादृशः कथय कस्मै किं ब्रूयात्?

अन्वयः—

अहं भारतभुविपर्यटन् दक्षिणजलधिं गतः। यः विद्रुममुक्तामयं शेवधिम् परिरक्षति। धीर गभीरो अब्धिं

दृष्ट्वा स्मयमानः वर्षीयान् तरंगपृषद्भिः स्पृष्ट्वा पप्रच्छ। अहम् विश्रमम् अभजन् लक्ष्य अब्दैः अपि वेलाम् अनुल्लंघन् प्रहरीवत् सर्वदा तिष्ठामि किं युष्माभिः सा इयम् प्रकृतिः कदा अपि अनुसृता?विविध तरंग आकुलतायाम् अविचलितैः स्थेयम्। तद् अवधि मान समूह अपोह तरंगैः भग्नम् आत्मन्यकृति भावनासु निमग्नम् वर्तते।

काशिका—धरणीम् अटन् जाह्नवी तटम् अनुयातः। तत् लघु नौकातः अहं प्रवाह मध्ये प्राप्तः। शिशिरतरंगा गंगा मां निभृतम् प्रपच्छुः किं युष्माभिः भागीरथ्याः किमपि शिक्षितम्?या मुक्तहस्तैः ददाति किंचित् न गृह्णाति। मया कश्चित् विभेदः विनिमयश्च न ज्ञातः निजः परः वा इति अभिलक्ष्य एव भवताम् सहायी दानस्य प्रतिदानम् इच्छतो वा भवतां कः गंगा सलिले जातु स्नातुं अधिकारः भवेत् ? तत् अवधि धिक्कारः कश्चन मत् कर्णौ भिनत्ति।

यदा निदाधे हिमगिरिम् अगमं देवदारोः छायायाम् स्थितः शीतलतायाम् विश्रमम् इच्छन् हिमवान् अपि मां दृष्ट्वा प्रष्टुमना इव जातः। भ्रातः त्वं शतं परः वर्षेभ्यो मां पश्यसि। प्रति अब्दम् इयं सरणी सहस्र किरणस्य आस्ति। ग्रीष्मे वह्नि वर्षति निखिला धरणी ताम्यति। किन्तु अहम् उष्णत्वं सन्तापम वा विगणयन् किं कदापि वैक्लव्यं उग्रत्वं वा प्राप्तम्?यूयं सर्वे मया गुरुदुरितेभ्यः रक्षिता पंचजनेभ्यः पशुभ्यः शीतलतां वितरामि।

किं यूयाम् मम संयोगात् तापस्य सन्निधौ शीतलतायाः आतपस्य सन्निधौ तरूणाम् इव छायायाः किमपि गुणं कणं वा गृह्णीथ। एतद् उपरि मादृशः कस्मै किं ब्रूयात् कथय?

कठिनशब्दार्थः

| | | |
|---|---|---|
| पर्यटन् | – | भ्रमन् |
| विद्रुममुक्तामयं | – | मौक्तिकप्रवालैः रत्नैश्च युक्तम् |
| जलधिम् | – | सागरं |
| अब्धिम् | – | समुद्रं |
| स्मयमानः | – | गर्वोन्मत्तः अभिमानयुक्तः |
| वेला | – | समयः। |
| प्रहरी | – | रक्षकः। |

| | |
|---|---|
| कदाप्यनुसृता – | कदापि उपदेशं शिक्षा वा गृहीता। |
| विविधतरंगाकुलतायाम् – | अनेकैः उत्तुंगैः तरंगैः व्याप्तायाम् |
| तदवधि | – तस्मात् कालात्। |
| मानसमूहापोह | – मनः विविध विचाराणां विमर्शः |
| आत्मन्यक्कृतिभावनासु | – आत्मग्लानियुक्तभावनासु। |
| काशिकधरणीमटन् | – काशी नगरी भ्रमणार्थ गच्छन्। |
| जाह्नवी | – गंगा |
| गंगाशिशिरतरंगा | – गंगायाः शीतलतरंगा |
| भागीरथ्याः | – गंगायाः। |
| विभेदो | – भेदभावः। |
| विनिमय | – व्यापार, क्रय–विक्रयः आदान–प्रदानम्। |
| प्रतिदानमिच्छतां | – प्रत्युपकारम् अभिलषताम् |
| गंगासलिले | – गंगायाः जले। |
| मत्कर्णौ भिनत्ति | – मम कर्णयोः भेदनं करोति |
| निदाघे | – ग्रीष्मकाले। |
| देवदारोश्छायायाम् | – देवदारुवृक्षस्य अधः छायायाम्। |
| हिमवानपि | – हिमालयः पर्वतः अपि। |
| परःशतं | – शताधिक वर्षेभ्यः |
| प्रत्यब्दं | – प्रतिवर्षम् |
| सरणी | – नदीम् |
| वह्निग्रीष्मे वर्षत | – ग्रीष्मकाले आकाशे सूर्यः वह्नि इव तपति। |
| ताप्यति | – उष्णं करोति |
| धरणी | – पृथ्वीम् |

| | |
|---|---|
| किन्त्वहमविगणयन्नुष्णत्वं | – किन्तु अहम् उष्णत्वं न मानयन् |
| वैक्लव्यं | – विकलतां |
| वोग्रत्वं | – वा क्रोधं |
| गुरुदुरितेभ्यः | – भवन्तः सर्वेषां रक्षायाः गुरुतरदायित्वं अहं निर्वहामि। |
| वितरामि | – ददामि |
| तापस्य सन्निधौ | – ग्रीष्मस्य प्रभावेण |
| किमपि गुणं गृह्णीथ | – हिमालयात् किमपि विशिष्टगुणं स्वीकृतं न वा। |
| मादृशः | – मम सदृशः। |

वस्तुनिष्ठप्रश्नाः

1. गंगायाः पर्यायवाचिशब्दः नास्ति–

(अ) जाह्नवी (ब) सरिता

(स) भागीरथी (द) त्रिपथगा ( )

2. प्रहरी शब्दस्य अर्थः अस्ति–

(अ) प्रहारकः (ब) हारकः

(स) रक्षकः (द) प्रदायकः ( )

3. सोऽहं पदे सन्धिः अस्ति–

(अ) दीर्घः (ब) गुणः

(स) पूर्वरूपः (द) पररूपः ( )

4. ''ग्रीष्मस्य तापः'' कृते प्रयुक्त शब्दः अस्ति–

(अ) संतापः (ब) विलापः

(स) आलापः (द) आतपः ( )

अतिलघूत्तरात्मकप्रश्नाः

1. कविः भारतभुवि पर्यटन दक्षिणे कस्मिन् स्थाने गतः?

2. काशी नगरी कस्या नद्याः तटे अस्ति?

3. भारतस्य उत्तरस्यां दिशि कः पर्वतः अस्ति?

4. कस्या नद्यां स्नात्वा जनाः पापक्षयं मन्यन्ते?

5. कः अहर्निशं आतपं सहति?

लघूत्तरात्मकप्रश्नाः

1. जलधिः कविम् किम् प्रश्नं पृच्छति?

2. लघुनौकात् कविः कुत्र गतः?

3. कविः हिमगिरेः कुत्र विश्रामम् ऐच्छत्?

4. प्रत्यब्दं सहस्रकिरणसन्तापं कः सहते?

5. सरणी शब्दस्य कः अर्थः ?

वस्तुनिष्ठ प्रश्नानाम् उत्तरम् – 1. ब 2. स 3. स 4. द

निबन्धात्मक प्रश्नाः

1. सागरः कविम् किं प्रश्नं पृच्छति?

2. कस्य गंगायां स्नानस्य अधिकारः?

3. हिमालयपर्वतस्य महत्त्वं लिखत?

4. कविः किमर्थम् आत्मग्लानिम् अनुभवति?

(5) अधोलिखितपद्यांशानां सप्रसंगं व्याख्यां कुरुत –

(i) लक्षाब्दैरपि सोऽहं वेलामनुल्लंघयन्।
प्रहरी वस्तिष्ठामि सर्वदा मिश्रममभजन्।

(ii) गंगाशिशिरतरंगा मां प्रपच्छुर्निभृतम्।
किं युष्माभिर्भागीरथ्याः किमपि शिक्षितम्।

(iii) किमपि गुणं गृह्णीथ कणं वा मम संयोगात्?
एतदुपरि मादृशः कथय कस्मै किं ब्रूयात्?

व्याकरणात्मकप्रश्नाः

(6) अधोलिखितशब्दानां मूलशब्दः लिंगं विभक्तिं वचनञ्च लिखत–

| पदम् – | मूलशब्दः | लिंगम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (i) युष्माभिः – | | | | |
| (ii) याम् – | | | | |
| (iii) यया – | | | | |
| (iv) ग्रीष्मे – | | | | |
| (v) यूयम् – | | | | |
| (vi) मया – | | | | |
| (vii) कस्मै – | | | | |
| (viii) पशुभ्यः – | | | | |

(7) निम्नलिखित क्रियापदानां धातुः लकारः पुरुषः वचनञ्च लिखत–

| क्रियापदम् – | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| (i) रक्षति – | | | | |
| (ii) तिष्ठामि – | | | | |
| (iii) वर्तते – | | | | |
| (iv) ददाति – | | | | |
| (v) पश्यसि – | | | | |
| (vi) वर्षति – | | | | |
| (vii) वितरामि – | | | | |
| (viii) ब्रूयात् – | | | | |

(8) अधोलिखितेषु पदेषु उपसर्ग–धातु–प्रत्ययाः लेख्याः –

| पदम् | उपसर्गः | धातुः | प्रत्ययः |
|---|---|---|---|

| | | | | |
|---|---|---|---|---|
| (i) | दृष्ट्वा – | .................. | ................. | .............. |
| (ii) | अनुसृता – | .................. | ................. | .............. |
| (iii) | प्राप्तः – | .................. | ................. | .............. |
| (iv) | प्रपच्छ – | .................. | ................. | .............. |
| (v) | प्रतिदानम् – | .................. | ................. | .............. |
| (vi) | स्नातुं – | .................. | ................. | .............. |
| (vii) | इच्छन् – | .................. | ................. | .............. |
| (viii) | जातः – | .................. | ................. | .............. |
| (ix) | प्रष्टुम् – | .................. | ................. | .............. |
| (x) | परिरक्षति – | .................. | ................. | .............. |

(9) निम्नांकितानां पदानां सन्धिविच्छेदं कृत्वा सन्धिनाम निर्देशं कुरुत –

| | पदम् | सन्धिविच्छेदः | सन्धेः नाम |
|---|---|---|---|
| (i) | गतोऽहम्– | ..................+.................. | .................................. |
| (ii) | लक्षाब्दैरपि – | ..................+.................. | .................................. |
| (iii) | कदाप्यनुसृता– | ..................+.................. | .................................. |
| (iv) | सेयम् – | ..................+.................. | .................................. |
| (v) | वेत्यभिलक्ष्यैव – | ..................+.................. | .................................. |
| (vi) | देवदारोश्छायायाम् – | ..................+.................. | .................................. |
| (vii) | प्रत्यब्दं – | ..................+.................. | .................................. |
| (viii) | किन्त्वहम् – | ..................+.................. | .................................. |
| (ix) | वोग्रत्वम् – | ..................+.................. | .................................. |
| (x) | एतदुपरि – | ..................+.................. | .................................. |

(10) निम्नांकितानां पदानां समास विग्रहं कृत्वा समासनामापि लिखत–

| | सामासिकपदम् | समासविग्रहः | समासस्य नाम |
|---|---|---|---|
| (i) | भारतभुवि– | ................................ | ........................ |
| (ii) | धीरगभीरो – | ................................ | ........................ |
| (iii) | तरंगपृषद्भिः – | ................................ | ........................ |
| (iv) | गंगाशिशिरतरंगा– | ................................ | ........................ |
| (v) | विविधतरंगाकुलतायाम् – | ................................ | ........................ |
| (vi) | प्रत्यब्दं – | ................................ | ........................ |
| (vii) | वह्निग्रीष्मे– | ................................ | ........................ |
| (ix) | विद्रुममुक्तामयं | ................................ | ........................ |
| (x) | काशिकधरणी– | ................................ | ........................ |

(11) निम्नलिखितानां पदानां पर्यायवाचिशब्दाः लेख्याः –

| | | | | |
|---|---|---|---|---|
| (i) | जलधिम्– | 1....................... | 2. ................. | 3. ..................... |
| (ii) | जाह्नवी – | 1....................... | 2. ................. | 3. ..................... |
| (iii) | हिमगिरि – | 1....................... | 2. ................. | 3. ..................... |
| (iv) | ग्रीष्मः – | 1....................... | 2. ................. | 3. ..................... |
| (v) | सरणी – | 1....................... | 2. ................. | 3. ..................... |
| (vi) | धरणी – | 1....................... | 2. ................. | 3. ..................... |
| (vii) | सलिल – | 1....................... | 2. ................. | 3. ..................... |

(12) अधोलिखितपदानां प्रयोगं कृत्वा वाक्यनिर्माणं कुरुत–

| | पदम् | वाक्यप्रयोगः |
|---|---|---|
| (i) | सर्वदा – | ........................................................................... । |
| (ii) | प्रकृतिः – | ........................................................................... । |
| (iii) | स्नातुं – | ........................................................................... । |

(iv) मां – .............................................................................. ।

(v) दृष्ट्वा – .............................................................................. ।

(vi) यूयं – .............................................................................. ।

(vii) मादृशः – .............................................................................. ।

(viii) ब्रूयात् – .............................................................................. ।

———————————

## पञ्चदशः पाठः

## वीरबालकः अभिमन्युः

पाठ–परिचयः–

अयं पाठः भारतीयसंस्कृतिः आधारभूतस्य ग्रन्थस्य महाभारतस्य द्रोणपर्वणः अंशः अस्ति। धर्मक्षेत्रे कुरुक्षेत्रे यदा कौरवा–पाण्डवाः युद्धरताः आसन्, तदा युद्धे अर्जुनम् अनुपस्थितं ज्ञात्वा द्रोणाचार्येण चक्रव्यूहरचना कृताः। पाण्डवेषु केवलं अर्जुनः चक्रव्यूहभेदने दक्षः। पाण्डवाः चिन्तामग्नाः जाताः। तदा अभिमन्युः चिन्तामग्नयुधिष्ठिरस्यं समीपे गत्वा कथयति यत् अहं मातुः गर्भे एव चक्रव्यूहभेदनं शिक्षितवान्। अतोऽहं चक्रव्यूहस्य भेदनं करिष्यामि। अस्मिन् पाठे अभिमन्योः वीरता, युद्धकौशलं, गुरुभक्तिः अदम्य–साहसं च वर्णितानि।

महाभारतस्य युद्धेऽर्जुनकारणात् कौरवाणां पराजयः सुनिश्चितः। अत एव तेऽर्जुनं युद्धात् दूरीकर्त्तुं प्रयतन्ते स्म। संशप्तकैः सह सन्धाय तानेव तेऽर्जुनं दूरीकर्त्तुं प्रेरयामासुः। संशप्तकाश्चार्जुनं युद्धाय आजुहुवुः। तैः सह योद्धुमर्जुनः श्रीकृष्णेन सहातिदूरं जगाम। युद्धेऽर्जुम् अनुपस्थितं श्रुत्वाऽऽचार्यद्रोणः चक्रव्यूहं रचयामास। द्रोणकृता व्यूहरचनया पाण्डवाः चिन्तिताः जाताः। चिन्तामग्नयुधिष्ठिरस्य सदसि प्रविशत्यर्जुनापत्योऽभिमन्युः बालकः।

अभिमन्युः – प्रणमत्येष भावत्कः पुत्रः ज्येष्ठपितृव्यचरणेषु। कथं चिन्तिताः हतोत्साहा इव दृश्यन्ते पूज्या।

युधिष्ठिरः – यशस्वी भव पुत्र! एहि, ममाङ्के तिष्ठ।

अभिमन्युः – (युधिष्ठिरस्यान्तिके पीठिकायां तिष्ठन्) चिन्तायाः कारणन्नोक्तं तातपादैः?

युधिष्ठिरः – वत्स! किं वदामि?तव पितरं विना, नान्तं मे चिन्तायाः भविष्यति। तव कुतूहलशान्त्यै चिन्तां कथयामि। (श्वः दिने यद् भवितातृ वर्तते, तद् युद्धं चत्वारो वयं पाण्डवाः अपि न विजेष्यामहे।)

अभिमन्युः – कथं कथं तात!

युधिष्ठिरः – वत्स! कौरव सेनानायको भवान् द्रोणो विरचितवान् चक्रव्यूहं, तस्य भेदने

पाण्डवेष्वर्जुनः एव समर्थोऽस्ति। वयं बलवन्तः शस्त्रधारिणोऽपि व्यूहभेदनेऽशक्ताः, चिन्तिता एव भवितुं शक्नुमः। आत्मानञ्च धिक् कुर्मः।

अभिमन्युः – (नम्रीभूय) अत्र व्यूहभेदनेऽपि का चिन्ता?सति च मयि भवतां सेवके। भवतामाशीर्भिः व्यूहमुच्छिद्य कौरव–दर्प–दलनञ्च विधाय दर्शयिष्यामि पूज्याचार्य स्वात्मानं धनञ्जयस्यैवापरां मूर्तिम्।

युधिष्ठिरः – वत्स! पाण्डववध प्रतिज्ञातः भगवताचार्येण, अतो विशेष चिन्ता व्यथयति हृदयं मे। मोहात् हृदये भीतिरपि जाता।

अभिमन्युः – पूज्य! कस्माद्भीतिः?'क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तपः' इति भगवद् वाक्यं विस्मृतं किल पूज्यैः। अस्तु भीतिः दूरे तिष्ठतु। युद्धाय कामये आशिषा सह आज्ञां श्रीमतां तातपादानाम्।

युधिष्ठिरः – विजयी भव वत्स। युद्धे पाण्डवपराक्रमं प्रदर्शय।

अभिमन्युः – भवतामाशीर्वादेन सह लब्धबलो युद्धे जेष्यामि।

(पटाक्षेपो भवति)

द्वितीयं दृश्यम्

अभिमन्युः – (रथमारुह्य सार्थवाहमादिशन्) चल सत्वरं चल, मातुः शुभाशीर्वादं ग्रहीष्यामि।

सारथि – वीरः! सम्यग् विचिन्त्यैव कर्तव्यम्। भवता यो भारः स्वीकृतः सः तु कथमूह्यो भविष्यति इति तर्कयामि। भवान् अनुभवरहितोऽनुभवी च गुरुद्रोण इति।

अभिमन्युः – (सारथिनं श्रुत्वा हसति) भो! किं पवनोऽपि स्वेदकणैः सह विलोकितः?हिमात् त्रस्तोऽग्निः किं दृष्टः?यद्येव न तत्कथमहमेव द्रोणाचार्यात् बिभेमि?किं पुरा श्री रामो न जितो लवेन?अहमपि युद्धेऽतिरथिजनान् ज्येष्ठान् श्रेष्ठञ्च सर्वान् हनिष्यामि। चल प्रचल।

सारथि – यथाऽऽज्ञापयत्यायुष्मान्। (रथं चालयति, राजप्रासादमासाद्य) प्राप्तोऽयं राजप्रासादः।

अभिमन्युः – (सुभद्रां मातरं विलोक्य) मातः! प्रणमामि त्वाम् (प्रासादस्थाः वृद्धाः ताः विलोक्य वदन्ति) नमः सर्व–वृद्धाभ्यः (माता सुभद्रा सर्वाश्चोपस्थिताः स्त्रियः कुमाराय शुभाशीर्वादान् वितरन्ति)।

सुभद्रा – कुतो वत्स?कवचाच्छादित शरीरस्त्वं प्रेक्षणीयोऽसि।

अभिमन्युः – मातः युद्धाय सज्जितोऽहं, तातपादेभ्योऽत्र प्राप्तोऽस्मि भवत्या आशीर्वाद ग्रहणोत्सुकः।

सुभद्रा – (आशीर्वादं प्रयच्छति) विजयश्रिया यशस्वी भव पुत्र।

उत्तराः – (अभिमन्युपत्नी) नाथ! तिष्ठतु पूजयिष्यामि त्वाम् (ललाटे तिलकं कृत्वा आरार्तिञ्च कृत्वा, वदति) विजित्य शत्रून् सत्वरमेवागच्छतु भवान् पन्थानं पश्यामि।

(पटाक्षेपो भवति)

कठिन–शब्दार्थः

प्रयतन्ते – प्रयत्नं कुर्वन्ति।

आजुहुवुः – आह्वानं कृतवन्तः।

चिन्तामग्नः – चिन्तया दुःखितः।

अपत्यः–पुत्रः।

पीठिकायां–आसने।

कुतूहलशान्त्यै–जिज्ञासा शान्तिकृते।

व्यूहभेदनेऽशक्ताः – चक्रव्यूह भेदन कलायां न पारंगता।

धनञ्जयस्यैवापरां–अर्जुनस्य प्रतिकृति अपररूपं वा।

हृदय दौर्बल्यं – हृदयस्य दुर्बलतां।

त्यक्त्वोत्तिष्ठ–त्यक्त्वा उत्तिष्ठ।

परंतपः–अर्जुनः।

भीतिः—भयः।

पटाक्षेपो—जवनिका पातः।

सार्थवाहमादिशन—सारथिम् आदिशति।

सम्यग् विचिन्त्यैव—सुष्ठु विचारं कृत्वा।

कथमूह्यो—कथम् अनुमेयः।

पवनोऽपि—वायुः अपि।

स्वेदकणैः—श्रमबिन्दुभिः।

युद्धे अतिरथिजनान्—युद्धे महारथिजनान्।

विलोक्य—दृष्ट्वा

प्रासादः—राजमहनम्।

कवचाच्छादितः – कवचेन सुरक्षितः।

ललाटे—मस्तके।

विजित्य—जित्वा।

सत्वरमेवागच्छतु—शीघ्रमेव आगच्छतु।

पन्थानं—मार्गम्।

वस्तुनिष्ठप्रश्नाः

1. महाभारतस्य युद्धे कस्मात् कारणात् कौरवाणां पराजयः सुनिश्चितः—

(अ) युधिष्ठिरः (ब) अभिमन्युः

(स) अर्जुनः (द) द्रोणः

2. कः चक्रव्यूहमरचयत्—

(अ) द्रोणः (ब) अर्जुनः

(स) कृपाचार्यः (द) अश्वत्थामा

3. चक्रव्यूहभेदने पाण्डवेषु कः समर्थः अस्ति—

(अ) युधिष्ठिरः (ब) भीमः

(स) अर्जुनः (द) सहदेवः

4. विजयी भव वत्स। युद्धे पाण्डवपराक्रमं प्रदर्शय। इति वाक्यं कः उक्तवान्–

(अ) अभिमन्युः (ब) युधिष्ठिरः

(स) सुभद्रा (द) उत्तरा

5. अभिमन्वोः माता का अस्ति –

(अ) उत्तरा (ब) सुभद्रा

(स) कुन्ती (द) गान्धारी

अतिलघूत्तरात्मकप्रश्नाः

1. अर्जुनः कैः सह युद्धरतः अतिदूरं जगाम?

2. कः युधिष्ठिरं चिन्तामग्नं दृष्टवान्?

3. "क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप" इति वाक्यं कस्मात् ग्रन्थात् उद्धृतः?

4. "भवान् अनुभवरहितोऽनुभवी च गुरुद्रोणः" इति वाक्यं कः उक्तवान्?

5. अभिमन्युः राजप्रासादं प्रति किमर्थं गच्छति?

लघूत्तरात्मकप्रश्नाः

1. के अर्जुनं युद्धात् दूरीकर्तुं प्रयतन्ते?

2. अर्जुनः कस्य भेदने समर्थः अस्ति?

3. "भवतामाशीर्वादेन सह लब्धबलो युद्धे जेष्यामि" अत्र भवताम् इति पदं कस्य कृते प्रयुक्तम्?

4. सारथिः अभिमन्युं प्रति किं कथयति?

5. का अभिमन्योः आरतिं करोति?

6. श्रीरामस्य पुत्रस्य किम् अभिधानम्?

7. अभिमन्योः जनकः कः?

वस्तुनिष्ठप्रश्नानाम् उत्तराणि –1 स 2. अ 3. स 4. ब 5. ब

निबन्धात्मकप्रश्नाः

1. अभिमन्युः युधिष्ठिरं प्रति किं कथयति?

2. अभिमन्युः सारथिनः वचनं श्रुत्वा किं कथयति?

3. युद्धाय सज्जितम् अभिमन्युं दृष्ट्वा उत्तरायाः का प्रतिक्रिया?

(5) सप्रसंगम् अनुवादं कुरुत –

पूज्य! कस्माद्भीतिः?'क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप' इति भगवद्वाक्यं विस्मृतं किल पूज्यैः। अस्तु, भीतिः दूरे तिष्ठतु। युद्धाय कामये आशिषा सह आज्ञां श्रीमतां तातपादानाम्।

(6) सप्रसंगम् अनुवादं कुरुत–

भो! किं पवनोऽपि स्वेदकणैः सह विलोकितः?हिमात् त्रस्तोऽग्निः किं दृष्टः?यद्येव न तत्कथमहमेव द्रोणाचार्यात् बिभेमि?किं पुरा श्री रामो न जितो लवेन?अहमपि युद्धेऽतिरथिजनान् ज्येष्ठान् श्रेष्ठाञ्च सर्वान् हनिष्यामि। चल प्रचल।

(7) सप्रसंगम् अनुवादं कुरुत–

नाथ! तिष्ठतु पूजयिष्यामि त्वाम् (ललाटे तिलकं कृत्वा आरतिञ्च कृत्वा, वदति) विजित्य शत्रून् सत्वरमेवागच्छतु भवान् पन्थानं पश्यामि।

व्याकरणात्मकप्रश्नाः

(8) अधोलिखितपदेषु शब्द–लिंग– विभक्ति– वचनानां निर्देशं कुरुत –

| पदम् | मूलशब्दः | लिंगम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| महाभारतस्य | ............ | ........... | ............. | .............. |
| युद्धाय | ............ | ........... | ............. | .............. |
| तैः | ............ | ........... | ............. | .............. |
| मयि | ............ | ........... | ............. | .............. |
| कस्मात् | ............ | ........... | ............. | .............. |
| जनान् | ............ | ........... | ............. | .............. |
| कौरवाणाम् | ............ | ........... | ............. | .............. |

| | | | | |
|---|---|---|---|---|
| सर्वान् | ............ | ........... | ............. | .............. |
| कृष्णेन | ............ | ........... | ............. | .............. |

(9) अधोलिखितपदेषु धातु–लकार–पुरुष–वचनानां निर्देशं कुरुत –

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| दृश्यन्ते– | ............ | ........... | ............. | .............. |
| भव– | ............ | ........... | ............. | .............. |
| वदामि– | ............ | ........... | ............. | .............. |
| भविष्यति– | ............ | ........... | ............. | .............. |
| शक्नुमः– | ............ | ........... | ............. | .............. |
| दर्शयिष्यामि– | ............ | ........... | ............. | .............. |
| तिष्ठतु– | ............ | ........... | ............. | .............. |
| बिभेमि– | ............ | ........... | ............. | .............. |
| वितरन्ति– | ............ | ........... | ............. | .............. |
| कुर्मः– | ............ | ........... | ............. | .............. |

(10) अधोलिखितपदेषु उपसर्ग–धातु–प्रत्ययाः लेख्याः

| पदम् | उपसर्गः | धातुः | प्रत्ययः |
|---|---|---|---|
| कर्तुम्– | ............ | ........... | ............. |
| श्रुत्वा– | ............ | ........... | ............. |
| जातः– | ............ | ........... | ............. |
| तिष्ठन्– | ............ | ........... | ............. |
| विजित्य– | ............ | ........... | ............. |
| कर्तव्यः– | ............ | ........... | ............. |
| प्रेक्षणीयः– | ............ | ........... | ............. |
| प्राप्तः– | ............ | ........... | ............. |
| विधाय– | ............ | ........... | ............. |
| प्रतिज्ञातः– | ............ | ........... | ............. |

| | | | |
|---|---|---|---|
| आरुह्य– | ............ | ........... | ............. |
| विस्मृतः– | ............ | ........... | ............. |

(11) निम्नलिखितानां पदानां सन्धिविच्छेदं कृत्वा सन्धिनामनिर्देशं कुरुत –

| पदम् | सन्धिविच्छेदः | संधिनाम |
|---|---|---|
| युद्धेऽर्जुनः– | ............+................... | ............. |
| तानेव– | ............+................... | ............. |
| प्रणमत्येषः– | ............+................... | ............. |
| हतोत्साहः– | ............+................... | ............. |
| ममांके– | ............+................... | ............. |
| पाण्डवेष्वर्जुनः– | ............+................... | ............. |
| पूज्याचार्यम्– | ............+................... | ............. |
| त्यक्त्वोत्तिष्ठ– | ............+................... | ............. |
| ग्रहणोत्सुकः– | ............+................... | ............. |

(12) निम्नांकितानां पदानां समासविग्रहं कृत्वा समासनामापि लिखत–

| सामासिकपदम् | समासविग्रहः | समासस्य नाम |
|---|---|---|
| संशप्तकार्जुनः– | ............................ | .......................... |
| द्रोणकृता– | ............................ | ........................... |
| अशक्ताः– | ........................... | .......................... |
| हृदयदौर्बल्यं– | ........................... | .......................... |
| पाण्डवपराक्रमं– | ........................... | .......................... |
| पाण्डववधः– | ........................... | .......................... |
| अनुभवरहितो– | ........................... | .......................... |

(13) निम्नांकितपदानां विलोमशब्दाः लेख्याः –

| पदम् | विलोमशब्दः |
|---|---|
| कौरवाः– | .......................... |

जयः— ..........................

उपस्थितं— ..........................

उत्साहः— ..........................

ज्ञातः— ..........................

स्मृतः— ..........................

शापः— ..........................

शत्रुः— ..........................

(14) रेखांकितपदानां विभक्तिं कारणं च लिखत

1. तैः सह योद्धुमर्जुनः श्रीकृष्णेन सहातिदूरं जगाम।

2. तव पितरं विना नान्तं मे चिन्तायाः भविष्यति।

3. नमः सर्व—वृद्धाभ्यः।

4. आत्मानं धिक् कुर्मः।

—————————

# षोडशः पाठः

## शिष्य–परीक्षा

पाठ–परिचयः –

अयं पाठः मराठाकेसरिणः वीरशिरोमणेः शिवाजिमहाराजस्य बाल्यकालस्य घटनायाम् आधारितः अस्ति। समर्थगुरुः रामदासः शिष्य–परीक्षणार्थम् उदरपीडायाः नाट्यं करोति। स्वस्य उदरपीडानिवारणार्थं व्याघ्रीदुग्धम् एकमेव उपायं कथयति। तदा सर्वे शिष्याः लज्जावनतमुखाः मौनम् आचरन्ति। तदा शिववीरः उद्घोषियति यत् अहं गुरोः उदरपीडानिवारणार्थम् ओषधिरूपेण व्याघ्रीदुग्धम् आनयामि। शिववीरः गुरोः उदरपीडानिवारणार्थम् ओषधिरूपेण व्याघ्रीदुग्धं आनयति। अस्मिन् पाठे शिवस्य वीरता, दृढ़ प्रतिज्ञा, गुरुभक्तिः, अदम्यसाहसादयः गुणाः वर्णिताः।

समर्थगुरु–रामदासः स्वशिष्यैः परिवृतः शिष्यपरीक्षार्थं समुपविष्टः आसीत्। शिष्येषु जीजापुत्रः शिवः अपि विराजते। सच्चरित्राः शिष्याः विनयावनताः गुरोर्मुखं वीक्ष्यमाणाश्चासन्।

रामदासः – (सहसा उदरपीडां नाट्यन्) हा हन्त! मृतोऽस्मि, मे उदरपीडा वर्धते। नाहं जीवामि भीषणया अनया उदरपीडया।

(सर्वे शिष्याः एतद् वीक्ष्य सहसा स्तब्धाः विस्मिताश्च सञ्जाताः स्वस्वमस्तकेषु हस्तं निधाय चिन्तयन्ति।)

एकः शिष्यः – कथम् अत्र भवताम् अकस्मात् उदरपीड़ा समुत्पन्ना। किं पूर्वमपि कदाचित्संजाता भीषण–पीडा।

रामदासः – नहि नहि, पूर्वं कदापि न सञ्जाता।

द्वितीयः – भगवन्! आज्ञापयन्तु भवन्तः अद्यैव भिषग्वरमानयामि। तस्यौषधेन द्रुतमेव दूरीभविष्यति भवतामुदरपीडा।

रामदासः – नहि पुत्र! नहि, इयं न साधारणी पीडा, इयं तु मम प्राणान्तमेव करिष्यति।

(सर्वे शिष्याः विषण्णमुखाः सञ्जाताः)।

शिवः – गुरुवर्य! संसारे सर्वेषां रोगाणाम् ओषधयः सन्ति। कथन्न ओषधिसेवनेन उदरपीडानाशः भविष्यति। वैद्यवराणां सविधे सन्ति उदरपीडाशान्तये

विविधाः प्रयोगाः।

रामदासः – वर्तते अस्य रोगस्यापि औषधम्। किन्तु न कोऽपि तदानयने समर्थः।

शिवः – हहो। किं वयं न समर्थाः तदानयने। भवतामाशिषा वयं किन्न कर्तुं क्षमाः। आज्ञापयन्तु गुरुवर्याः! कुत्र वर्तते तत् ओषधम्।

(सर्वे शिष्याः ओषधमानेतुम् अहं पूर्वम् अहं पूर्वम् इति गुरोराज्ञां प्रतीक्षन्ते। शिवः तु विनम्रः सन् उपविष्टः आसीत्)

रामदासः – वर्तते औषधम्, परं तदानयने न कोऽपि समर्थः।

शिष्याः – आदिशन्तु गुरुवर्याः। वयं नैकैकशः किन्तु सर्वे मिलित्वा तु तत् औषधमानेतुं समर्थाः भविष्यामः।

रामदासः – (शिष्यपरीक्षार्थं) समुद्घोषयति।

"इयं न शाम्यते पीडा चूर्णासवरसायनैः। शान्ता स्यान्मे च पीडेयं व्याघ्रीदुग्धेन केवलम्।"

(गुरोः समुद्घोषणां वीक्ष्य शिष्याः लज्जावनतमुखाः मौनमेवाभजन्त)

शिवः – (गुरुचरणान् स्पृशन् प्रतिज्ञां करोति) गुरुवर्य! अहमानयामि सम्प्रत्येव

व्याघ्रीदुग्धम् इति अभिधाय पात्रं हस्ते धृत्वा भीमगर्जनं कुर्वन् वनाभिमुखं प्रतस्थे। सर्वे शिष्याः लज्जिताः सन्तः शिवमुखं प्रति पश्यन्ति।

(भीषणे वने गुहामुखे व्याघ्रीशिशुः एकाकी क्रीडन्नस्ति)

शिवः – अहो! गुरोः कृपया सिद्धं मे मनोभिलषितम्। निश्चितं गुहायामस्यां व्याघ्रीदुग्धं लभेय (शिवः गुहायां प्रविशति, व्याघ्री प्रकुपितेव तमाहन्तुमागच्छति)

शिवः – मातः! अपराधं मे क्षमस्व। नाहं भवतीं क्लेशयितुं समागतोऽस्मि। अहं तु गुरोः उदरपीडाशमनाय दुग्धमानेतुमागतोऽस्मि। मातः। प्रयच्छ दुग्धम्। येन मे गुरोः उदरपीडा शान्ता भवेत्।

व्याघ्री गौरिव तिष्ठति। (शिवः पात्रे दुग्धं नीत्वा व्याघ्रीं प्रणमन् निर्गच्छति

गुहामुखात्। प्रहर्षितः सन् धावन् गुरु–सम्मुखमागत्य सगर्जनं प्रोवाच 'आनीतवानस्मि व्याघ्रीदुग्धम् गुरोः कृपया।'

शिष्याः – किमयं सत्यं समानीतवान् व्याघ्रीदुग्धम्?

रामदासः – (जीजापुत्रस्य मुखाकृतिं विलोक्य मनसि तुष्टः सन्)–किम् आनीतं त्वया व्याघ्रीदुग्धम्। पुनः पुनः शिवं शुभाशीर्भिः समभिनन्दयन् प्राह–वत्स! त्वमेवासि राष्ट्रस्य समुद्धारकः तव जन्मना धरेयं वीरप्रसविनी सञ्जाता। न वर्तते मे कापि उदरपीडा। भक्त–परीक्षणर्थमेव मया सर्वमुपकल्पितम्।

''जयतु जयतु शिववीरः'' शिष्याः समुद्घोषं कुर्वन्ति।

शिष्य–परीक्षा

कठिनशब्दार्थाः –

उदरपीड़ा–जठरवेदना।

वीक्ष्य–प्रेक्ष्य, दृष्ट्वा।

भेषजं–ओषधिः।

प्राणान्तः–मृत्युः।

विषण्णमुखाः–उदासीनाः।

वैद्यवराणां–श्रेष्ठचिकित्सकानां

शाम्यते–शान्तये।

चूर्णासवरसायनै–आयुर्वेद चूर्णैः रसायनैः औषधिभिश्च।

व्याघ्रीदुग्धेन–सिहीदुग्धेन।

लज्जावनतमुखाः–लज्जायाः अधोमुखाः सन्तः।

मौनमेवाभजन्त–तूष्णीं भूत्वा स्थिताः।

सम्प्रत्येव–इदानीम् एव।

भीमगर्जनं–गम्भीरगर्जनं कृत्वा।

वनाभिमुखं–वनं प्रति।

गुहामुखे–वने गुहायाः मुखे।

प्रकुपितेव–कोपाविष्टमुखेन।

क्लेशयितुं–पीडयितुम्।

उदरपीडाशमनाय–गुरोः उदरपीडानिवारणाय।

गौरिव–गोः सदृशः।

आनीतवानस्मि व्याघ्रीदुग्धम्–अहं सिंहीदुग्धं नीत्वा आगतः।

शुभाशीर्भिः–शुभैः आशीर्वादैः।

राष्ट्रस्य समुद्धारकः – भारतवर्षस्य उद्धारकः।

धरेयं वीरप्रसवीनी–इयं धरा वीरपुत्राणां जन्मदायिनी।

सर्वमुपकल्पितम्–सर्वं वृत्तान्तं कल्पितम्।

वस्तुनिष्ठप्रश्नाः

1. समर्थगुरु–रामदासस्य पीडा आसीत्–

(अ) शिरोवेदना (ब) पक्षाघातः

(स) कर्णपीडा (द) उदरपीडा

2. रामदासस्य रोगस्य उपचारः अस्ति–

(अ) व्याघ्रीदुग्धम् (ब) अजादुग्धं

(स) उष्ट्रीदुग्धं (द) गोदुग्धम्

3. कः व्याघ्रीदुग्धम् आनेतुं वनाभिमुखं प्रस्थितवान्–

(अ) रामदासः (ब) माधोदासः

(स) शिवः (द) जीजाबाई

4. ''मातः अपराधं मे क्षमस्व''। अत्र मातः ! इति शब्दः कस्याः कृते प्रयुक्तः–

(अ) जीजाबाई (ब) गोः

(स) व्याघ्रीशिशुः (द) व्याघ्री

अतिलघूत्तरात्मकप्रश्नाः

1. कः उदरपीडया व्याकुलः?

2. केषां पार्श्वे उदरपीडाशान्तये विविधा उपायाः सन्ति?

3. कः गुरोः सम्मुखे विनम्रः सन् उपविष्टः आसीत्?

4. "मातः! प्रयच्छ मे दुग्धम्" इति केन उक्तम्?

5. के लज्जिताः सन्तः शिव मुखं प्रति पश्यन्ति?

लघूत्तरात्मकप्रश्नाः

1. रामदासः उदरपीडानिवारणार्थ क उपायः कथितवान्?

2. "अहमानयामि सम्प्रत्येव व्याघ्रीदुग्धम्"। इति वाक्यं कः कं उक्तवान् ?

3. शिवः व्याघ्रीदुग्धं नीत्वा कुत्र गतः?

4. शिवः गुहामुखे किम् अपश्यत्?

5. व्याघ्री कीदृशी शान्ता तिष्ठति?

6. रामदासः शिवं काभिः शुभाशीर्भिः अभिनन्दयत् ?

वस्तुनिष्ठप्रश्नानाम् उत्तराणि – 1 द 2. अ 3. स 4. द

निबन्धात्मकप्रश्नाः

1. समर्थगुरु–रामदासः स्वशिष्याणां परीक्षार्थं क उपायः विचारितवान्?

2. शिवः गुरुचरणान् स्पृशन् कां प्रतिज्ञां करोति?

3. रामदासः शिवस्य हस्ते व्याघ्रीदुग्धम् दृष्ट्वा कं शुभाशिर्भिः अभिनन्दयत्?

4. सप्रसंगम् अनुवादं कुरुत –

मातः! अपराधं मे क्षमस्व। नाहं भवतीं क्लेशयितुं समागतोऽस्मि। अहं तु गुरोः उदरपीडाशमनाय दुग्धमानेतुमागतोऽस्मि। मातः! प्रयच्छ दुग्धम्। येन मे गुरोः उदरपीडा शान्ता भवेत्।

सप्रसंगम् अनुवादं कुरुत–

वत्स! त्वमेवासि राष्ट्रस्य समुद्धारकः तव जन्मना धरेयं वीरप्रसविनी सञ्जाता।

न वर्तते मे कापि उदरपीडा। भक्त–परीक्षणर्थमेव मया सर्वमुपकल्पितम्।

"जयतु जयतु शिववीरः" शिष्याः समुद्घोषं कुर्वन्ति।

व्याकरणात्मकप्रश्नाः

(6) अधोलिखितपदेषु शब्द–लिंग–विभक्ति–वचनानां निर्देशं कुरुत –

| पदम् | मूलशब्दः | लिंगम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| भवताम्– | ........... | ............. | ............. | .......... |
| मम – | ........... | ............. | ............. | ........... |
| त्वया– | ........... | ............. | ............. | ........... |
| पात्रे – | ........... | ............. | ............. | ........... |
| शिष्याः– | ........... | ............. | ............. | ........... |
| मुखात्– | ........... | ............. | ............. | ........... |
| गुरोः– | ........... | ............. | ............. | ........... |
| पुत्रस्य– | ........... | ............. | ............. | ........... |
| सर्वेषां– | ........... | ............. | ............. | ........... |
| गुहायां– | ........... | ............. | ............. | ........... |

(7) अधोलिखितपदेषु धातु–लकार–पुरुष–वचनानां निर्देशं कुरुत –

| क्रियापदम्– | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| वर्धते– | ........... | ............. | ............. | ........... |
| आनयामि– | ........... | ............. | ............. | ........... |
| करिष्यति– | ........... | ............. | ............. | ........... |
| सन्ति– | ........... | ............. | ............. | ........... |

| | | | | |
|---|---|---|---|---|
| भविष्यामः– | ........... | ............. | ............. | ........... |
| तिष्ठति– | ........... | ............. | ............. | ........... |
| कुर्वन्ति– | ........... | ............. | ............. | ........... |
| भवेत्– | ........... | ............. | ............. | ........... |
| जयतु– | ........... | ............. | ............. | ........... |
| यच्छ– | ........... | ............. | ............. | ........... |

(8) अधेलिखितपदेषु उपसर्ग–धातु–प्रत्ययाः लेख्याः

| पदम् | उपसर्गः | धातुः | प्रत्ययः |
|---|---|---|---|
| प्रयच्छ– | ........... | ............. | ............. |
| वीक्ष्य– | ........... | ............. | ............. |
| निधाय– | ........... | ............. | ............. |
| संजातः– | ........... | ............. | ............. |
| कर्तुम्– | ........... | ............. | ............. |
| उपविष्टः– | ........... | ............. | ............. |
| प्रतीक्ष्यन्ते– | ........... | ............. | ............. |
| समागतः– | ........... | ............. | ............. |
| मिलित्वा– | ........... | ............. | ............. |
| आनेतुम्– | ........... | ............. | ............. |
| स्पृशन्– | ........... | ............. | ............. |
| प्राह– | ........... | ............. | ............. |
| निर्गच्छति– | ........... | ............. | ............. |

(9) निम्नांकितानां पदानां सन्धिविच्छेदं कृत्वा सन्धिनाम निर्देशं कुरुत –

| पदम्– | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| नाहं– | .................+........................... | ............................ |
| अद्यैव– | .................+........................... | ............................ |

| | | |
|---|---|---|
| कदापि– | ..................+............................. | ............................. |
| नैकैकशः– | ..................+............................. | ............................. |
| सम्प्रत्येव– | ..................+............................. | ............................. |
| स्यान्मे– | ..................+............................. | ............................. |
| प्राणान्तः– | ..................+............................. | ............................. |
| धरेयं– | ..................+............................. | ............................. |
| कोऽपि– | ..................+............................. | ............................. |
| प्रोवाच– | ..................+............................. | ............................. |

(10) निम्नांकितानां पदानां समासविग्रहं कृत्वा समासनामापि लिखत

| सामासिकपदम् | समासविग्रहः | समासस्य नाम |
|---|---|---|
| उदरपीड़ा– | ........... | ............. |
| व्याघ्रीदुग्धम्– | ........... | ............. |
| गुहामुखात्– | ........... | ............. |
| शिष्यपरीक्षार्थम्– | ........... | ............. |
| लज्जावनतमुखाः– | ........... | ............. |
| गुहामुखे– | ........... | ............. |

(11) निम्नांकितपदानां विलोमशब्दाः लेख्याः –

| पदम् | विलोमशब्दः |
|---|---|
| सच्चरित्रः– | ......................... |
| मृतः– | ......................... |
| स्वस्थः– | ......................... |
| समर्थः– | ......................... |
| शान्तः– | ......................... |
| मम– | ......................... |
| आशीर्वादः– | |

(12) अलोलिखितानां पदानां प्रयोगं कृत्वा वाक्यनिर्माणं कुरुत –

| पदम् | वाक्यप्रयोगः |
| --- | --- |
| सहसा– | .................................................................................................. |
| हन्त– | .................................................................................................. |
| किन्तु– | .................................................................................................. |
| प्रतिज्ञा– | .................................................................................................. |
| ओषधिः– | .................................................................................................. |
| कृपया– | .................................................................................................. |
| व्याघ्रीदुग्धं– | .................................................................................................. |
| नीत्वा– | .................................................................................................. |
| त्वया– | .................................................................................................. |
| परीक्षणार्थम्– | .................................................................................................. |

——————

# सप्तदशः पाठः
# इदं न मम

**पाठपरिचयः -**

काव्येषु नाटकं रम्यम् अर्थात् दृश्यश्रव्यत्वात् नाटकानां काव्येषु सर्वोच्चस्थानं वैशिष्ट्यञ्च स्वीक्रियते। अस्यामेव परम्परायां नाट्यकल्पः इति रूपकम् जयपुरनिवासिना डॉ. शिवसागरत्रिपाठिमहाभागेन रचितम्। साहित्यरत्न-साहित्याचार्य-शास्त्रचूडामणिप्रभृतिभिः उपाधिभिः अलंकृतः डॉ. त्रिपाठिमहाभागाः राजस्थानविश्वविद्यालयस्य संस्कृतविभागात् सेवानिवृत्ताः। सम्प्रत्यपि सारस्वत-साधनायां सस्कृतलेखने संलग्नाः। त्रिपाठीमहाभागैः श्रीगान्धिगौरव-प्राणाहुति-भ्रष्टाचारसप्तशती-भ्रष्टायन-नाट्यकल्पप्रभृतयः कृतयः लिखिताः।

इदं न मम पाठोऽयं नाट्यकल्परूपकस्य इदं न मम इत्यस्मात् नाट्यग्रन्थात् संकलितः। भारतस्य ऐतिहासिक-धार्मिक-पौराणिक-राजनैतिक-समस्याभिः सह-अनुप्राणितो नाट्यकल्पः इति रूपकं स्वार्थं भ्रष्टाचारञ्च दूरीकर्तुम् उपायान् निर्दिशति। पाठेऽस्मिन् काल्पनिकपात्ररूपौ परार्थानन्दस्वार्थानन्दौ द्वावपि वटुकौ आचार्यश्रीभिः सह स्वपरार्थभावविषये विमर्शं कुरुतः।

## मूलपाठः

नेपथ्यतः महाव्याहृतीनां समुच्चारणं श्रूयते तत्र ब्रह्मचारिणां स्वरैः सह आचार्यप्रवरस्य प्रमुखस्वरः। गायत्री-मन्त्रोच्चारणं ओ३म् भू र्भुवः स्वः। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो योनः प्रचोदयात्।

ओ३म् प्रजापतये स्वाहा। इदं प्रजापतये न मम।

ओ३म् इन्द्राय स्वाहा। इदमिन्द्राय न मम।

ओ३म् अग्नये स्वाहा। इदमग्नये न मम।

ओ३म् सोमाय स्वाहा। इदं सोमाय न मम।

ओ३म् भूः स्वाहा। इदमग्नये न मम।

ओ३म् भुवः स्वाहा। इदं वायवे न मम।

ओ३म् स्वः स्वाहा। इदं सूर्याय न मम।

**-अन्तरालध्वनिः-**

ओ३म् पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।
सर्वं वै पूर्णम् .............................

वटुकानां स्वरः - अहो पूर्णाहुत्या सह सम्पन्नं हवनम्। ततश्चलामः।

ब्रह्मचारिणां स्वरः - अरे। स्वाध्यायकालोऽयम्। स्वाध्यायान्मा प्रमदः।

इति भगवती श्रुतिः। अतः उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।

-ततः प्रविशतः स्वार्थानन्दः परार्थानन्दश्च-

परार्थानन्दः - अहो मित्र! कीदृशस्त्वम्? कश्चन नूतनः समाचारः? अपि सर्वं समीचीनम्?

स्वार्थानन्दः – आवां तु सहैव वसावः। पश्यसि एव नित्यं किमत्र नवं कथनीयम् ? स्वाध्याये निरतोऽयं जनः। न त्वादृशबुद्धिचातुर्यं वहामि, तथापि यत्र तत्र शंकाः समापतन्ति।

परार्थानन्दः – बन्धो! अध्ययने सर्वमेतत् स्वाभाविकम्। तथापि कथय का समस्या ?

स्वार्थानन्दः – न कापि समस्या ? मम मनसि कापि हवनकर्मकाले समुत्पन्ना शंका जिज्ञासा वा वर्तते तद्विषये।

परार्थानन्दः – मित्रवर! शंका-समाधानं जिज्ञासाशान्तिर्वा स्वाध्यायस्यैव क्रमः। यथोक्तम् – गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा । अत्र पुष्कलं धनं तु अतिदूरम्। अतः गुरुसेवयैव विद्यार्जनं क्रियते। तर्हि एतदर्थम् आचार्यमुपसर्पावः।

स्वार्थानन्दः – भवत्कथनं समीचीनम्। श्रीमद्भगवद्गीतायां श्रीकृष्णवचोऽनुसारं ज्ञानार्जनं त्रिधा कर्तुं शक्यते – तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवयेति।

परार्थानन्दः – मन्ये अत्र प्रणिपातः सेवा वाऽशैक्षणिकी क्रिया, सा तु अस्मद् अङ्गभूता। प्रत्यहं किं वा अहोरात्रं क्रियत एव। परं शैक्षणिकं ज्ञानं तु स्वाध्यायेन तदुपरि च परिप्रश्नेन अर्थात् सर्वविधजिज्ञासा शमनेन भवति। अतः आचार्योपासनैव विधातव्या।

स्वार्थानन्दः – विदितचरमेव यदद्य गुरुकुलस्य वार्षिकोत्सवः। अतः आचार्यचरणानां कार्यक्रमः व्यस्ततमः। तैः निर्देशाः प्रसारिताः यदध छात्राणां समस्या उपाचार्या आनन्दमयी समाधास्यति।

परार्थानन्दः – अहो ! स्मृतम्। तत्रैव चलावः।.......भ्रातः । कथमेषा श्रद्धेया आचार्येति। व्याकरणे आचार्यशब्दादानुक् प्रत्यये तु आचार्यानी पदं साधु।

स्वार्थानन्दः – आम् कथं तु न स्मर्यते ? आचार्य-स्त्री आचार्यानी भवति परं या स्वयं शिक्षिका व्याख्यात्री वा सा तु आचार्यैव।

परार्थानन्दः – आम्, साधु ।...... इयं सार्वजनिकप्रवचनकक्षा।....... सम्प्रति अत्र न कोऽपि.......अस्तु अ...अ...अ... अयमाचार्याकक्षः........ समागता एव सा।

आचार्या – आगच्छताम्.......उपविशताम्। कथमागमनं युवयोः ?

उभौ – भवद्दर्शनाय विशेषतस्तु जिज्ञासा-शमनाय समागतौ।

परार्थानन्दः – स्वार्थानन्दः किञ्चित् प्रष्टुमर्हति।

आचार्या – किं प्रष्टुमिच्छति ? कोऽपि प्रश्नः जिज्ञासा वा ?

स्वार्थानन्दः – जिज्ञासैव वर्तते।

आचार्या – का जिज्ञासा ? कीदृशी जिज्ञासा ?

स्वार्थानन्दः – परमपूजनीये। आचार्ये । प्रातः अग्निहोत्रकर्मणि महाव्याहृतिभिः सह या आहुतयो दीयन्ते तत्र इदं न मम इति कथं कथ्यते। आहुतयस्तु देवेभ्य एव, न मनुष्येभ्यः। मनुष्यस्तु आहुतीनाम् आकाड्क्षी अपि न।

आचार्या – शोभनः प्रश्नः। भवत्कथनं तु सत्यं, परमत्र वस्तुतः समर्पणभावः संसूच्यते – त्वदीयं वस्तु देवेश!तुभ्यमेव समर्पये। इयं भावना अत्र यजमानस्य आचार्यस्य ब्रह्मणो वा न किमपि। सर्वदेवेभ्यः एव। अर्थात् इदं हविः प्रजापतेः इन्द्रस्य सोमस्य इन्द्रदेवस्य, सूर्यस्य वा प्रीत्यर्थं, न यजमानस्य स्वार्थ-साधनाय। एवमत्र यजमानस्य निःस्वार्थ-भावनायाः परिचयः उपलभ्यते।

स्वार्थानन्दः – श्रद्धेये । ततु स्पष्टमेव। पुनरावृत्तेः काऽऽवश्यकता ? इदं न मम......इदं न मम......इदं न मम.....इति।

आचार्या – वस्तुतः संसारोऽयं स्वार्थमयः। व्यक्तिषु संकुचिता मनोवृत्तिः दृश्यते। अनाचार-अत्याचार-भ्रष्टाचारमये युगेऽस्मिन् मनुष्यस्त्वद्य सर्वसम्बन्धान् विस्मृत्य स्वार्थाय एव जीवति।

न गुरुं न सुतां सूनुं बन्धुं मित्रं गृहं नहि।

भ्रष्टाचारस्य संसारे सर्वः स्वार्थं समीहते ।।

स्वार्थानन्दः – आचार्ये ! तत्र का हानिः ? स्वार्थसिद्धिं विना तु जीवनयात्रैव न सम्भवति। उक्तमपि आत्मार्थे पृथिवीं त्यजेत्। आत्मतुष्टिस्तु सर्वोपरि वर्तते।

परार्थानन्दः – आचार्यप्रवरे!मम मते तु नहि सर्वोपरि। स्वार्थसिद्धिस्तु संकुचितः पन्थाः। आत्मार्थे तु पशुकीटपतङ्गादयोऽपि जीवन्ति। मनुष्यस्तु सृष्टौ श्रेष्ठतमः प्राणी। यथोक्तं महर्षिणा वेदव्यासेन न मानुषाच्छ्रेष्ठतरं हि किञ्चित्।..........

स्वार्थानन्दः – तत्तु वरम्, परम् आदर्शवाक्यानि तु ग्रन्थेष्वेव शोभन्ते। पश्यतु तावद् भारतस्य परतन्त्रता–काले आङ्गल–देशीयैः मानवता नैव प्रदर्शिता। आसीत्तदाऽत्याचारितायाः पराकाष्ठा। यदा देश–स्वातन्त्र्याय स्वराज्यभावना समागता तदैव सर्वे समवेताः प्रयासरताः अन्ततश्च स्वराज्यमापुः तदपि सत्याग्रहाहिंसादिबलेन।

परार्थानन्दः – बन्धो ! स्वराज्य शब्दे स्व शब्दोऽवश्यं वर्तते, परं स्वराज्यलाभ–प्रयासे तु नासीत् स्वार्थ–भावना। तदा तु परार्थ–भावना लोकहितभावनैव सर्वत्रासीत्। सम्प्रति तु वयं विश्वपरिवारसदस्याः जाताः।

स्वार्थानन्दः – अहो! विश्वपरिवारस्य तु कथैव विलक्षणा भयावहा च। अत्र उदारीकरणे भूमण्डलीकरणे च याः विकृतयः समागताः ता अपि ध्येयाः। विदेश–शक्तीनां बहुराष्ट्रियकम्पनीनाञ्च स्वार्थानुविद्धं वर्चस्वं सर्वक्षेत्रेषु दृश्यते। सम्प्रत्यस्माकमादर्शाः मानवमूल्यानि च विलुप्तानि। स्वस्य अर्थस्य स्वार्थस्यैव प्राबल्यम्। अथ च आतङ्कवादोग्रवादमहासमुद्रे सर्वं निमज्जितमिव।

आचार्या – भवत्कथनं युगानुरूपं........ समयानुकूलम्। परं यत्सत्यं तत्सत्यमेव। मानवः एकः सामाजिकः प्राणी। एकाकी जीवनयापनाय स न समर्थः। सः प्रत्यक्षतः परोक्षतो वा समाजोपरि निर्भरः। व्यक्तिं, परिवारं, राष्ट्रं, समाजं, किं वा मानवमात्रं प्रति प्रतिबद्धता दायबद्धता चास्य वर्तते। अतः क्षुद्रतोग्रताञ्च विहाय व्यापकदृष्टिकोण आनेतव्यः अस्माकमादर्शस्तु पूर्वत एव वसुधैव कुटुम्बकम्। आचार्यशङ्करेणापि समुद्घोषितम् –

माता मे पार्वती देवी पिता देवो महेश्वरः।
बान्धवा शिवभक्ताश्च स्वदेशो भुवनत्रयम् ।।

अत्रापि न स्वार्थ–भावना, लोकहित–भावनैव। वस्तुतो भारतीयानां मनसि मानव–प्रतिष्ठा सर्वोपरि वर्तते। जीवदया तेषां चेतसि वर्तते।

## अभ्यासः

**वस्तुनिष्ठप्रश्नाः –**

१. इदं न मम इति पाठः कस्मात् रूपकात् संकलितः –

(अ) अभिज्ञानशाकुन्तलात् (ब) स्वप्नवासवदत्तात्
(स) नाट्यकल्पात् (द) वेणीसंहारात्

२. आचार्योपासनैव विधातव्या इति केनोक्तम् –

(अ) बटुकगणेन (ब) परार्थानन्देन
(स) आचार्येण (द) स्वार्थानन्देन

३. रिक्तस्थानानि पूरयत –

(१) नानादेशसमागतानां .................... रवः .................... च सञ्चरणम्।

(२) अतः .................... प्राप्य वरान्निबोधत।

(३) मम मनसि कापि .................... समुत्पन्ना शंका जिज्ञासा वा वर्तते।

(४) गुरु .................... विद्या .................... धनेन वा।

४. (क) खण्डं (ख) खण्डेन सह योजयत –

| (क) | | (ख) |
|---|---|---|
| (अ) | शिवसागरः | छात्रः |
| (ब) | स्वार्थानन्दः | आचार्या |
| (स) | आनन्दमयी | लेखकः |

**लघूत्तरात्मकप्रश्नाः –**

१. व्याकरणे आचार्यशब्दात् कस्मिन् प्रत्यये आचार्यानी पदं साधु ?

२. इदं न मम इत्यस्य पुनरावृत्तेः का आवश्यकता इति कस्य प्रश्नः ?

३. व्यक्तिषु मनोवृत्तिः कीदृशी दृश्यते ?

४. न मानुषाच्छ्रेष्ठतरं हि किञ्चित् इति केनोक्तम् ?

६. स्वदेशो भुवनत्रयम् इति केन-उद्घोषितम् ?

७. स्वाध्यायस्य कः क्रमः ?

८. आहुतयः केभ्यः भवन्ति ?

९. कः स्वार्थं समीहते ?

**सप्रसंगं संस्कृतव्याख्या कार्या –**

१. स्वार्थानन्दः – भवत्कथनं समीचीनम्। .................................. अतः आचार्योपासनैव विधातव्या।

२. आचार्या – शोभनः प्रश्नः। भवत्कथनं .............................. भावनायाः परिचयः उपलभ्यते।

सप्रसंगं हिन्दी व्याख्या कार्या – (सप्रसंग हिन्दी व्याख्या कीजिये)

१. आचार्य – वस्तुतः संसारोऽयं .......................................... आत्मतुष्टिस्तु सर्वोपरि वर्तते।

२. आचार्या – भवत्कथनं युगानुरूपं .......................................... स्वदेशो भुवनत्रयम्।

**व्याकरणात्मक प्रश्नाः –**

१. इमानि पदानि उपयुज्य वाक्यानि रचयत –

(अ) स्वाहा (ब) सह

(स) का (द) अपि

२. निम्नलिखितानां पदानां निर्दिष्टं वचनं लिख्यताम् –

(अ) अग्निहोत्रकर्मणि ........................................................................

(ब) आहुतीनाम् ........................................................................

(स) वार्षिकोत्सवः ........................................................................

(द) भवद्दर्शनाय ..............................................................

३. निम्नलिखितपदानां लिङ्गपरिवर्तनं करणीयम् –

(अ) आचार्या (पुल्लिङ्गे) ..............................................................

(ब) भगवान् (स्त्रीलिङ्गे) ..............................................................

(स) कीदृशः (स्त्रीलिङ्गे) ..............................................................

(द) श्रद्धेया (पुल्लिङ्गे) ..............................................................

(य) स्वार्थमयः (नपुंसकलिङ्गे) ..............................................................

(र) भयावहा (नपुंसकलिङ्गे) ..............................................................

४. निम्नलिखितपदानां प्रकृति-प्रत्ययौ लेखनीयौ –

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (अ) | संचरणम् | ......................... + | ......................... |
| (ब) | समागता | ......................... + | ......................... |
| (स) | प्रष्टुम् | ......................... + | ......................... |
| (द) | विस्मृत्य | ......................... + | ......................... |
| (य) | उक्तम् | ......................... + | ......................... |
| (र) | निमज्जितम् | ......................... + | ......................... |

५. निम्नलिखितानां पदानां समासविग्रहः करणीयः –

(अ) गुरुकुलम् ..................................................

(ब) मन्त्रोच्चारणम् ..................................................

(स) बुद्धिचातुर्यम् ..................................................

(द) वार्षिकोत्सवः ..................................................

(य) स्वराज्यभावना ..................................................

(र) विश्वपरिवारः ..................................................

६. निम्नलिखितानां पदानां सन्धिविच्छेदः करणीयः –

(अ) मृगाणाञ्च ..................................................

(ब) मन्त्रोच्चारणम् ..................................................

(स) स्वाध्यायकालोऽयम् ..................................................

(द) आचार्यैव ..................................................

(य) मनुष्यस्त्वद्य ..................................................

(र) सम्प्रत्यस्माकम् ..................................................

७. निम्नलिखितानां वाक्यानां निर्देशानुसारं वाच्यपरिवर्तनं कुरुत–

(अ) अस्माभिः श्लोकाः श्रूयन्ते। (कर्तृवाच्यम्) ..............................

(ब) भवता कथं न स्मर्यते ? (कर्तृवाच्यम्) ..............................

(स) भवान् नित्यं पश्यति। (कर्मवाच्यम्) ..............................

(द) तेन मनोवृत्ति दृश्यते। (कर्तृवाच्यम्) ..............................

# ( 2 ) संस्कृत साहित्यस्य इतिहासः

## ( क ) वैदिकसाहित्यम्

वेद इति शब्दः विद् ( विद् ज्ञाने ) धातोः घञ् प्रत्यये कृते निष्पद्यते। अस्य अर्थोऽस्ति ज्ञानम्। अस्माकं प्राचीनैः ऋषिभिः स्वसाधनया यज्ज्ञानम् अर्जितम् अनुभूतम् वा तस्य संग्रहः वेदेषु वर्तते। वेदः श्रुति इति शब्देन अपि कथ्यते। आचार्याः गुरवः वेदमन्त्राणाम् उच्चारणं कृत्वा शिष्यान् अध्यापयन्ति स्म। शिष्याश्च श्रवणमात्रेण अनवरताभ्यासेन च मन्त्राणां स्मरणं वेदार्थस्यावबोधनं च कुर्वन्ति स्म। अतः गुरुपरम्परया वेदानां संरक्षणं श्रुतिमात्रेण आसीत्।

वेदः आप्तवचनम् अपि। अन्येन येन यस्य ज्ञानं न भवति तस्य ज्ञानं वेदेन एव केनाऽपि प्रकारेण भवति। अतः वेदानां परमं प्रामाण्यं स्वीक्रियते। भारतीयायाः संस्कृतेः वास्तविकं ज्ञानमपि वेदेन एव भवितुं शक्यते। वेदाः अस्माकं कर्तव्याकर्तव्यस्य बोधकाः, प्राचीन-सामाजिकव्यवस्थायाः परिचायकाः, ऐतिहासिकानां तथ्यानां उद्घाटकाः च सन्ति। विश्ववाङ्मये वेदाः एव आदिमाः ग्रन्थाः सन्ति। अतः भाषायाः वैज्ञानिकम् अध्ययनम् अपि वेदाधारितं वर्तते।

### वेदानां रचनाकालः

वेदानां रचनाकाल विषये विद्वत्सु, मतैक्यं नास्ति।

वेदाः अपौरुषेया इति प्राचीन भारतीय विदुषां मतम् अथ च वेदाः अस्माकं शाश्वत निधिरूपाः वर्तन्ते। पाश्चात्य विद्वांसः तेषां च समर्थकाः भारतीयाः विद्वांसः यथाबुद्धिं वेदस्य रचनाकालं निर्धारयन्ति। ऐतेषु विद्वत्सु मैक्समूलर-याकौबी विन्टरनित्स-शंकरबालकृष्णदीक्षित-बालगंगाधरतिलक महोदयाः सन्ति। एतेषां समेषां विदुषां मतानां समालोचनं विद्वद्भिः कृतम्। समालोचनया च निर्णीतम् यत् वेदानां मन्त्रभागस्य निर्माणं प्रथममेव अभवत् - तदनन्तरं महर्षिणा कृष्णद्वैपायन व्यासेन मन्त्राणां संहिताः निर्मिताः। कृष्णद्वैपायनव्यासस्य कालः 3102 ई.पू. आसीत्, अतः वेदानां संहिताकालः अयमेव वर्तते। ज्योतिषशास्त्रस्य गणनानुसारेण तिलकमहोदयेन मन्त्राणां आरम्भिकः निर्माणकालः 6000 ई.पू. स्वीकृतः। तदनन्तरं ब्राह्मण-आरण्यक उपनिषदां, सूत्रसाहित्यस्य च निर्माणं बुद्धकालं यावत् प्रचलितमिति ज्ञेयम्।

### ऋग्वेदः

ऋग्वेदे देवानां स्तुतिमन्त्राणि सन्ति। स्तुतिमन्त्राणि ऋचा इति ज्ञायन्ते। ऋचाभ्यः देवानां यज्ञादिषु कृत्येषु आह्वानं क्रियते। ऋग्वेदस्य शाकलशाखा एव संप्रति उपलभ्यते। अस्यां अग्नि-इन्द्र मरुत-अश्विनौ प्रभृतीनां देवानां स्तुतयः सन्ति। ऋग्वेदस्य दशमण्डलानि सन्ति तेषु 85 अनुवाकाः, 1028सूक्तानि, 10552 मंत्राणि सन्ति। अस्मिन् वेदे धार्मिकानि आध्यात्मिकानि सामाजिक-आर्थिक-राजनैतिक-दार्शनिकतत्त्वानि अन्तर्निहितानि सन्ति। ऋग्वेदे स्तुतिसु प्रयुक्तानां मन्त्राणां द्रष्टारः ऋषयः सन्ति। ते च गृत्समद-विश्वामित्र-वामदेव अत्रि-भरद्वाज-वशिष्ठादयः सन्ति। मन्त्रैः येषां देवानां आह्वानं यज्ञेषु क्रियते, ते देवाः यज्ञे आगत्य यजमानस्य कामनानां पूर्तिं कुर्वन्तीति विश्वासः।

### यजुर्वेदः -

यजुर्वेदः कर्मकाण्डस्य वेदः अस्ति। यजुर्वेदे येषां मन्त्राणां संग्रहः वर्तते मन्त्रास्ते यजुष् इति नाम्ना आख्यायन्ते। यजुर्वेदस्य द्वौ भागौ स्तः शुक्ल यजुर्वेदः कृष्णयजुर्वेदश्चेति। एते मन्त्राः विविधेषु यज्ञेषु पठ्यन्ते। शुक्लयजुर्वेदः विशुद्धं

मन्त्रात्मकः अस्ति, किन्तु, कृष्णयजुर्वेदे तेषां मन्त्राणां व्याख्या, विवरणं विनियोगाँश्च वर्तन्ते। अतः अयं वेदः कृष्णयजुर्वेदः कथ्यते। शुक्लयजुर्वेदस्य माध्यन्दिनी अथवा वाजसनेयीसंहिता काण्व संहिता च स्तः। कृष्णयजुर्वेदस्य चतस्रः संहिताः उपलभ्यन्ते तैत्तरीयसंहिता, मैत्रायणीसंहिता, काठकसंहिता, कपिष्ठलकठसंहिता चेति। यजुर्वेदस्य मन्त्राणां पुरोहितः अध्वर्युः कथ्यते।

**सामवेदः –**

ऋग्वेदस्य मन्त्राः यदा विशिष्टगानपद्धत्या गीयन्ते, तदा ते सामन् इति नाम्ना कथ्यन्ते। सामन् इति शब्दस्य अर्थः एव गानम् वर्तते। यज्ञावसरे उद्गाता एतेषां मन्त्राणां गायनं करोति। सामवेदे सौम-सोमरसस्य-सोमपानस्य-सोमयागस्य वैशिष्ट्यं वर्तते। सोम एव ब्रह्म तत्त्वं अस्ति। अतः संगीतेन भक्त्या च तस्य ब्रह्मणः प्राप्तिः सामवेदे क्रियते।

सामवेदस्य तिस्रः शाखाः उपलभ्यन्ते राणायनीयः कौथुमीयः, जैमनीयः अथवा तलवकारः इति। अयं वेदः पूर्वार्चिकः, उत्तरार्चिकः इति भेदेषु विभक्तः। पूर्वार्चिके अग्नि-इन्द्र-पवमान सोमस्य सम्बन्धिनः मन्त्राः सन्ति। एतेषां मन्त्राणां रागस्य लयस्य च प्रयोगः उत्तरार्चिके वर्तते। सामवेदस्य मन्त्रसंख्या 1875 अस्ति।

**अथर्ववेदः –**

अथर्ववेदः अथर्वन् इति शब्देन निष्पन्नः। अस्मिन् वेदे ब्रह्मसाक्षात्कारविद्यायाः आत्मविद्यायाः वा उपदेशः वर्तते। अस्य वेदस्य प्राचीनं नाम अथर्वाङ्गिरसवेदः अस्ति। अयं ब्रह्मवेदः अपि कथ्यते। अस्य द्वे शाखे उपलभ्येते शौनकीयशाखा, पैप्पलादशाखेति। अयं वेदः विंशतिकाण्डेषु विभक्तः। वेदेस्मिन् तस्मिन् समये प्रचलितानां रीति-नियमादीनां, प्रथानां, मारणोच्चाटन-अभिचाराणां, संमोहनादिविद्यानां, ओषधीनां, ऐन्द्रजालकानां वर्णनं उपलभ्यते। भारतीय-समाजस्य सभ्यतायाः संस्कृतेश्च ज्ञानं, इतिहासस्य च ज्ञानं अथर्ववेदेन जायते।

**ब्राह्मणग्रन्थाः –**

ब्रह्मन् शब्दः वेदे मन्त्र, यज्ञ, रहस्यादीनाम् अर्थानां वाचकः। अतः ब्राह्मणग्रन्थेषु मन्त्राणां व्याख्यानं क्रियते।

ब्राह्मणं नाम कर्मणस्तन्मन्त्राणां व्याख्यान ग्रन्थः।

यज्ञीय कर्मकाण्डस्य नियमाः, यज्ञस्य महत्त्वाख्यापनम्, आध्यात्मिक विचाराणां समन्वयः एतेषु ग्रन्थेषु उपलभ्यते। मन्त्राणां यज्ञे कथं विनियोगः कार्यः इति विवेचना एतेषु ग्रन्थेषु क्रियते। ब्राह्मणग्रन्थानां भाषा सरला, सरसा, प्रसादगुणा च अस्ति। ऋग्वेदस्य ऐतरेयः शांखायनः इति द्वौ ब्राह्मणग्रन्थौ। शुक्लयजुर्वेदस्य शतपथब्राह्मण, कृष्णयजुर्वेदस्य तैत्तरीयब्राह्मण, सामवेदस्य पंचविशब्राह्मणः, षड्विंशब्राह्मणः, सामविधान-आर्षेय-दैवत-छान्दोग्य-संहितोपनिषद्, वंश-जैमनीयब्राह्मणाः, अथर्ववेदस्य गोपथ ब्राह्मणः।

**उपनिषद् –**

उपनिषद् शब्दः उप +नि उपसर्गपूर्वकं सद् धातोः क्विप् प्रत्यये कृते निष्पन्नः भवति। उप-समीपे निश्चयेन निष्ठया वा सद् – उपवेशनं। तत्त्वज्ञानाय गुरुसमीपे निष्ठया श्रद्धया वा उपवेशनम् उपनिषद् इति शब्दस्य अर्थः अस्ति। तत्त्वज्ञानस्य ब्रह्मज्ञानस्य वा प्राप्त्या मनुष्यः स्व अज्ञानावरणं दूरीकृत्य आधिभौतक-आधिदैविक-आध्यात्मिकानां दुःखानां नाशः मोक्ष प्राप्तये च प्रयासः कर्तुं शक्यते।

सद् धातोः सदलृविशरण गत्यवसादनेषु इति त्रय अर्थाः सन्ति। विशरण विनाशः येन संसारस्य अविद्यायाः नाशं भवति। गति- प्राप्तिः - येन ब्रह्मणत्वस्य प्राप्तिर्भवति। अवसादनम्-शैथिल्यम् - येन मनुष्यस्य दुःखादयः शैथिल्यं यान्ति।

उपनिषदः एकादश सन्ति ईश-केन-कठ-प्रश्न-मुण्डक-माण्डूक्य-तैत्तिरीय-ऐतरेय-छान्दोग्य-बृहदारण्यक-श्वेताश्वतराः इति।

**आरण्यकग्रन्थाः -**

अरण्ये अध्ययनं क्रियते इत्यनेन एते आरण्यकग्रन्थाः। एतेषु ग्रन्थेषु आत्मविद्यायाः तत्त्वचिन्तनं रहस्य विद्यायाः च वर्णनं वर्तते। उपनिषद् ग्रन्थेषु येषां आत्मनः, परमात्मनः, सृष्टेः, कर्मणः तत्त्व ज्ञानादीनां वर्णनं उपलभ्यते, तेषां तत्त्वानां प्रारम्भिकं ज्ञानं आरण्यकेषु प्राप्यते। एते ग्रन्थाः गृहस्थनिवृत्तानां वानप्रस्थानां कृते सन्ति। ते वने निवसन्तः स्वाध्याय-जप-तपः-मनन-चिन्तनादिकं कुर्वन्ति। आरण्यका प्रतिवेदानुसारं वर्तन्ते यथा ऋग्वेदस्य द्वे आरण्यके ऐतरेय-आरण्यकं, शांखायन-आरण्यकं चेति। कृष्णयजुर्वेदस्यापि तैत्तरीयारण्यकं मैत्रायणीय -आरण्यकं सामवेदस्य तलवकार-आरण्यकं, छान्दोग्य-आरण्यके। अथर्ववेदस्य किमपि आरण्यकम् उपलब्धं नास्ति।

**वेदाङ्गानि -**

वेदस्य अङ्गानि वेदाङ्गानि कथ्यन्ते। अङ्गयन्ते ज्ञायन्ते एभिरिति अङ्गानि। वस्तुनः यथार्थ रूपस्य ज्ञानं अङ्गेभ्यः भवति। वेदानां वेदाङ्गानि षड्विधानि सन्ति - शिक्षा-कल्प-व्याकरण - छन्दः-निरुक्त-ज्योतिष संज्ञकानि। शिक्षायां वेदमन्त्राणां उच्चारणस्य शिक्षा प्रदीयते। वर्णस्य उच्चारणस्थानं प्रयत्नः, कति स्वराः सन्ति, कस्य स्वरस्य कस्मात् स्थानात् उच्चारणं भवति - इत्यादय विषयाः शिक्षाग्रन्थेषु वर्णिताः। वेदस्य प्रत्येक शाखा-सम्बद्धा शिक्षाग्रन्थाः प्रातिशाख्यग्रन्थाऽपि कथ्यन्ते। शिक्षायाः अपि षड् अङ्गानि सन्ति - वर्ण-स्वर-मात्रा-बल-साम संतानञ्चैतानि।

मुखं व्याकरणं स्मृतम् एवं व्याकरणं वेदस्य मुखरूपेण मन्यते। व्याक्रियन्ते विविच्यन्ते शब्दाः अनेनेति व्याकरणम् अर्थात् यस्मिन् शब्दस्य प्रकृति-प्रत्ययादीनां च विवेचनं क्रियते तद् व्याकरणम् भवति। व्याकरणस्य पञ्च प्रयोजनानि सन्ति - रक्षा (वेदानां रक्षा) ऊहः विभक्त्यादीनां यथास्थानं परिवर्तनम्। आगमः (वेदाध्ययनम्) लघुः (शब्दज्ञानं संक्षेपे), असंदेहः (सन्देहनिवारणम्) इति।

**कल्पः -**

कल्पो हि नाम वेद विहितानां कर्मणामानुपूर्व्येण कल्पना शास्त्रम् - अर्थात् एतेषु ग्रन्थेषु वैदिकानां कर्मणां क्रमबद्धेन व्यवस्थितरूपेण वा वर्णनं वर्तते। कल्पग्रन्थाः चतुष्प्रकारकाः सन्ति -

श्रौतसूत्राणि, गृह्यसूत्राणि, धर्मसूत्राणि, शुल्ब सूत्राणि चेति। वैदिकयज्ञानां क्रमबद्धवर्णनं श्रौतसूत्रेषु प्राप्यते। गृह्यसूत्रेषु षोडशसंस्काराणां, पञ्चमहायज्ञानां, पाकयज्ञानां, गृहनिमणिस्य, गृहवेशस्य, पशुपालस्य, च इत्यादीनां विषयानां वर्णनम् अस्ति। धर्मसूत्रेषु-धर्मस्य, नीतेः, रीतीनां, प्रथानां, चतुर्विधवर्णानाम् आश्रमाणां च कर्तव्यानां, सामाजिकनियमानां उल्लेखो वर्तते।

शुल्ब सूत्रेषु यज्ञवेद्याः निर्माणं तस्याः मापविषयकाः च नियमाः निरूपिताः। भारतीयस्य प्राचीन ज्यामिति विषयस्य दर्शनं एतेषु ग्रन्थेषु भवति। प्राचीनतमं गणितशास्त्रं अपि एतेषु ग्रन्थेषु दृश्यते।

**छन्दः –**

वैदिकमन्त्राणां सम्यग्रूपेण उच्चारणाय छन्दसां ज्ञानमनिवार्यम्। छन्दांसि छादनात् अर्थात् छन्दोगत भावानां आच्छादनं सम्यग्रूपेण प्रकाशनं वा क्रियते। छन्दोज्ञानं शांखायन श्रौतसूत्रे, ऋग्वेदप्रातिशाख्ये सामवेदस्य निदानसूत्रे, पिंगलप्रणीते छन्दः सूत्रे च उपलभ्यते।

निरुक्तग्रन्थे वैदिकशब्दानाम् अर्थः निर्वचनपद्धत्या प्रदत्तः। अस्य ग्रन्थस्य रचयिता महर्षिः यास्कः आसीत्। निघण्टु इति वैदिक शब्दकोषस्य व्याख्या एव निरुक्तं वर्तते। निघण्टु ग्रन्थे पञ्च-अध्यायाः सन्ति। निरुक्ते-वर्णागम-वर्णविपर्ययः-वर्णविकार-वर्णनाशः इत्येवं धातूनां अनेकेषु अर्थेषु प्रयोगः वर्तते।

ज्योतिषग्रन्थानाम् उपयोगिता वैदिकयज्ञ-यागानां शुभ-उपयुक्तं च मुहूर्त-निर्धारणाय अस्ति। आचार्य लगधस्य वेदांगज्योतिषं इति ग्रन्थः ज्योतिषशास्त्रस्य प्राचीनतमः ग्रन्थः वर्तते।

## अभ्यास

1. रिक्तस्थानानि पूरयत –

(अ) विश्वसाहित्यस्य आदिमः ग्रन्थः ................ अस्ति।
(ब) वेद शब्दे ................. धातु अस्ति।
(स) तिलकमहोदयेन वेदानां आरम्भिकं रचनाकालं ................. स्वीकृतम्।
(द) ऋग्वेदस्य .............. शाखा सम्प्रति उपलभ्यते।
(य) मन्त्राणां द्रष्टारः .................. कथ्यन्ते।
(र) कर्मकाण्डस्य वेदः .................. अस्ति।
(ल) यजुर्वेदस्य द्वौ भागौ .................... स्तः।
(र) सामन् इति शब्दस्य अर्थः ............... अस्ति।
(ल) ओषधीनां ज्ञानं ................ वेदेन भवति।
(व) अथर्ववेदस्य .................. ब्राह्मणः वर्तते।
(श) आरण्यकाः ग्रन्थाः .............. कृते निर्मिताः।
(ष) शिक्षाग्रन्थेषु वेदमन्त्राणां ............... शिक्षा प्रदीयते।
(स) व्याकरणं ................. मुखं मन्यते।
(क) शुल्बसूत्रेषु ............... निर्माणस्य नियमाः निरूपिता।
(ज) निरुक्तस्य रचयिता महर्षिः .............. आसीत्।

2. कति वेदाः कश्च तेषां स्वरूपः?
3. उपनिषद् इति शब्दस्य कोऽर्थः?
4. वेदाङ्गानि कति?
5. ब्राह्मणग्रन्थेषु कः विषयः विवेचितः?

---------

# ( ख ) लौकिकसाहित्यम्

**( क ) काव्यानि –**

**रामायणम्**

रामायणम् आदिकाव्यं वर्तते। अस्य रचयिता महर्षिः वाल्मीकिः आदिकवि मन्यते। विद्वांसः अस्य ग्रन्थस्य रचनाकालं पञ्चम्याः शताब्द्याः ई.पू. कालात् पूर्वमेव मन्यन्ते। भारतीयसंस्कृतौ रामः समाजस्य आदर्शः वर्तते। स च मर्यादापुरुषोत्तमः इत्येवं पूज्यते। रामः आदर्शपुत्रः, आदर्शभ्राता, आदर्शपतिः, आदर्शशासकः, आदर्शमनुष्यश्च आसीत्। अस्मिन् ग्रन्थे भारतीया संस्कृतिः उत्कृष्टरूपेण वर्णिता। रामायणं सप्तकाण्डेषु विभक्तं वर्तते। बालकाण्ड-अयोध्याकाण्ड अरण्यकाण्ड-किष्किन्धाकाण्ड-सुन्दरकाण्ड-युद्धकाण्ड-उत्तरकाण्डानि इति। ग्रन्थोऽयं चतुर्विंशति साहस्री संहितानाम्नाऽपि कथ्यते। यतो हि अस्मिन् चतुर्विंशति-सहस्रश्लोकाः सन्ति। इदं काव्यं उपजीविकाव्यं, आचारशास्त्रं, सांस्कृतिक-सामाजिक शास्त्रञ्च अस्ति।

रामायणग्रन्थस्य भाषा सरला-सरसा, माधुर्यगुणयुक्ता, च वर्तते। अयं ग्रन्थः अनुष्टुपछन्दसि रचितः किन्तु सर्गान्तेषु इन्द्रवज्रा-उपजाति इत्यादयः छन्दांसि अपि मिलन्ति। रामायणं करुणरस-प्रधानकाव्यमस्ति। एकदा महर्षिः वाल्मीकिः तमसानदीतटे स्नानार्थम् अगच्छत्। तत्र महर्षिः क्रौञ्चयुगले एकस्य पक्षिणः निषादेन व्यापादिते अन्यस्य विलापं पश्यति स्म। तं विलापं दृष्ट्वा महर्षेः मनसि स्थितः स्थायीभावः शोकः करुणरसरूपेण प्रवाहित तेन लौकिक संस्कृतस्य प्रथमं काव्यरूपेण अयं श्लोकः –

***मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीःसमाः।***
***यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।***

**महाभारतम्**

महाभारतस्य रचयिता महर्षिः वेदव्यासः अस्ति। अयं ग्रन्थः अष्टादशपर्वसु विभक्तः वर्तते। अस्य रचनाकालमपि ई०पू० पञ्चम्याः शताब्द्याः पूर्वमेव विद्वद्भिः स्वीकृतम्। अस्य रचना त्रिषु स्तरेषु जाता प्रथमं जयरूपेण, द्वितीयः भारतरूपेण, तृतीयः च महाभारतम् इति रूपेण प्रसिद्धम्। ग्रन्थेऽस्मिन् चतुर्वर्गाणां धर्म-अर्थ-काम-मोक्षणां सर्वे विषयाः निरूपिताः। अतएव अस्मिन् एव ग्रन्थे उद्धृतोऽयं श्लोकः –

***धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।***
***यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित्।।***

(महा. आदि 62/63)

ग्रन्थेऽस्मिन् भगवता श्रीकृष्णेन उपदिष्टा गीताऽपि उल्लिखिता। महाभारतस्य सामाजिक-सांस्कृतिक-राजनैतिक-आध्यात्मिकरूपेण अत्यधिकं महत्त्वं वर्तते। अस्य विषयवस्तु गृहीत्वा अन्ये बहवः कवयः काव्यानि अरचयन्। अतः महाभारतं उपजीविकाव्यमपि कथ्यते। अस्मिन् उपमा-रूपकोत्प्रेक्षा अर्थान्तरन्यास इत्यादीनाम् अलंकाराणां वर्णनं वर्तते। इदं काव्यं वीररसप्रधानम् अस्ति।

**कुमारसम्भवम्**

इदं महाकाव्यं कविकुलगुरुणा कालिदासेन विरचितम्। कालिदासः विक्रमादित्यस्य नृपस्य राज्यसभायां नवरत्नेषु राजते स्म। महाकविना स्वकाव्येषु निजपरिचयं कथमपि न प्रदत्तम्। अतः विद्वत्सु अस्य महाकवेः

जन्मस्थानस्य कालस्य च विषये मतैक्यं नास्ति। तथापि विक्रमादित्यस्य राज्ञः कालक्रमानुसारेण ई.पू. प्रथमशताब्द्यां जन्मकालम् उज्जयिन्यां च निवासस्थानं विद्वांसः स्वीकुर्वन्ति। कालिदासस्य सप्तकृतयः सन्ति। अभिज्ञानशाकुन्तलं, विक्रमोर्वशीयं, मालविकाग्निमित्रं इति त्रीणि नाटकानि। रघुवंशं-कुमारसंभवमिति द्वे महाकाव्ये, मेघदूतं ऋतुसंहारमिति द्वे खण्डकाव्ये।

कुमारसंभवेऽस्मिन् महाकाव्ये हिमालयस्य पुत्र्या पार्वत्या सह भगवतः शिवस्य विवाहः तदनन्तरं कुमारकार्तिकेयस्य उत्पत्तिः वर्णिता। सप्तदशसर्गात्मकमिदं महाकाव्यम्। अस्य अष्टसर्गेषु आचार्यमल्लिनाथस्य टीकाऽपि वर्तते। प्रथम सर्गे हिमालयस्य वर्णनं पार्वत्या जन्मनः च वर्णनमस्ति। द्वितीये सर्गे तारकासुरेण पीड़ितानां देवानां ब्रह्मणः समीपे गमनं वर्णितम्। ब्रह्मणा च पार्वत्याः पुत्रः स्कन्दकुमारः तारकासुरवधस्य एकमेव उपायः इति निगदितः। तृतीयसर्गे भगवतः शिवस्य तपस्यायां कामदेवेन कृतस्य विघ्नस्य शिवेन च कामदेवस्य भस्मसात्करणस्य वर्णनम्। चतुर्थ सर्गे कामदेवस्य पत्न्याः रतेः विलापः। पञ्चमे सर्गे पार्वत्याः तपस्यायाः शिवस्य पार्वत्या सह संलापस्य वर्णनम्। षष्ठे सर्गे पार्वत्या सह शिवस्य विवाहार्थं सप्तर्षिणा हिमालयसकाशं गमनम्। सप्तमे सर्गे शिवस्य वर यात्रा पार्वत्या च परिणयो वर्णितः। अष्टमे सर्गे शिवस्य पार्वत्या सह दाम्पत्यवर्णनं विहारं च वर्णितम्। नवमे सर्गे पार्वतीपरमेश्वरयोः दाम्पत्यसुखानुभवं सर्वत्र पर्वतादिषु च भ्रमणं कैलाशपर्वतं च प्रत्यावर्तनं वर्णितम्। दशमे सर्गे कुमारकार्तिकेयस्य गर्भस्थितिः वर्णिता। एकादशसर्गे कुमारस्य जन्मनः कुमारस्य च बाल्यावस्थायाः वर्णनं, द्वादश सर्गे कुमारस्य सेनापतित्वं, त्रयोदशसर्गे कुमारेण सैन्य-संचालनस्य, चतुर्दशसर्गे देवसेनायाः आक्रमणार्थं प्रस्थानस्य पञ्चदशसर्गे देवासुरसैन्यसंघर्षस्य, षोडश सर्गे युद्धस्य, सप्तदशसर्गे तारकासुरवधस्य च वर्णनं विद्यते।

अस्मिन् महाकाव्ये कालिदासस्य भाषा रसानुकूला पदलालित्येन परिपूर्णा च वर्तते। उपमाअलंकारः कालिदासस्य अतीव प्रियः अलंकारः सर्वत्र दृश्यते। अन्येषां रूपकोत्प्रेक्षा-अर्थान्तरन्यास इत्यादीनामपि अलंकाराणां कालिदासेन शोभनं वर्णनं कृतम्। महाकाव्ये कालिदासेन वैदर्भीरीत्याः प्रसादगुणस्य च संयोजनं कुशलतया विहितम्। अस्मिन् महाकाव्ये कालिदासेन भोगस्योपरि त्यागस्य वैराग्यस्य च प्रतिष्ठायाः संदेशोऽपि साफल्येन प्रदत्तः।

**रघुवंशमहाकाव्यम् -**

इदं महाकाव्यं महाककविकालिदासेन प्रणीतम्। अस्य गणना लघुत्रय्यां भवति। कालिदासः अस्य काव्यस्य श्रेष्ठतायाः कारणात् रघुकारः नाम्ना प्रसिद्धः (क इह रघुकारे न रमते)। कालिदासस्य जन्म काले अधापि विदुषां मतैक्यं नास्ति। तथापि विक्रमादित्यस्य नृपस्य आश्रये राज्यसभायां नवरत्नेषु कालिदासस्य स्थितिः घोषिता। अतः अस्य जन्मकालः ई.पू. प्रथमशताब्द्यां विद्वद्भिः मानितः निवास स्थानं च उज्जयिनी मन्यते। रघुवंश महाकाव्ये ऊन्विंशति सर्गाः सन्ति। अस्मिन् दिलीपनृपाद् आरभ्य अग्निवर्णनृपं पर्यन्तं, ऊनत्रिंशत् नृपाणां वर्णनं विद्यते। इक्ष्वाकुवंशीय रघौ नृपे प्रतापस्य, वीरतयाः, दानशीलतायाः, प्रजा रञ्जनस्य च उत्कृष्टानां गुणानां समन्वयो वर्तते। अतः अस्य वंशस्य नाम रघुकुलं इत्येवं प्रख्यातम्। तेनैव च अस्य महाकाव्यस्यापि नाम रघुवंशमहाकाव्यम् इति कालिदासेन कृतम्।

अस्मिन् महाकाव्ये कविना सामाजिकानां आदर्श मूल्यानां, वर्णाश्रम व्यवस्थायाः, ब्राह्मणादीनां कर्तव्याणां, राज्यसंचालनस्य प्रजारञ्जनस्य राज्य धर्माणाम् अपि आदर्शानां प्रस्तुतीकरणम् विहितम्। अतएव अस्मिन् महाकाव्ये भारतीयायाः संस्कृतेः चित्रणं शोभनतया परिलक्ष्यते।

कालिदासः वैदर्भीरीत्याः कवि अस्ति। एवमेव माधुर्य प्रसादयोः गुणयोः समावेशः महाकाव्ये अभवत्। उपमा कालिदासस्य इति आभाणकः तु प्रसिद्ध एव वर्तते - रघुवंशस्य षष्ठे सर्गे कालिदासेन इन्दुमत्या राज्ञ्या उपमा दीपशिखया दत्ता - अतएव कालिदासः दीपशिखा कालिदासः इत्येवं विद्वत्सु विख्यातः।

*सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा*
*नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स सभूमिपाल ।।*

(रघु 6/67)

## किरातार्जुनीयम्

किरातार्जुनीयम् इति महाकाव्यस्य प्रणेता महाकविः भारविः अस्ति। अस्य काव्यस्य रचनाकालः षष्ट्यधिकं पंचशती (ई. 560) वर्तते। महाकाव्ये कौरवान् विजेतुं पाशुपतास्त्रस्य प्राप्त्यर्थं अर्जुनस्य हिमालये तपस्या वर्णिता। तत्र च किरातवेशधारिणा शिवेन सह अर्जुनस्य युद्धं वर्णितम्। युद्धकौशलेन प्रसन्नेन शिवेन अर्जुनः पाशुपतास्त्रं प्राप्नोति। अस्मिन् महाकाव्ये अष्टादश सर्गाः सन्ति। सर्गानुसारिणी कथा एवं प्रस्तूयते। प्रथम सर्गे - वनेचर-दूतस्य युधिष्ठिरेण सह द्वैतवेने मेलनम्। तत्र दुर्योधनस्य राज्यव्यवस्थायाः वर्णनम्। युधिष्ठिरेण च द्रौपद्या सह कौरवाणां कर्तव्यविषयक संवादस्य वर्णनम्। द्वितीय सर्गे युधिष्ठिरभीमयोः परस्परसंवादः व्यासस्य आगमनञ्च। तृतीय सर्गे युधिष्ठिरव्याससंवादः, व्यासस्य च अर्जुनस्य कृते हिमालयं गत्वा पाशुपतास्त्राय तपस्यायाः आदेशः। अर्जुनस्य च हिमालयं प्रति प्रस्थानम्। चतुर्थसर्गे शरद् ऋतोः वर्णनम्। पञ्चमे सर्गे हिमालयवर्णनम्। षष्ठे सर्गे-हिमालये अर्जुनस्य तपस्यायाः वर्णनम्। तपस्यायां विघ्नार्थं इन्द्रेण अप्सरसां प्रेषणम्। सप्तमे सर्गे गान्धर्वाणां अप्सरसां च विलासवर्णनम्। अष्टमे सर्गे गन्धर्वाणां अप्सरसां च उद्यानक्रीडा-जलक्रीडा वर्णिता। नवम सर्गे - सायंकालस्य, चन्द्रोदयस्य, सुरतप्रभातवर्णनम्। दशमे सर्गे वर्षया अप्सरसां प्रयत्न वैफलस्य वर्णनम्। एकादशसर्गे मुनिरूपे इन्द्रस्यागमनम् इन्द्रार्जुनसंवादः, इन्द्रस्य पाशुपतास्त्रस्य प्राप्त्यर्थं शिवाराधनाय अर्जुनं प्रतिकथनम्। द्वादशसर्गे अर्जुनस्य तपस्यायाः वर्णनम्, शूकररूपस्य मूकदानवस्य अर्जुनवधार्थमागमनम्। किरातवेशधारी शिवस्यापि आगमनम्। त्रयोदश सर्गे शूकररूपधारिणि मूकदानवे शिवेन अर्जुनेन च शराणां सन्धानम्, चतुर्दश सर्गे वराहस्य मृत्युः, कस्य बाणेन स मृतायुः अभवदिति अत्र शिवानुचरस्य अर्जुनस्य च विवादः जातः। चतुर्दश सर्गे सेनया सह शिवस्यागमनम्, अर्जुनेन च सह युद्धम्, पञ्चदशसर्गे चित्रयुद्धवर्णनम्, षोडशसर्गे शिवार्जुनस्य च अस्त्रयुद्धम्। सप्तदशसर्गे सेनया सह अर्जुनस्य युद्धम्, शिवार्जुनस्य च युद्धम्। अष्टदशसर्गे शिवार्जुनस्य मल्लयुद्धं तदनन्तरं शिवस्य स्वस्वरूपे प्राकट्यम् इन्द्रादीनां च आगमनम्। पाशुपतास्त्रस्य प्राप्तिः। इन्द्रादीनामपि देवानां अर्जुनस्य कृते विविधानां अस्त्राणां प्रदानम्। अर्जुनस्य सिद्धिं प्राप्य युधिष्ठिरसमीपे प्रत्यागमनम्।

इदं काव्यं बृहत्त्रय्यामपि परिगण्यते। अस्मिन् अर्थगौरवस्य प्राधान्यात् भारवेरर्थगौरवमिति आभाणकं प्रसिद्धम्। स्वल्पशब्देषु गंभीरार्थकथनं अर्थगौरवं भवति। भारवेः वाण्यां सुभाषितेषु वा वेद-दर्शन-नीति-राजनीति-पुराण-ज्योतिष-कृषि-कामशास्त्र-काव्यशास्त्रादीनां बहूनां विषयाणां गाम्भीर्यं पाण्डित्यं च प्राप्यते।

## शिशुपालवधम् -

शिशुपालवधं महाकाव्यं महाकविमाघस्य कृतिरस्ति। माघस्य जन्मकालः पञ्चसप्त्यधिकं षट्शती (675 ई.) वर्तते। महाकाव्यमिदं बृहत्त्रय्यामपि परिगणितम्। देवर्षिणा नारदेन शिशुपालस्य पूर्वजन्मनि तेन कृतानाम् अत्याचाराणाम् उल्लेखं कृत्वा श्रीकृष्णः शिशुपालवधाय प्रार्थितः। श्रीकृष्णः युधिष्ठिरस्य राजसूययज्ञे इन्द्रपस्थम् अगच्छत्। इन्द्रप्रस्थे शिशुपालेन श्रीकृष्णं प्रति अभद्राचरणं कृतम्। तस्मात् श्रीकृष्णः शिशुपालस्य वधमकरोत्। उपर्युक्तायाः कथायाः माघेन स्वप्रतिभया काव्यवैशिष्ट्येन प्रभावपूर्णं वर्णनं कृतम्।

माघस्य काव्ये उपमायाः सौंदर्यं, अर्थस्य गांभीर्यं, पदलालित्यम् इति त्रयाणाम् एव काव्यगुणानां संयोजनं दृश्यते। अतः विद्वत्सु माघे सन्ति त्रयोगुणाः इति आभाणकः प्रसिद्धः।

*उपमा कालिदासस्य भारवेरर्थगौरवम्।*
*दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः।।*

विविधशास्त्राणां काव्ये वर्णनेन माघस्य बहुज्ञता ज्ञायते। एवमेव नवसर्गपर्यन्तम् एव विशालः शब्द-भण्डारः माघेन प्रयुक्तः। यथोक्तम् – नवसर्गगते माघे नवशब्दो न विद्यते। गजरूपिणः रैवेतकपर्वतस्य एकतः सूर्योदयम् अपरतः चन्द्रास्तं वर्णितवान् माघः। अतः स घण्टामाघ इत्युपाधिना समलंकृतः।

**नैषधीयचरितम् –**

नैषधीयचरितम् इति महाकाव्यस्य गणना बृहत्त्रय्यां क्रियते अस्य रचयिता श्रीहर्षः आसीत्। अस्मिन् महाकाव्ये द्वाविंशति सर्गाः सन्ति। इदं महाकाव्यं पाण्डित्यपूर्णं विद्यते। क्लिष्टेभ्यः श्लिष्टेभ्यः च प्रयोगेभ्यः विषयवैविध्येन च उत्कृष्टं इदं काव्यम्। अस्मिन् अनेकशास्त्रीयसिद्धान्तानां वर्णनं कृतम्। एतैः कारणैः नैषधं विद्वदौषधम् इति आभाणकम् अपि प्रसिद्धम्।

श्री हर्षस्य कालः द्वादश्याः शताब्द्याः उत्तरार्धे विद्वद्भिः निश्चीयते। वैशेषिक-सांख्य-योग-वेदान्त-मीमांसा-चार्वाक-बौद्ध-जैनदर्शनानां गंभीर सिद्धान्ताः अत्र वर्णिताः। अतएव सामान्य पाठकानां कृते अस्मिन् महाकाव्ये अर्थावगमः दुष्करः। अस्मिन् महाकाव्ये नलस्य दमयन्त्या सह प्रेम्णः परिणयस्य च कथा वर्णिता। नलः दमयन्त्याम् अनुरक्तः एकदा पर्यटन् कश्चिद् हंसं गृहीतवान्। पुनः दयया हंसं मुञ्चति। हंसः प्रत्युपकारस्य भावनया नलस्य प्रशंसां दमयन्तीसमीपे करोति। तेन दमयन्त्यां पूर्वरागः उदयति। नृपः विदर्भः स्वपुत्र्याः दमयन्त्याः स्वयंवरम् आयोजयति। स्वयंवरे दमयन्तीकामुकाः इन्द्रयमवायुकुबेराः देवाऽपि आगताः नलरूपं गृहीत्वा च स्वयंवरसभायाम् उपविष्टाः। समान स्वरूपान् पञ्चनलान् दृष्ट्वा दमयन्ती भ्रमावस्थायां गता। एतेषु कः यथार्थः नलः इति चिन्तयति। तदनन्तरं दमयन्त्याः पातिव्रत्येन दृढानुरागेण च प्रीताः देवाः स्ववास्तविकं स्वरूपं प्रकटयन्ति। एतेन दमयन्ती वास्तविकं नलं वरयति सुखेन च दाम्पत्यं जीवनं यापयति।

**(ख) खण्ड-काव्यानि –**

**मेघदूतम् –**

मेघदूतम् एकं गीतिकाव्यं वर्तते। अस्य रचयिता महाकवि कालिदासः अस्ति। शास्त्रीयदृष्ट्या गीतिकाव्यं खण्डकाव्यमपि कथ्यते। खण्डकाव्यं महाकाव्यस्य कस्यचिदस्य एकदेशस्य अनुसरणं करोति। खण्डकाव्यं भवेत् काव्यस्य एकदेशानुसारि च यत्। गीतिकाव्ये मुक्तकपद्यानां समावेशः क्रियते। पद्येषु भावप्राधान्यं भवति। ऋग्वेदे विद्यमानानि स्तुतिसूक्तानि एतेषां गीतिकाव्यानां आदिस्रोतरूपेण मन्यन्ते। कालिदासेन द्वे गीतिकाव्ये प्रणीते मेघदूतम् ऋतुसंहारञ्चेति। मेघदूतं कालिदासस्य एका उत्कृष्टा परिष्कृता रचना अस्ति, अस्य द्वौ भागौ स्तः पूर्वमेघम् उत्तरमेघञ्च। पूर्वमेघे त्रिषष्टिः श्लोकाः उत्तरमेघे च द्विपञ्चाशद् श्लोकाः वर्तन्ते। मेघदूतकाव्ये कस्यचिद्विरहिणः यक्षस्य कथा वर्तते।

पूर्वमेघे – कश्चिद् यक्षः स्वकार्ये औदासिन्यात् कुबेरेण शापितः। फलतः यक्षः स्वप्रियायाः वियुक्तः सन् एकवर्षं यावत् राजाज्ञां पालयन् रामगिरिपर्वते स्वनिवासम् अकरोत्। तत्र अष्टौ मासान् कथंचिद् व्यतीत्य आषाढमासस्य प्रथमे दिने पर्वतस्य शिखरे मेघं दृष्टवा प्रियास्मरणेन विह्वलः जातः। अपि च प्रियायाः कृते मेघं दूतरूपेण मत्वा तं सन्देशप्रदानाय उद्यतोऽभूत्। सन्देशदानेन सह स यक्षः मेघसमक्षं रामगिरिपर्वतात् अलकानगरीपर्यन्तं मेघमार्गस्यापि वर्णनम् अकरोत्। मेघमार्गे स्थितानां प्रदेशानां, नगराणां, पर्वतानां-नदीनां च चित्रणं महाकविना स्वप्रतिभया उत्कृष्ट भाषाशैल्या भावप्रवणतया च कृतम्।

तेषु विशिष्ट स्थलेषु मालप्रदेश:, आम्रकूटपर्वत:, नर्मदा नदी, विदिशा, नीचगिरि, निर्विन्ध्या नदी, उज्जयिनी, उज्जयिन्यां महाकाल:, शिप्रानदी, देवगिरि:, चर्मण्वती नदी, कुरुक्षेत्रम्, सरस्वती नदी, कनखलक्षेत्रम् गंगानदी, हिमाचलपर्वत:, क्रौञ्चरन्ध्र: कैलाशपर्वत:, अलकानगरी च सन्ति।

उत्तरमेघे कवि, यत्र यक्षस्य प्रिया पत्नी निवसति तस्या: अलकानगर्या:, कुबेर प्रासादस्य, म्लानपद्मिनीसदृश्या: विरहिण्या: यक्षपत्न्या: च वर्णनम् करोति। यक्षपत्न्या: कृते मेघ: चतुर्मासानन्तरं यक्षमिलनस्य आश्वासनयुक्तं सन्देशं ददाति।

मेघदूतस्य कथाया: बीजं वाल्मीकिरामायणं विद्वांस: स्वीकुर्वन्ति। तत्र हनुमत: दौत्यकर्म सुविख्यातं वर्तते। इदं शृङ्गाररसप्रधानं गीतिकाव्यं शृङ्गारेऽपि अत्र विप्रलम्भशृङ्गाररस: वर्णित:। कालिदास: वैदर्भ्या: रीत्या: कवि अस्ति। माधुर्यगुणस्य प्रसादगुणस्य च संयोजने अयं कवि: सिद्ध:। अधुना विश्वसाहित्ये मेघदूतस्य गीतिकाव्यस्य वैशिष्ट्यं एतादृशं विद्यते, येन विश्वस्य अनेकासु भाषासु अस्य काव्यस्य अनुवाद: जात:।

**नीतिशतकम् –**

महाकविना भर्तृहरिणा त्रयाणां शतकानां रचना कृता नीतिशतकम्, शृङ्गारशतकं वैराग्यशतकञ्चेति। भर्तृहरि: विक्रमसंवत प्रवर्तकस्य विक्रमादित्यस्य ज्येष्ठ भ्राता आसीत्, अतएव राजसिंहासनस्य अधिकारी आसीत्, किन्तु महाराज्ञ्या पिंगलया कृतेन विश्वासघातेन आहत: भर्तृहरि वैराग्यं प्राप्तवान्। भर्तृहरे: काल: ख्रीष्टीय 575 त: 650 यावत् ईस्वीय वर्तते। नीतिशतके शिक्षाप्रदा: नीतिश्लोका: वर्तन्ते। तेषु श्लोकेषु आचार शिक्षा, नीति शिक्षा, कर्तव्याकर्तव्यवर्णनम्, परोपकारवर्णनम्, सज्जनप्रशंसा, दुर्जन निन्दा, कर्मफलस्य प्राधान्यं इत्यादय: विषया: निरूपिता: सन्ति। सर्वेऽपि श्लोका: सुभाषिता: मार्मिका: सरला: गम्भीरा। अतएव प्रभावोत्पादका: च सन्ति।

**( ग ) नीतिकथा -साहित्यम् -**

**पञ्चतन्त्रम् -**

पञ्चतन्त्रे ग्रन्थे पञ्चतन्त्राणि सन्ति। मित्रभेद:, मित्रलाभ: सन्धिविग्रह:, लब्धप्रणाश:, अपरीक्षितकारकञ्चेति। प्रतितन्त्रम् एका मुख्या कथा अस्ति। तस्या कथाया: पोषणार्थं विभिन्ना: लघुकथा: निबद्धा:। सर्वासां कथानाम् उद्देश्यम् नीति-सदाचारयो: शिक्षणं वर्तते।

महिलारोप्यनामके नगरे अमरकीर्ति: नाम राजा आसीत्। तस्य राज्ञ: चत्वार: पुत्र आसन्। नीतिशास्त्रेषु व्यावहारिकरूपेण शिक्षितुं कुशलताञ्च विधातुं नृप: विष्णुशर्मा नामकं नीतिशास्त्रविज्ञं पण्डितं आहूय निजमूर्खपुत्रान् समर्पितवान्। पं. विष्णु शर्मा नीतिशिक्षाप्रदा: पशुपक्षिकथा: संश्राव्य स्वल्पकाले एव तान् राजपुत्रान् नीति व्यवहारकुशलान् कृतवान्।

जटिलसंसारे कथं कुशलतया आत्मसम्मानेन च स्वरक्षणं कृत्वा व्यवहारं करणीयम् इति अस्मिनग्रन्थे प्रदर्शितम्। अस्य भाषा सरला-सरसा-भावगम्या च अस्ति। रूचिकरलघुकथा माध्यमेन सद्य एव अर्थावबोधो भवति। गद्यकथासु उपदेशात्मकानि पद्यानि मध्य-मध्ये निबद्धानि।

**हितोपदेशम्**

हितोपदेशस्य ग्रन्थस्य रचयिता नारायणपण्डित: आसीत्। अस्य रचनाकाल: दशमीशती मन्यते। अस्य आधारग्रन्थ: पञ्चतन्त्र: अस्ति। अस्मिन् चत्वार: **परिच्छेदा:** सन्ति येषु त्रिचत्वारिंशत् कथा: निबद्धा। हितोपदेशे मित्रलाभ:, सुहृद्भेद:, विग्रह:, सन्धि इत्येवं चत्वारि खण्डानि। अस्य भाषाशैली अत्यन्तसरला सरसा च। पद्येषु

उपदेशा: निरूपिता:। अस्य विश्वस्य अनेकासु भाषासु अनुवाद: जात:।

**( घ ) नाट्य -साहित्यम् -**

**अभिज्ञानशाकुन्तलम् -**

अस्य नाटकस्य प्रणेता महाकवि: कालिदास:। विश्वसाहित्ये इदं नाटकम् उत्कृष्टं प्रख्यापितञ्च। अस्मिन् सप्त-अंका: सन्ति। नाटकस्य कथा महाभारतस्य आदिपर्वण: गृहीता किन्तु तस्यां कथायां कविना स्वप्रतिभया कल्पनावैशिष्ट्येन च परिवर्तनं कृतम्। तेन नाटकमिदं श्रेष्ठत्व प्राप्तम्। अत एव अभिज्ञानशाकुन्तलं विषये प्रसिद्धेयम् उक्ति: -

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।

तत्रापि चतुर्थोऽङ्क: तत्र श्लोकचतुष्ट्यम्।।

नाटकेऽस्मिन् राजर्षे: दुष्यन्तस्य मेनकाया: अप्सरस: पुत्र्या शकुन्तलया सह गान्धर्वविवाह: वर्णित:। दुष्यन्तेन शकुन्तलायै एका स्वनामाङ्किता मुद्रिकाऽपि स्मरणचिह्नत्वेन प्रदत्ता। राजकार्येण दुष्यन्त: हस्तिनापुरमगच्छत्। तदा आश्रमे दुर्वासा-ऋषे: आगमनम् अभवत्, किन्तु दुष्यन्तचिन्तने संलग्ना शकुन्तला अभ्यागतस्य तपस्विन: दुर्वाशाऋषे: सत्कारं विस्मृतवान् अत: दुर्वासा शकुन्तलां शापं ददाति यत् यस्य चिन्तने त्वं संलग्ना स त्वां विस्मरिष्यति। सखीनां अनुनय-विनयेन ऋषिदुर्वासा स्वशापे परिवर्तनं कृत्वा कथयति यत् कस्यचिद् स्मरणचिह्नेन दुष्यन्त: पुन: शकुन्तलां स्मरिष्यति। हस्तिनापुरे दुष्यन्त: दुर्वासाशापेन शकुन्तलां विस्मृतवान्।

महर्षिकण्व: तपस्विभि: सह शकुन्तलां हस्तिनापुरं प्रेषयति। मार्गे दुष्यन्तेन दत्ता मुद्रिकाऽपि शक्रावतार तीर्थस्य जले शकुन्तलाया: हस्तात् परिभ्रष्टा:। यदा हस्तिनापुरे शकुन्तला दुष्यन्तस्य समक्षम् अगच्छत् तदा शाप प्रभावात् राजा शकुन्तलां विस्मृत्य न स्वीकरोति। त्यागानन्तरं सा मारीचऋषे: आश्रमे निवासं कृतवती। तत्र च दुष्यन्तस्य पुत्रं भरतं जनयति स्म। किञ्चिद् कालानन्तरं धीवरेण प्राप्त्या मुद्रिकया राजा पुन: शकुन्तलां स्मृतवान्। अस्मिन्नेव समये राक्षसेभ्य: देवानां सुरक्षार्थं युद्धाय च इन्द्रदेव: सहायतार्थं दुष्यन्तम् आहूतवान्। स्वर्गात् युद्धानन्तरं प्रत्यावर्तनसमये मारीचऋषे: आश्रमे स्वपुत्रेण भरतेन सह दुष्यन्तस्य मेलनम् अभवत्। तत्र एव राज्ञा स्वपुत्र: भरत: अभिज्ञायते तत्रैव शकुन्तलाऽपि अभिज्ञायते। अत एव अस्य नाटकस्य नाम अभिज्ञानशाकुन्तलं कविना कृतम्।

नाटकेऽस्मिन् भारतीया संस्कृति: पूर्णरूपेण परिलक्षिता। विदायिकाले चतुर्थेऽङ्के यद् सन्देश: कण्वेन शकुन्तलायै प्रदत्त: तत् सर्वेषां गृहस्थानां कृते आदर्शभूत:। सम्पूर्णे नाटके प्रकृति-वर्णनं शोभनम्। अत्र लता अपि मनुष्याणाम् इव आश्रूणि मुञ्चन्ति। उपमाकालिदासस्य उक्ति: सर्वत्र चरितार्था। कालिदासस्य शैली माधुर्य-प्रसाद गुणयुक्ता। वैदर्भीरीत्या: संयोजनं हृदयावर्जकम्। शृङ्गाररसप्रधानमिदं नाटकम्।

**स्वप्नवासवदत्तम् -**

महाकवि भास: अस्य नाटकस्य प्रणेता आसीत्। विद्वांस: भासस्य स्थितिकालं रव्रीष्टपूर्व चतुर्थशतकादारभ्य द्वितीयशतक मध्ये मन्यन्ते। कालिदासेन स्वमालविकाग्निमित्रे नाटके भासस्य प्रशंसा कृता। अत: भास: उत्कृष्ट: प्राचीन नाटककार: आसीत्। अस्य त्रयोदश नाटकानि सम्प्रति उपलभ्यन्ते प्रतिज्ञायौगन्धरायणम्, स्वप्नवासवदत्तम्, उरुभंगम्, दूतवाक्यम्, पञ्चरात्रम्, बालचरितम्, दूतघटोत्कचम्, कर्णभारम्, मध्यमव्यायोगम्, प्रतिमानाटकम्, अभिषेकनाटकम्, अविमारकम्, चारुदत्तमिति।

अस्मिन् नाटके वत्सराज: उदयन: नायक: विद्यते। उदयनस्य अपहतं राज्यं कथं पुन: प्राप्स्यते इति चिन्ता

मन्त्रिणः यौगन्धरायणस्य मनसि वर्तते। अतः तेन राज्ञी वासवदत्ता अग्नौ दग्धा इति प्रवादः प्रसारितः। तदनन्तरं यौगन्धरायणस्यैव योजनया पद्मावत्या सह उदययनस्य विवाहः अभवत्। तेन उदययनस्य अपहृतं राज्यं पुनः प्राप्तम्। अयं वैदर्भी रीत्याः माधुर्यप्रसादगुणयोः च कवि अस्ति।

**उत्तररामचरितम् –**

अस्य नाटकस्य रचयिता महाकविः भवभूतिः अस्ति। अयं दक्षिणभारते पद्मपुरस्य निवासी आसीत् भवभूतेः त्रीणि नाटकानि सन्ति। मालतीमाधवम्, महावीरचरितम्, उत्तमरामचरितम् इति। अस्य कवेः जन्मकालः 680 ईस्वीयतः 750 ईस्वीय मध्ये निश्चीयते। उत्तररामचरितं नाटकं सप्तसु अंकेषु निबद्धं वर्तते। अस्मिन् लोकापवाद हेतुना रामेण सीतायाः परित्यागः ततः रामविलापः, लव-कुश प्राप्तिः रामेण च निर्दोषायाः सीतायाः पुनः स्वीकारं इति विषयवस्तु वर्णितम्। इदं नाटकं सुखन्तं वर्तते यतो हि अस्य अन्ते कविना सीतारामयोः मिलनं वर्णितम्। उत्तररामचरितस्य रचनायाः प्रेरणा रामायणात् एव गृहीता, किन्तु कथावस्तु पद्मपुराणेऽपि वर्तते। नाटकस्य अध्ययनेन ज्ञायते यत् भवभूतिः विभिन्नानां शास्त्राणां उत्कृष्टः विद्वान् आसीत्। नाटक प्रणेतासु कालिदासानन्तरं भवभूतेः नाम सम्मानेन गृह्यते। अतः विद्वत्सु आभाणकम् अपि प्रसिद्धम् वर्तते। उत्तरेरामचरिते तु भवभूतिर्विशिष्यते। भवभूतिः करुणरसस्य कविः वर्तते। उत्तररामचरिते करूणरसस्य प्रधान्यं वर्तते। भवभूतेः करूणरसः एतादृशः समर्थः, यत् तेन वृक्षः वनस्पत्यादयः एव न, प्रस्तराः (ग्रावाः) अपि रुदन्ति।

अस्मिन् नाटके गौडी रीतिप्रयुक्ता किन्तु करुणरसस्य प्रसङ्गे वैदर्भ्याः रीत्याः अपि प्रयोगः कृतः। एवमेव – माधुर्योजप्रसादानां त्रयाणामपि गुणानां उत्कृष्टतया निरूपणं भवभूतिना कृतम्।

**मृच्छकटिकम् –**

शास्त्रीयदृष्ट्या नाटकमिदं रूपकेषु प्रकरणमस्ति। अस्य रचनाकारः महाकविशूद्रकः आसीत्। शूद्रकस्य एका एव कृतिः मृच्छकटिकम् अस्य जन्मकालादिविषये मतैक्यं नास्ति, परन्तु अन्तर्बाह्यसाक्ष्येभ्यः शूद्रकस्य जन्मकालः पञ्चम्यां शताब्द्यां विद्वद्भिः निश्चीयते। अस्मिन्नाटके दश अंकाः सन्ति। तेषु निर्धनब्राह्मणस्य चारुदत्तस्य वसन्तसेनया गणिकया सह प्रेमवर्णनं तया च सह विवाह वर्णनस्य कथावस्तु अस्ति। अस्यां एव कथायां राजापालकं हत्वा आर्यकस्य राजपदे प्रतिष्ठायाः वर्णनमपि कृतम्। अस्मिन् नाटके जनजीवनस्य वास्तविकं वर्णनम् उपलभ्यते। ग्रन्थेऽस्मिन् वैदर्भीरीत्याः प्रयोगः कृतः। किन्तु अनेकेषु स्थलेषु गौड्याः रीत्याः अपि आश्रयः गृहीतः। अस्य ग्रन्थस्य आधारग्रन्थः भासस्य चारुदत्तनाटकम् अस्ति। मृच्छकटिक नाटके समाजस्य प्रत्येकं वर्गस्य स्वाभाविकतया उत्कृष्टतया च निरूपणं कृतम्। अस्याः कृते विश्वस्य अनेकासु भाषासु अनुवादः जातः।

**वेणीसंहारम् –**

वेणीसंहारम् इति नाटकस्य कर्ता महाकविभट्टनारायणः आसीत्। अस्य नाटकस्य नायकः भीमसेनः वर्तते। नाटके भीमस्य चरित्रं ओजस्वि वीरतापूर्णं च अस्ति। अस्मिन् नाटके मुख्यरसः वीररसः विद्यते। भट्टनारायणस्य कालः खीष्टीय सप्तम्याः शताब्द्या उत्तरार्द्धे निश्चीयते (650 से 675 ई.)। अस्मिन् नाटके षड्अंकाः सन्ति। भीमः दुःशासनेन कृतस्य द्रौपद्याः अपमानस्य प्रतिशोधं वाञ्छति। अतः प्रतिज्ञां करोति यत् स दुःशासनस्य वक्ष स्थलस्य

रुधिरं पास्यति अपि च दुर्योधनस्य जङ्घां विदारयिष्यति। स्वप्रतिज्ञां प्रपूर्ण भीमः द्रौपद्याः वेणीं संहारयति। अतएव अस्य नाटकस्य नाम वंणीसंहारमिति वर्तते। नाटकेऽस्मिन् ओजोगुणस्य गौड्याः रीत्याः च प्राधान्यं वर्तते।

### अभ्यासः –

**रिक्तस्थानानि पूरयत–**

(अ) रामायणस्य रचयिता ...................... अस्ति।

(ब) रामायणः ...................... संहिता कथ्यते।

(स) महाभारतस्य रचनायाः प्रथमे स्तरे ...................... संज्ञा आसीत्।

(द) महाभारतस्य रचनाकालः ...................... मन्यते।

(य) कुमारसंभवस्य अष्टसर्गेषु ...................... टीका अस्ति।

(र) अर्जुनेन हिमालये तपस्या ...................... प्राप्त्यर्थं कृता।

(ल) शिशुपालस्य वधः ...................... करोति।

(व) दमयन्ती समीपे नलस्य प्रशंसां ...................... करोति।

(श) रघुवंशमहाकाव्ये ...................... सर्गाः सन्ति।

(ष) यक्षः ...................... नगर्यां निवसति स्म।

(स) भीमः ...................... वेण्याः संहारं करोति।

(ह) भासस्य ...................... नाटकानि सन्ति।

(च) चारुदत्तस्य विवादः ...................... अभवत्।

(छ) भर्तृहरि ...................... ज्येष्ठभ्राता आसीत्।

(ज) उत्तररामचरिते ...................... रसप्रधानं वर्तते।

(झ) महिलारोप्य नामके नगरे ...................... राजा आसीत्।

(ञ) हितोपदेशस्य कर्ता ...................... आसीत्।

2. उपमा कालिदासस्य इति आभाणकस्य भावार्थः लेख्यः।

3. यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् अस्य सूक्तेः व्याख्या कार्या।

4. मेघदूते कानि–कानि स्थानानि वर्णितानि।

5. लौकिकसंस्कृतस्य प्रथमः श्लोकः कोऽस्ति।

6. भारवेरर्थगौरवम् इत्यस्य कः आशयः।

----------

# ( 3 ) छन्दोऽलंकाराः
## ( क ) छन्दः परिचयः

संस्कृतसाहित्ये पद्यभागस्याधिक्यम् अस्ति। पद्यरचनायां छन्दसां ज्ञानम् आवश्यकम्। पाणिनीयशिक्षायां छन्दो-विषये उक्तम्- ''**छन्दः पादौ तु वेदस्य**''। छन्दः शब्दः 'छदि छादने' धातोः निष्पन्नः। छन्दसां ज्ञानेन श्लोकानां मन्त्राणां वा गति-यति-लयादिषु विषयेषु कौशलं प्राप्तुं शक्यते। अतः आगच्छन्तु, वयं छन्दसां विषये जानीमः-

**अक्षरम्**- यस्य उच्चारणं भवितुं शक्नोति। यथा- 'रमाम्' अत्र 'र', 'मां' इति अक्षरद्वयम् अस्ति।

**मात्रा**- उच्चारणे आवश्यकः (निर्धारितः) समय एव मात्रा। ह्रस्वस्वरे एकमात्रा, दीर्घस्वरे द्वे मात्रे, प्लुतस्वरे तिस्रः मात्राः भवन्ति।

''एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रिकम्।।''

**यतिः**- पद्यगायने यत्र एकस्मिन् चरणे अधिकानि अक्षराणि भवन्ति, तत्र तेषां समं गायनं सरलं न भवति। अतः एषु स्थलेषु विरामः आवश्यकः। अयं विरामः निश्चितः भवति। विराम एव यतिः।

**लघुगुरुव्यवस्था**- छन्दसां प्रयोगः मूलतः स्वरवर्णाधारितः अस्ति। छन्दसां दृष्ट्या वर्णाः द्विप्रकारकाः- १. लघुः ( । ), २ गुरुः (ऽ)

सामान्यतः ह्रस्वः स्वरः लघुः भवति। अस्य कृते ' । ' इति चिह्नं निर्धारितम्। ह्रस्वस्वराः पञ्च सन्ति- अ, इ, उ, ऋ, लृ।

दीर्घः स्वरः गुरुः भवति। अस्य कृते 'ऽ' इति चिह्नं निर्धारितम्। दीर्घस्वराः अष्ट सन्ति- आ, ई, ऊ, ॠ, ए, ऐ, ओ, औ।

किन्तु गुरुलघुव्यवस्थायां केचन विशेषनियमाः एवं सन्ति-

- अनुस्वारयुक्तः वर्णः गुरुः भवति।
- विसर्गयुक्तः वर्णः गुरुः भवति।
- संयुक्तवर्णात् पूर्वः वर्णः गुरुः भवति।
- चरणस्य अन्तिमः वर्णः यदि लघुः अस्ति तर्हि आवश्यकतानुसारं गुरुः स्वीकर्तुं शक्यते।

**छन्दो-भेदः**- सर्वप्रथमं छन्दसां भेदद्वयम्- १. लौकिकच्छन्दः २. वैदिकच्छन्दः। एषु छन्दस्सु अपि भेदाः सन्ति, ये एवं सन्ति-

छन्दः
- वार्णिकच्छन्दः (वृत्तम्)
  - समवृत्तम् (इन्द्रवज्रा)
  - विषमवृत्तम् (आपीडकलिका)
  - अर्द्धसमवृत्तम् (पुष्पिताग्रा)
- मात्रिकच्छन्दः (जातिः) (आर्या)

**वार्णिकच्छन्दः-** यत्र वर्णानां गणनाऽऽधारेण छन्दसां निर्धारणं भवति। वर्णानां गणनादृष्ट्या अत्र गणव्यवस्था भवति। त्रयाणां वर्णानां समूह एव गणः। अष्ट गणाः भवन्ति-

आदिमध्यावसानेषु भजसा यान्ति गौरवम्।

यरता लाघवं यान्ति मनौ तु गुरुलाघवम्।।

| | | |
|---|---|---|
| भगणः - ऽ।। | जगणः - ।ऽ। | सगणः - ।।ऽ |
| यगणः - ।ऽऽ | रगणः - ऽ।ऽ | तगणः - ऽऽ। |
| मगणः - ऽऽऽ | नगणः - ।।। | |

यथा- अनुष्टुप्, इन्द्रवज्रा, उपेन्द्रवज्रा, वसन्ततिलका, मन्दाक्रान्ता, शार्दूलविक्रीडितादयः।

**मात्रिकच्छन्दः-** यत्र मात्राणां गणनाऽऽधारेण छन्दः भवति तत्र मात्रिकच्छन्दः। अत्रापि गणाः भवितुम् अर्हन्ति किन्तु अत्र ५ मात्रिकाः गणाः भवन्ति।

**पादाः/चरणानि-** प्रायः छन्दस्सु चत्वारः पादाः भवन्ति। गायत्री छन्दसि एव त्रयः पादाः सन्ति।

**पाठ्यक्रमे निर्धारितच्छन्दांसि**

**१. अनुष्टुप् छन्दः (श्लोकच्छन्दः)-** अनुष्टुप् छन्दसि प्रत्येकं चरणे अष्ट अक्षराणि (वर्णाः) भवन्ति। अतः चतुर्षु चरणेषु आहत्य (८×४=३२) द्वात्रिंशत् वर्णाः भवन्ति।

लक्षणम्- **''श्लोके षष्ठं गुरुर्ज्ञेयं सर्वत्र लघु पञ्चमम्।**
**द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः।।''**

अत्र एते नियमाः विशेषरूपेण ध्यातव्याः-

- चतुर्षु चरणेषु पञ्चमः वर्णः लघुः।
- चतुर्षु चरणेषु षष्ठः वर्णः गुरुः।
- द्वितीये चतुर्थे च चरणद्वये सप्तमः वर्णः ह्रस्वः (लघुः)।
- प्रथमे तृतीये च चरणद्वये सप्तमः वर्णः गुरुः।

।ऽऽ ।ऽ।

उदाहरणम्- **अपि स्वर्णमयी लङ्का, न मे लक्ष्मण रोचते।**

।ऽऽ ।ऽ।

**जननी जन्मभूमिश्च, स्वर्गादपि गरीयसी।।**

एवमेव- वागर्थाविव सम्पृक्तौ, वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे, पार्वतीपरमेश्वरौ।।

**२. उपजातिवृत्तम्-** यत्र इन्द्रवज्रा-उपेन्द्रवज्रयोः मिश्रणं भवति, तत्रैव उपजातिवृत्तम्।

इन्द्रवज्रालक्षणम्- ''स्यादिन्द्रवज्रा यदि तौ जगौ गः''

तगणः, तगणः, जगणः, गुरुः, गुरुः = ११ वर्णाः [११×४ = ४४ वर्णाः]

उपेन्द्रवज्रालक्षणम्- ''उपेन्द्रवज्रा जतजास्ततो गौ''

जगणः, तगणः, जगणः, गुरुः, गुरुः = ११ वर्णाः [११×४ = ४४ वर्णाः]

उपजातिलक्षणम् – **''अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः।**
**इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम।।''**

उदाहरणम्– **अस्त्युत्तरस्यां दिशि देवतात्मा,** (इन्द्रवज्रा)
**हिमालयो नाम नगाधिराजः।** (उपेन्द्रवज्रा)
**पूर्वापरौ तोयनिधीवगाह्य,** (इन्द्रवज्रा)
**स्थितः पृथिव्या इव मानदण्डः।।** (उपेन्द्रवज्रा)

अत्र प्रथमे तृतीये च चरणद्वये इन्द्रवज्रा, द्वितीये चतुर्थे च चरणद्वये उपेन्द्रवज्रा। अतः द्वयोः मिश्रणत्वात् उपजातिच्छन्दः।

एवमेव– येषां न विद्या न तपो न दानम्, (इन्द्रवज्रा)
ज्ञानं न शीलं न गुणो न धर्मः। (इन्द्रवज्रा)
ते मर्त्यलोके भुवि भारभूताः, (इन्द्रवज्रा)
मनुष्यरूपेण मृगाश्चरन्ति।। (उपेन्द्रवज्रा)

**३. वंशस्थवृत्तम्-** द्वादशवर्णात्मकं समवृत्तमिदम्। वंशस्थच्छन्दसि प्रत्येकं चरणे १२ वर्णाः भवन्ति। अतः चतुर्षु चरणेषु आहत्य (१२×४ = ४८) अष्टचत्वारिंशत् वर्णाः भवन्ति।

लक्षणम्– **''जतौ तु वंशस्थमुदीरितं जरौ''**

अत्र प्रत्येकं चरणे जगणः ( ।ऽ।), तगणः (ऽऽ।), जगणः ( ।ऽ।) रगणः (ऽ।ऽ) च भवन्ति।

उदाहरणम्– **भवन्ति नम्रास्तरवः फलोद्गमै-**
**र्नवाम्बुभिर्भूरि विलम्बिनो घनाः।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः,**
**स्वभाव एवैष परोपकारिणाम्।।**

एवमेव– सुखं हि दुःखान्यनुभूय शोभते,
घनान्धकारेष्विव दीपदर्शनम्।
सुखात्तु यो याति नरो दरिद्रतां,
धृतः शरीरेण मृतः स जीवति।।

**४. वसन्ततिलका छन्दः–** चतुर्दशवर्णात्मकं समवृत्तमिदम्। अत्र प्रत्येकं चरणे १४ वर्णाः भवन्ति। अतः चतुर्षु चरणेषु आहत्य (१४ × ४ = ५६) षट्पञ्चाशत् वर्णाः भवन्ति।

लक्षणम् – **''उक्ता वसन्ततिलका तभजा जगौ गः''**

अत्र तगणः (ऽऽ।), भगणः (ऽ।।), जगणः ( ।ऽ।), जगणः ( ।ऽ।) गुरुद्वयं च भवन्ति।

उदाहरणम्– **उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः,**
**दैवेन देयमिति कापुरुषाः वदन्ति।**
**दैवं निहत्य कुरु पौरुषमात्मशक्त्या,**
**यत्ने कृते यदि न सिध्यति कोऽत्र दोषः।।**

एवमेव– मातेव रक्षति पितेव हिते नियुङ्क्ते,
कान्तेव चाभिरमयत्यपनीय खेदम्।

कीर्तिं च दिक्षु विमलां वितनोति लक्ष्मीं,

किं किं न साधयति कल्पलतेव विद्या।।

**५. मालिनी छन्दः**- पञ्चदशवर्णात्मकं समवृत्तमिदम्। अत्र प्रत्येकं चरणे पञ्चदश वर्णाः भवन्ति। चतुर्षु चरणेषु आहत्य (१५×४ =६०) षष्टिः वर्णाः भवन्ति।

लक्षणम्- ''**ननमयययुतेयं मालिनी भोगिलोकैः**''

अत्र प्रत्येकं चरणे नगणः (।।।), नगणः (।।।), मगणः (ऽऽऽ), यगणः (।ऽऽ) यगणश्च (।ऽऽ) भवन्ति।

मालिनी-छन्दसि यतिः अपि भवति। अत्र अष्टमे वर्णे (भोगी=सर्पः= अष्टविधाः सर्पाः) सप्तमे वर्णे (लोकाः = सप्त लोकाः) च यतिः अर्थात् विरामः भवति।

उदाहरणम्- **सरसिजमनुविद्धं शैवलेनापि रम्यं,**

**मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।**

**इयमधिकमनोज्ञा वल्कलेनापि तन्वी,**

**किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।**

एवमेव- वयमिह परितुष्टाः वल्कलेनापि दुकूलैः,

सम इह परितोषो निर्विशेषो विशेषः।

स तु भवति दरिद्रो यस्य तृष्णा विशाला,

मनसि च परितुष्टे, कोऽर्थवान् को दरिद्रः।।

**६. शिखरिणी छन्दः**- सप्तदशवर्णात्मकं समवृत्तमिदम्। अत्र प्रत्येकं चरणे १७ वर्णाः भवन्ति। अतः चतुर्षु चरणेषु आहत्य (१७×४ = ६८) अष्टषष्टिः वर्णाः भवन्ति।

लक्षणम्- ''**रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी**''

अत्र प्रत्येकं चरणे यगणः (।ऽऽ), मगणः (ऽऽऽ), नगणः (।।।), सगणः (।।ऽ), भगणः (ऽ।।), एकः लघुः एकः गुरुश्च भवन्ति। अत्र षष्ठे वर्णे (रसाः=षट्) एकादशे च (रुद्राः= एकादश) वर्णे यतिः भवति।

उदाहरणम्- **अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-**

**रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।**

**अखण्डं पुण्यानां फलमिव च तद्रूपमनघं**

**न जाने भोक्तारं कमिह समुपस्थास्यति विधिः।।**

एवमेव- यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवम्,

तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।

यदा किञ्चित् किञ्चित् बुधजनसकाशादवगतं,

तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः।।

**७. शार्दूलविक्रीडितं छन्दः**- नवदश (एकोनविंशतिः) वर्णात्मकं समवृत्तम् इदम्। अत्र प्रत्येकं चरणे नवदश (१९) वर्णाः भवन्ति। अतः चतुर्षु चरणेषु आहत्य (१९×४ = ७६) षट्सप्ततिः वर्णाः भवन्ति।

लक्षणम्- ''**सूर्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितम्**''

अत्र प्रत्येकं चरणे मगणः (ऽऽऽ), सगणः (।।ऽ), जगणः (।ऽ।), सगणः (।।ऽ), तगणः (ऽऽ।),

तगणः (ऽऽ।) एकः गुरुश्च भवन्ति। अत्र द्वादशे वर्णे (द्वादश सूर्याः) सप्तमे च (सप्त अश्वाः) वर्णे यतिः भवति।

उदाहरणम्– **विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्,**
**विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।**
**विद्या बन्धुजनो विदेशगमने विद्या परा देवता,**
**विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः।।**

एवमेव– या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता,
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माऽच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता,
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा।।

**८. आर्या-छन्दः**– इदं मात्रिकच्छन्दः अस्ति। अतः एतत् आर्याजातिः अपि कथ्यते। अत्र मात्राणां गणनाऽऽधारेण छन्दः भवति। अत्र चत्वारि चरणानि भवन्ति।

लक्षणम्– **''यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि।**
**अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या।।''**

अत्र प्रथमे चरणे तृतीये च चरणे द्वादश-द्वादश मात्राः भवन्ति। द्वितीये चरणे अष्टादश मात्राः। अन्तिमे चतुर्थे चरणे पञ्चदश मात्राः भवन्ति।

उदाहरणम्– **अधरः किसलयरागः, कोमलविटपानुकारिणौ बाहू।**
**कुसुममिव लोभनीयं, यौवनमङ्गेषु सन्नद्धम्।।**

एवमेव– उदयनवेन्दुसवर्णावासवदत्ता बलौ बलस्य त्वाम्।
पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम्।।

**अभ्यासप्रश्ना**

१. किं नाम छन्दः?
२. कतिविधाः मात्राः?
३. छन्दस्सु लघुगुरुव्यवस्था कथं भवति?
४. छन्दसां कति मुख्यभेदाः?
५. निम्नलिखितच्छन्दसां लक्षणोदाहरणानि लेखनीयानि–
(क) अनुष्टुप् (ख) वंशस्थम्
(ग) आर्या छन्दः (घ) शार्दूलविक्रीडितम्
६. अधोलिखितश्लोकांशेषु लघुगुरूणां सङ्गतीकृत्य छन्दसां नाम लिखत–
(क) अनाघ्रातं पुष्पं किसलयमलूनं कररुहै–
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
(ख) वागर्थाविव सम्पृक्तौ, वागर्थप्रतिपत्तये।

(ग) येषां न विद्या न तपो न दानम्,
ज्ञानं न शीलं न गुणो न धर्मः।

(घ) या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता,
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।

(ङ) वयमिह परितुष्टाः वल्कलेनापि दुकूलैः,
सम इह परितोषो निर्विशेषो विशेषः।

--------

# ( ख ) अलङ्कार-परिचयः

**''अलङ्करोति इति अलङ्कारः'', ''अलङ्क्रियन्ते शब्दाः अर्थाः वा अनेनेति अलङ्कारः''** अर्थात् यथा शरीरस्य सौन्दर्यवर्धनार्थं हार-कुण्डलादीनि आभूषणानि वयं धारयामः तथैव काव्यरूपशरीरस्य शोभावर्धनाय येषां तत्त्वानां धर्माणां वा प्रयोगः क्रियते, ते एव अलङ्काराः इति कथ्यन्ते। अतएव उक्तं कविदण्डिना-

**''काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते।।''** (काव्यादर्शः २/१)

अर्थात् काव्यस्य शोभां ये वर्धयन्ति ते धर्माः एव अलङ्काराः इति कथ्यन्ते। अलङ्काराणां स्वरूपं विवेचयन् काव्यप्रकाशकारः मम्मटः लिखति-

**''उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।।''** (काव्यप्रकाशः ६/६७)

अर्थात् शब्दार्थौ काव्यस्य शरीरम्। अतः ये हारादिवत् काव्यस्य शरीररूपशब्दार्थयोः शोभां वर्धयन्ति ते एव अलङ्काराः इति कथ्यन्ते।

**अलङ्कारभेदाः-** काव्ये शब्दस्य अर्थस्य च उत्कर्षाधायकस्य तत्त्वस्य नाम एव अलङ्कारः। अलङ्कारस्य आधाररूपेण शब्दः अर्थश्च स्तः। अतः अलङ्काराः त्रिविधाः-

**१. शब्दालङ्काराः-** शब्दपरिवृत्त्यसहत्वं शब्दालङ्कारत्वम्। शब्दानां माध्यमेन (विशेषप्रयोगेण) यत्र अलङ्कृतिः, तत्र शब्दालङ्कारः। यथा- अनुप्रास-यमकादयः।

**२. अर्थालङ्कारः-** शब्दपरिवृत्तिसहत्वम् अर्थालङ्कारत्वम्। अर्थस्य चमत्कारेण यत्र सौन्दर्यबोधनं भवति, तत्र अर्थालङ्कारः। यथा- उपमा, रूपकम्, उत्प्रेक्षा, दीपकादयः।

**३. उभयालङ्कारः-** ये शब्दम् अर्थञ्च अलङ्कुर्वन्ति ते एव उभयालङ्काराः। यथा- पुनरुक्तवदाभासः।

## पाठ्यक्रमे निर्दिष्टाः अलङ्काराः

**१. अनुप्रासालङ्कारः-** अयं शब्दालङ्कारः अस्ति। रसाद्यनुगतः प्रकृष्टः आसः (न्यासः) इति अनुप्रासः।

लक्षणम् - **''वर्णसाम्यमनुप्रासः''** (काव्यप्रकाशः) अर्थात् यत्र वर्णानां साम्यं (समता) भवति, तत्र अनुप्रासालङ्कारः भवति। अत्र स्वराणां वैषम्येऽपि व्यञ्जनानां साम्यात् अनुप्रासत्वम्।

उदाहरणम्- **वहन्ति वर्षन्ति नदन्ति भान्ति ध्यायन्ति नृत्यन्ति समाश्वसन्ति।**
**नद्यो घनाः मत्तगजाः वनान्ताः प्रियाविहीनाः शिखिनः प्लवङ्गाः।।**
(रामायणम्)

अस्मिन् श्लोके 'वहन्ति, वर्षन्ति, नदन्ति, भान्ति, ध्यायन्ति, नृत्यन्ति, समाश्वसन्ति' इत्यत्र **'न्'**, **'त्'** एतयोः वारं वारम् आवृत्तिरस्ति। वर्णानां साम्यात् श्लोकस्य सौन्दर्ये अभिवृद्धिः जाता। अतोऽत्र अनुप्रासालङ्कारोऽस्ति।

अनुप्रासालङ्कारस्य पञ्च प्रमुखाः भेदाः सन्ति- १. छेकानुप्रासः, २. वृत्त्यनुप्रासः, ३. श्रुत्यनुप्रासः, ४. अन्त्यानुप्रासः ५. लाटानुप्रासः।

अन्यानि उदाहरणानि-१. ततोऽरुणपरिस्पन्दमन्दीकृतवपुः शशी।

दध्रे कामपरिक्षामकामिनीगण्डपाण्डुताम्।।

२. अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः।
कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्तापरचिन्तनानि।।

३. यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।
यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।।

२. **यमकालङ्कारः**- अयं शब्दालङ्कारः अस्ति। **'यमौ द्वौ समजातौ तत्प्रकृतिर्यमकम्'।** अर्थात् यत्र समानरूपेण दृश्यमानौ अपि शब्दौ अर्थदृष्ट्या (प्रकृतिदृष्ट्या) भिन्नौ भवतः, तत्र यमकम्।

लक्षणम्- **''सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः।**
**क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते।।''**

अर्थात् यत्र अर्थयुक्तानां भिन्न-भिन्नार्थकानां शब्दानां पूर्वक्रमेणैव आवृत्तिर्भवति, तत्रैव यमाकालङ्कारो भवति। अत्र एकस्य वर्णसमूहस्य अर्थः द्वितीयवर्णसमूहाद् भिन्नः भविष्यति। यथा- **'समरसमरसोऽयम्'** अत्र प्रथमं पदं 'समर' (युद्धम्), द्वितीयं पदं 'समरसः' (समानभावयुक्तः) अस्ति।

उदाहरणम्- **नवपलाशपलाशवनं पुरः स्फुटपराग-परागतपङ्कजम्।**
**मृदुलतान्त-लतान्तमलोकयत् स सुरभिं सुरभिं समनोहरैः।।**

अत्र 'पलाश-पलाश', 'पराग-पराग', 'लतान्त-लतान्त', 'सुरभिं सुरभिम्' एतेषां पदानां आवृत्तिः दृश्यते। किन्तु वास्तविकरूपेण एतेषाम् अथेषु भिन्नता अस्ति। पश्यन्तु-

| | |
|---|---|
| पलाश - पत्रम्, | पलाश - किंशुकम्। |
| परागः- रजःकणः, | परागतम् - व्याप्तम्। |
| मृदुलतान्त- कोमलातपेन क्लान्तः, | लतान्तम् - लतायाः अन्तिमभागम्। |
| सुरभिम् - सुगन्धम्, | सुरभिम् - वसन्तसमयम्। |

अन्यानि उदाहरणानि- १. सरस्वति ! प्रसादं मे स्थितिं चित्तसरस्वति।
सरस्वति ! कुरुक्षेत्र कुरु क्षेत्र सरस्वती।।

२. संसार साकं दर्पेण कन्दर्पेण ससारसा।
शरन्नवाना बिभ्राणा नाविभ्राणा शरन्नवा।।

३. सन्नारी भरणोमायमाराध्य विधुशेखरम्।
सन्नारी भरणोऽमायस्ततस्त्वं पृथिवीं जया।।

४. प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च साम्प्रतम्।
यथार्थनामा सुव्यक्तं हिमवान् हिमवान् गिरिः।।

**३. श्लेषालङ्कारः**- अयं शब्दालङ्कारः अस्ति। श्लेषयुक्तपदैः यत्र अनेकार्थानां कथनं भवति, तत्रैव श्लेषालङ्कारः।

लक्षणम्- **''श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते।।''**

अर्थात् यत्र अर्थभेदेन भिन्नाः अपि शब्दाः युगपद् उच्चारणेन श्लिष्यन्ति, तत्र श्लेषालङ्कारः भवति। मम्मटाचार्यमतेन श्लेषः अष्टविधः भवति- १. वर्णश्लेषः, २. पदश्लेषः, ३. लिङ्गश्लेषः,

४. भाषाश्लेषः,  ५. प्रकृतिश्लेषः,  ६. प्रत्ययश्लेषः,  ७. विभक्तिश्लेषः,  ८. वचनश्लेषः।

उदाहरणम्– **प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता।**
**अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि।।**

अत्र 'विधौ' इति पदे 'विधु' (चन्द्रमा) शब्दस्य 'विधि' (भाग्यम् ईश्वरः वा) शब्दस्य च एतयोः उभयोः एव सप्तम्यैकवचनस्य प्रतीतिः भवति। अतः एकेन एव पदेन अर्थद्वयस्य श्लिष्टत्वात् श्लेषालङ्कारः।

अन्यानि उदाहरणानि– १. पृथुकार्तस्वरपात्रं भूषितनिःशेषपरिजनं देव!
विलसत्करेणुगहनं सम्प्रति समभावयोः सदनम्।।

२. योऽसकृत्परगोत्राणां पक्षच्छेदक्षणक्षमः।
शतकोटिदतां बिभ्रद्विबुधेन्द्रः स राजते।।

३. सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः।
नयोपकार साम्मुख्यमायासि तनुवर्तनम्।।

**४. उपमा अलङ्कारः–** अयम् अर्थालङ्कारः अस्ति। उपमानोपमेययोः समानेन धर्मेण सादृश्यम् एव उपमा।

उपमायाः कृते चतुर्णाम् आवश्यकता भवति – १. उपमानम् – येन सह तुलना भवति। यथा– सूर्यचन्द्रादीनि।

२. उपमेयम् – यस्य तुलना भवति। यथा– मुख–नृपादीनि।

३. वाचकशब्दः – इव, समानम् इत्यादयः।

४. साधारणधर्मः – उपमानोपमेययोः यद् वैशिष्ट्यं समानरूपेण भवति, तुलनायाः यः आधारो भवति, स एव साधारणधर्मः। यथा– सुन्दरता, तेजः इत्यादयः।

लक्षणम्– **"साधर्म्यमुपमा भेदे"**

अर्थात् उपमानोपमेययोः भेदे सत्यपि समानतायाः (साधर्म्यस्य) वर्णनमेव उपमा।

उदाहरणम्– **वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।**
**जगतः पितरौ वन्दे पार्वती–परमेश्वरौ।।**

अत्र 'पार्वती–परमेश्वरौ' – उपमाद्वयम्, 'वागर्थौ' – उपमानद्वयम्, 'इव' – वाचकशब्दः, 'वागर्थप्रतिपत्तिः' – साधारणधर्मः। अतः श्लोकेऽस्मिन् उपमाऽलङ्कारः वर्तते।

अन्यानि उदाहरणानि–१. रविसङ्क्रान्तसौभाग्यस्तुषारारुणमण्डलः।
निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते।।

२. स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति।
प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा।।

३. करवाल इवाचरतस्तस्य वागमृतोपमा।
विषकल्पं मनो वेत्सि यदि जीवसि तत्सखे।।

**५. रूपकालङ्कारः**–अयम् अर्थालङ्कारः अस्ति। 'रूपयति एकतां नयतीति रूपकम्' अर्थात् यत्र उपमानोपमेययोः साम्यप्रदर्शनाय अभेदकल्पनं क्रियते, तत्रैव रूपकालङ्कारः।

लक्षणम्– ''**तद्रूपकमभेदो यः उपमानोपमेययोः**''

अर्थात् उपमानोपमेययोः अभेदप्रतिपादनम् (अभेदारोपणम्) एव रूपकालङ्कारः।

उदाहरणम्– **अनलङ्कृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।।**

अत्र 'चन्द्रमुख' शब्दे मुखे चन्द्रस्य आरोपत्वाद् रूपकम्।

अन्यानि उदाहरणानि– १. संसारविषवृक्षस्य द्वे फले रसवत्फले।
काव्यामृतरसास्वादः सङ्गमः सज्जनैः सह।।

२. मुखं तव कुरङ्गाक्षि ! सरोजमिति नान्यथा।

३. अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।।

**६. उत्प्रेक्षाऽलङ्कारः**– अयम् अर्थालङ्कारः अस्ति। उपमेयस्य उपमानेन सम्भावनम् एव उत्प्रेक्षा।

लक्षणम्– ''**सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्।।**''

अर्थात् प्रकृतस्य = वर्ण्यस्य = उपमेयस्य समेन = उपमानेन सह या सम्भावना (उत्कटकोटिकसंशयोत्पत्तिः) क्रियते, सा एव उत्प्रेक्षा।

उदाहरणम्– **लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।**
**असत्पुरुषसेवेव दृष्टिर्विफलतां गता।।**

अत्र गाढान्धकारस्य व्यापकता उपमेयम् अस्ति। 'लेपनम्' उपमानम् अस्ति। द्वयोः एकरूपतायाः सम्भावना कृता, अतः अत्र उत्प्रेक्षा।

श्लोके यत्र 'मन्ये, शङ्के, ध्रुवम्, प्रायः, नूनम्' इत्येतेषां शब्दानां प्रयोगो भवति, तत्र बाहुल्येन उत्प्रेक्षाऽलङ्कार एव भवति।

अन्यानि उदाहरणानि–१. ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः।
गुणाः गुणानुबन्धित्वात्तस्य सप्रसवा इव।।

२. पतितैः पतमानैश्च पादपस्थैश्च मारुतः।
कुसुमैः पश्य सौमित्रे ! क्रीडन्निव समन्ततः।।

३. समयः स वर्तत इवेष यत्र मां,
समनन्दयत् सुमुखि ! गौतमार्पितः।
अयमागृहीत–कमनीयकङ्कणः,
तव मूर्तिमानीव महोत्सवः करः।।

**७. अर्थान्तरन्यासालङ्कारः**– अयम् अर्थालङ्कारः अस्ति। सम्भाव्यमानस्य अर्थस्य उपपादनाय अन्येन अर्थेन यत्र समर्थनं क्रियते, तत्र अर्थान्तरन्यासः भवति।

लक्षणम्– ''**सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।**
**यत्र सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा।।**''

अर्थात् यत्र साधर्म्येण वैधर्म्येण वा सामान्यस्य विशेषेण अथवा विशेषस्य सामान्येन समर्थनं क्रियते, तत्रैव अर्थान्तरन्यासः अलङ्कारो भवति।

उदाहरणम्– **बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति।**

**सम्भूयाम्भोधिमभ्येति महानद्या नगापगा:।।**

अर्थात् अत्र उत्तरार्द्धविशेषेण पूर्वार्द्धसामान्यस्य समर्थनं कृतम्, अत: अत्र अर्थान्तरन्यास:।

अन्यानि उदाहरणानि– १. यावदर्थपदां वाचमेवमादाय माधव:।
विरराम महीयांस: प्रकृत्या मितभाषिण:।।

२. य: स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रम:।
श्वा यदि क्रियते राजा तत्किं नाश्नात्युपानहम्।।

३. हनुमानब्धिमतरद् दुष्करं किं महात्मनाम्।

**८. अतिशयोक्तिरलङ्कार:**– अयम् अर्थालङ्कार: अस्ति। अतिशयेन उक्ति: इति अतिशयोक्ति:। उपमेये उपमानस्य आरोप: अतिशयोक्ति:।

लक्षणम्– **''सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते।।''**

अध्यवसाय: = उपमेयोपमानयो: अभेदस्थापना अर्थात् उपमेयस्य निगरणेन सह उपमानेन अभेदारोप:। अर्थात् यत्र अध्यवसायस्य सिद्धत्वे सति उपमेयनिमित्तं केवलम् उपमानस्य एव कथनं भवति, तत्र अतिशयोक्ति: भवति।

उदाहरणम्– **यूथेऽपयाते हस्तिग्रहणोद्यतेन केन कलभो गृहीत:।।**

अत्र अर्जुन: अभिमन्युश्च उपमेयद्वयम्। किन्तु अनयो: द्वयो: निगरणं कृत्वा अर्जुनस्य हस्तीरूपेण अभिमन्योश्च कलभरूपेण उपमानद्वयेन वर्णनं कृतम्, अतोऽत्र अतिशयोक्त्यलङ्कार: अस्ति।

अन्यानि उदाहरणानि– १. पश्य नीलोत्पन्नद्वन्द्वानि सरन्ति शिता: सरा:।

२. अन्यत्सौकुमार्यमन्यैव च कापि वर्तनच्छाया।
श्यामा सामान्यप्रजापते: रेखैव च न भवति।।

३. उदेति पूर्वं कुसुमं तत: फलम्,
घनोदय: प्राक् तदनन्तरं पय:।
निमित्तनैमित्तकयोरयं क्रमस्तव,
प्रसादस्य पुरस्तु सम्पद:।।

**अभ्यासप्रश्ना:**

१. कोऽलङ्कार:? साहित्ये अलङ्काराणां का उपयोगिता ?

२. अलङ्कारा: कतिविधा:? उदाहरणसहितं लिखत?

३. अनुप्रासालङ्कारस्य लक्षणोदाहरणानि लिखत?

४. अधोलिखितानाम् अलङ्काराणां लक्षणोदाहरणानि लिखत–
(क) उपमा (ख) रूपकम् (ग) उत्प्रेक्षा (घ) अतिशयोक्ति:

५. अधोलिखितपङ्क्तिषु के अलङ्कारा:?
(क) अन्यत्सौकुमार्यमन्यैव च कापि वर्तनच्छाया।
श्यामा सामान्यप्रजापते: रेखैव च न भवति।।
(ख) य: स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रम:।
श्वा यदि क्रियते राजा तत्किं नाश्नात्युपानहम्।।

(ग) रविसङ्क्रान्तसौभाग्यस्तुषारारुणमण्डलः।
निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते।।

(घ) नवपलाशपलाशवनं पुरः स्फुटपराग–परागतपङ्कजम्।
मृदुलतान्त–लतान्तमलोकयत् स सुरभिं सुरभिं समनोहरैः।।

(ङ) अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।।

-----------

## (4) अपठितांशावबोधनम्

1. अहं मातरं वन्दे। मात्रा वयं पालिता पोषिता च। अस्माकं जीवने मात्रे आहुति–भूतम्। मातुः सर्वं लभामहे वयम्। वयं मातुः कार्यं कुर्मः। मातरि अस्माकं प्रीतिः, भक्तिः, अनुरागः च सन्ति। हे मातः! वयं वन्दामहे त्वाम्। शिक्षय अस्मान् सुसंस्कारान्।

1. गद्यांशस्य उचितं शीर्षकं लिखतु?
2. वयं केन पालिताः पोषिताः?
3. मातुः, पदस्य विभक्तिं वचनं च लिखत?
4. अस्माकं पदस्य विभक्तिं वचनं च लिखत?
5. कुर्मः पदस्य लकारं पुरुषं वचनं च लिखत?
6. माता पदस्य पर्यायं लिखत ?
7. गद्यांशे विस्मायादिबोधकं वाक्यं किम् अस्ति?

2. सज्जनानां संगतिः सत्संगतिः कथ्यते। मानवः यादृशं संगं प्राप्नोति तादृशी तस्य बुद्धिर्भवति। यदि मनुष्यः सज्जनानां संगं प्राप्नोति तर्हि सः सज्जनो भवति। यदि सः दुर्जनानां संगं प्राप्नोति तदा सः दुर्जनः भवति। सज्जनतां इच्छद्भिः जनैः सदा सत्संगतिः कर्त्तव्या। बाल्यावस्थायां सत्संगतिः अतीव महत्त्वपूर्णा अस्ति। ''सद्भिः कुर्वीत संगतिम्'' इति उक्तम् अस्ति।

1. गद्यांशस्य उचितं शीर्षकं लिखतु?
2. केषां संगतिः सत्संगतिः कथ्यते?
3. ''सज्जन'' पदस्य विलोमः कः?
4. तस्य पदस्य विभक्तिं वचनं च लिखत?
5. अस्ति पदस्य लकारं पुरुषवचनं च लिखत?
6. गद्यांशे प्रयुक्तानि चत्वारि अव्ययपदानि लिखत?
7. बुद्धिर्भवति पदस्य सन्धिविच्छेदं कुरुत?

3. प्रभातकालः अति मनोरमः भवति। भानूदयात् प्राक् उत्थाय प्रकोष्ठात् बहिः आगत्य प्रकृति प्रांगणे विचरणम् उत्तमा औषधिः। ये जनाः सूर्योदयात् प्राक् उत्थाय भ्रमणार्थं गच्छन्ति, ते अरुणोदयं प्रेक्ष्य परमानन्दम् अनुभवन्ति। रात्रौ वृक्षशाखासु निलीनाः खगाः प्रातः काले कलरवं कुर्वन्ति। सूर्योदयसमये आकाशपटले लालिमायाः साम्राज्यं भवति। प्रभातकालः सर्वजीवान् स्व–स्व कार्येषु योजयति। प्रभाते शरीरः स्फूर्तिमान् भवति।

1. गद्यांशस्य उचितं शीर्षकं लिखतु?
2. कदा, कुत्र विचरणम् उत्तमा ओषधिः?
3. गच्छन्ति पदस्य धातुं लकारं पुरुषं वचनं च लिखत?

4. वृक्षशाखासु पदस्य सामासिकं विग्रहं कुरुत?

5. आगत्य, प्रेक्ष्य, उत्थाय पदानां प्रकृति–प्रत्ययौ लिखत?

6. अनु उपसर्गस्य प्रयोगः कस्मिन् पदे अस्ति?

4. गावः क्षेत्रे चरन्ति। गोपालः गाः चारयति। सः सदा गोभिः सह तिष्ठति। स्वस्ति गोभ्यः ब्राह्मणेभ्यश्च। तृणं शस्यं च गोभ्यः देहि। वयं गोभ्यः दुग्धं प्राप्नुमः। गवाम् अवेक्षा सेवा च सम्यक् कर्तव्या। भारतीयाः गोषु मातृवत् भक्तिं कुर्वन्ति। गावः दुग्धं स्वास्थ्यकरं भवति।

1. गद्यांशस्य उचितं शीर्षकं लिखतु?

2. के गोषु मातृवत् भक्तिं कुर्वन्ति?

3. गवाम् पदस्य विभक्तिं वचनं लिखत?

4. स्वस्ति गोभ्यः रेखांकितपदे विभक्तिं सूत्रं च लिखत?

5. सः सदा गोभिः सह तिष्ठति। रेखांकितपदे विभक्तिं सूत्रं च लिखत?

6. चरन्ति पदस्य धातुं लकारं पुरुषं वचनं च लिखत?

7. कर्तव्यम् इति पदे प्रकृति–प्रत्ययौ लेख्यौ?

5. मानवजीवने अनुशासनस्य खलु महती आवश्यकता अस्ति। यदि मानवाः अनुशासनशीलाः न भवेयुः तदा तु विचित्रा जगतः गतिः स्यात्। यदि सर्वे जनाः स्वेच्छया कार्यं कुर्वन्ति तदा सर्वत्र एव कार्यहानिः भवेत्। अनुशासनेन एव अस्माकं सर्वाणि कार्याणि भवन्ति। यस्मिन् देशे अनुशासनव्यवस्था उत्तमा वर्तते, तस्मिन् देशे एव सुख–प्राप्तिः भवति। अनुशासनेन एव सर्वेषां कल्याणं भवति। अनुशासनयुक्तः देशः उन्नतिं प्राप्नोति।

1. गद्यांशस्य उचितं शीर्षकं लिखतु?

2. कदा कार्यहानिः भवेत्?

3. उन्नतिं पदस्य विलोमः कः भवति?

4. भवेयुः पदस्य धातुं लकारं पुरुषं वचनं च लिखत?

5. विचित्रा जगतः द्वयोः पदयोः मध्ये कः सम्बन्धः अस्ति?

6. यस्मिन् पदस्य विभक्तिं वचनं च लिखत?

7. सर्वत्र अव्ययस्य प्रयोगं कृत्वा एकस्य वाक्यस्य निर्माणं कुरुत?

6. वृक्षाः भूमौ उद्भवन्ति। वृक्षाः अपि मनुष्य इव भुक्त्वा पीत्वा च जीवन्ति। मूलानि वृक्षाणां मुखानि भवन्ति। ते पादैः जलं पिबन्ति, अतएव पादपाः कथ्यन्ते। तेषां मूलानि भूमितः रसं गृहीत्वा सर्वेषु अवयवेषु नयन्ति।, तेन ते प्रवर्धन्ते, पुष्पन्ति, फलन्ति च। वृक्षाः प्राणिनः बहूपकुर्वन्ति। ते शरणं, भोजनं, आश्रयं, छायां, पुष्पं, फलं, प्राण वायुं च ददन्ति।

1. गद्यांशस्य उचितं शीर्षकं लिखतु?

2. वृक्षाः अस्मभ्यं किं किं ददति?

3. भूक्त्वा, पीत्वा, गृहीत्वा पदेषु प्रकृति–प्रत्ययौ लिखत?

4. उद्‌भवन्ति, प्रवर्धन्ते, उपकुर्वन्ति पदेषु उपसर्गान् धातूंश्च लिखत?

5. बहूपकुर्वन्ति पदस्य संधि–विच्छेदं कृत्वा संधिनामोल्लेखं कुरुत?

6. वृक्ष पदस्य त्रीन् पर्यायान् लिखत?

7. वृक्ष इति शब्दस्य चतुर्थी–विभक्तेः बहुवचनं किं भवति?

7. अस्माकं देशस्य नाम भारतम् अस्ति। अस्मिन् देशे प्राचीनकाले 'भरत' नामक प्रतापी राजा बभूव। तस्य अभिधानेन अस्य देशस्य नाम 'भारतम्' अभवत्। अस्यां उत्तरस्यां दिशि हिमालयः पर्वतः शोभते। दक्षिणदिशायां समुद्रा इमं रक्षन्ति। अयं बहुषु प्रान्तेषु विभक्तोऽस्ति। अत्र नगराणि ग्रामाश्च सन्ति। अयं स्वतन्त्रदेशः धर्मनिरपेक्षश्च अस्ति। अत्र अनेके धर्मावलम्बिनो जनाः सानन्दम् स्नेहेन वसन्ति।

1. गद्यांशस्य उचितं शीर्षकं लिखतु?

2. भारतस्य उत्तरस्यां दक्षिणस्य दिशायां के रक्षन्ति?

3. अभवत् पदस्य धातुं लकारं पुरुषं वचनं च लिखत?

4. देशे इति पदस्य विभक्तिं वचनं लिखत?

5. धर्मावलम्बिनो पदस्य संधि–विच्छेदं कुरुत?

6. धर्मनिरपेक्षः पदस्य कः अर्थः?

7. भारतदेशस्य त्रीन् पर्यायवाचिनः शब्दान् लिखत?

8. अस्माकं विद्यालयः नगरात् बहिः रमणीयस्थाने विद्यते। विद्यालयं परितः रम्यमुपवनमस्ति। विद्यालये एकविंशति अध्यापकाः पंचशतं छात्राश्च सन्ति। विद्यालयस्य छात्राः प्रतिभाशालिनः, अनुशासनप्रियाश्च सन्ति। छात्राः न केवलं अध्ययने एव कुशलाः भवन्ति प्रत्युत ते क्रीडने प्रतियोगितासु, भाषणे, लेखने च स्वयोग्यतां प्रदर्श्य पुरस्काराणि लभन्ते। अस्माकं विद्यालयः आदर्श विद्यालयः अस्ति।

1. गद्यांशस्य उचितं शीर्षकं लिखतु?

2. छात्राः केषु कुशलाः सन्ति?

3. विद्यालयं परितः रम्यम् उपवनम् अस्ति। रेखांकित पदे विभक्तिं कारणं च लिखत?

4. गद्यांशे 21, 50 संख्यायाः कृते शब्दौ, कौ स्तः?

5. नगर शब्दस्य पंचमी–विभक्तेः एकवचनं किं भवति?

6. भू धातोः लट् लकारे प्रथमपुरुषस्य एकवचनं किं भवति?

7. पद्यांशे उप–उपसर्गस्य उदाहरणं चित्वा लिखत?

8. अस्माकं स्थाने षष्ठी–एकवचनं किं भवति?

9. सर्वासु भाषासु संस्कृत भाषा अति प्राचीना अस्ति। इयं सर्वभाषाणां जननी अस्तीति विद्वांसः कथयन्ति। पुरा संस्कृतभाषा सर्व–साधारणजनानां भाषा आसीत्। परं वैदेशिकशासकानां साम्राज्ये इयं भाषा ह्रासोन्मुखी बभूव। संस्कृतभाषायामेव ज्ञानविज्ञानयोर्निधिर्विधते। न केवलं भारतीयाः प्रत्युत

पाश्चात्याः विद्वांसोऽपि संस्कृतभाषां प्रति श्रद्धावन्तः सन्ति। संस्कृतभाषा सकलमूल्यानां रत्नाकरः अस्ति। अतः संस्कृतस्य प्रचारः प्रसारो वा आवश्यकः अस्ति। संस्कृतोन्नतिं विना भारतस्य प्रगतिः न भवितुमर्हति।

1. गद्यांशस्य उचितं शीर्षकं लिखतु?
2. के संस्कृतभाषां प्रति श्रद्धावन्तः सन्ति?
3. केन विना भारतस्य प्रगतिः नैव भवितुं अर्हति?
4. विना इत्यस्य योगे का विभक्तिः भवति?
5. प्रति इत्यस्य योगे का विभक्तिः भवति?
6. अस्तीति पदस्य संधिविच्छेदं कृत्वा नाम लिखतु?
7. अस् धातोः लङ्लकारे प्रथमपुरुषस्य एकवचनं किं भवति?
8. संस्कृत+उन्नति पदस्य संधिं कृत्वा नाम लिखतु?
9. गद्यांशात् त्रीणि अव्ययपदानि चित्वा लिखतु?

10. वर्षाकाले गगने मेघाः भवन्ति। ते गर्जन्ति, सौदामिन्यः स्फुरन्ति। सर्वत्र जलं भवति। ग्रामे मार्गाः पङ्कमयाः भवन्ति। वर्षाकाले मयूराः नृत्यन्ति, मण्डूकाः रटन्ति। वृक्षाः पल्लविताः भवन्ति। क्षेत्रेषु बीजानि वपन्ति। वर्षाकाले जलाशयाः पूर्णाः भवन्ति। नद्यः जलेन परिपूर्णाः वहन्ति। वृष्टिः देशस्य जीवनमस्ति। वर्षाजलसंरक्षणम् अस्माकं महत्कर्तव्यम्।

1. गद्यांशस्य उचितं शीर्षकं लिखतु?
2. वर्षाकाले प्रकृतिः कीदृशी भवति ?
3. क्षेत्राणि कीदृशानि भवन्ति?
4. सौदामिन्यः पर्यायः कः अस्ति?
5. भवन्ति, नृत्यन्ति, रटन्ति, वपन्ति, कुर्वन्ति, वहन्ति पदेषु धातून् लिखत?
6. वर्षाजल–पदस्य सामासिकं विग्रहं कुरुत?
7. मयूराः नृत्यन्ति स्थाने एकवचनं किं भवति?
8. वृष्टिः पदे प्रकृतिप्रत्ययौ लेख्यौ?
9. ते गर्जति इत्यस्य वाक्यशुद्धिं कुरुत?
10. सर्वत्र–अव्ययस्य प्रयोगं कृत्वा वाक्यनिर्माणं कुरुत?

—————————

# (5) रचनात्मकं कार्यम्

## संकेताधारितम् अनुच्छेदलेखनम्

1. मंजूषातः पदं चित्वा रिक्तस्थानस्य पूर्तिं कृत्वा कथां पूर्णां करोतु।

(कुपितः, उत्पतति, अम्लानि, पुनः पुनः, जम्बुकः, द्राक्षालतां, पक्वानि, तथापि, अनेकानि, आहारार्थं, चिन्तयति)

एकः .................................. अस्ति। सः एकदा .................................. वने भ्रमति। तत्र सः .................................. पश्यति। लतायाम् .................................. द्राक्षाफलानि सन्ति। तानि ..................................। जम्बुकः अद्य मम द्राक्षा फलानां भोजनम् इति .................................. । द्राक्षां लब्धुं उपरि .................................. किन्तु द्राक्षाफलानि न प्राप्नोति। जम्बुकः. .................................. उत्पतति तथापि फलानि न प्राप्नोति। जम्बुकः .................................. भवति। द्राक्षाफलानि .................................. इति वदति। अनन्तरं स्वस्थानं गच्छति।

2. मंजूषातः पदं चित्वा रिक्तस्थानस्य पूर्तिं कृत्वा कथां पूर्णां करोतु।

(समाधानं, शिष्यः, अत्रैव, परीक्षार्थम्, पण्डितः, सर्वव्यापी, नास्ति, विद्याभ्यासार्थम्)

काशी नगरे एकः .................................. अस्ति। पण्डितस्य समीपे एकः .................................. आगच्छति शिष्यः वदति–आचार्य! .................................. आगतः। पण्डित शिष्य बुद्धि .................................. पृच्छति–वत्स! देवः कुत्र अस्ति?शिष्यः वदति–गुरो! देवः कुत्र ..................................?कृपया भवान् एव समाधानं वदतु। सन्तुष्टः गुरु वदति–देवः सर्वत्र अस्ति। देवः ..................................। त्वम् बुद्धिमान। अतः विद्याभ्यासार्थम् .................................. वस।

3. मंजूषातः पदं चित्वा रिक्तस्थानपूर्तिं कृत्वा कथां पूर्णां करोतु।

(बहुदूरं, काकः, संतोषः, प्रस्तरखण्डान्, पिबति, तृषितः, उपरि, घटं, स्वल्पम्, पिबामि, जलार्थं, उपायं)

एकः .................................. अस्ति। सः बहु .................................. सः .................................. भ्रमति। तदा ग्रीष्मकालः। कुत्रापि .................................. नास्ति। काकः .................................. गच्छति। तत्र सः एकः .................................. पश्यति। काकस्य अतीव .................................. भवति किन्तु घटे .................................. एवं जलं अस्ति। जलं कथं .................................. इति काकः चिन्तयति। सः एकः .................................. करोति। .................................. आनयति। घटे पूरयति। जलं .................................. आगच्छति। काकः सन्तोषेण जलं .................................. । ततः गच्छति

4. मंजुषात् पदं चित्वा रिक्तस्थानपूर्तिं कृत्वा कथां पूर्णां करोतु।

(मन्दम्, प्रथमम्, गर्वम्, लज्जितः, निर्णायकः, धावति, उपविशति, शशकः, अग्रे, विजयः, द्वौ, निद्रागतः)

एकः .................................. कच्छपं पश्यति हसति च। भो कच्छप! त्वम् .................................. चलसि। कच्छपः कथयति तव हृदये .................................. अस्ति किन्तु अहम् .................................. धावामि। शशकः कथयति–तं वृक्षं स्पृशावः। यः .................................. स्पृशति तस्य एव ................................... भवति। एकः मूषकः .................................. । सः कथयति एकः .................................. त्रयः। द्वौ धावतः।

शशकः तीव्रम् ................................... किन्तु मध्ये एकस्मिन् स्थाने ................................... भवति। कच्छपः .......... .......................... गच्छति। क्षणमपि न ................................... । तस्य विजयः भवति। शशकः ................................ ... भवति।

5. मंजूषातः पदं चित्वा रिक्तस्थानस्य पूर्तिं कृत्वा कथां पूर्णां करोतु।

(हत्वा, स्वागताय, भारतदेशे, अमावस्यायां, श्रीरामः, अयोध्यां, दीपावली, उत्साहेन, रात्रौ)

अस्माकं ................................... अनेकानि पर्वणि सन्ति। तेषु ................................... पर्वणः सर्वाधिकं महत्त्वम् अस्ति।

कार्तिक मासस्य कृष्णपक्षस्य ................................... तिथौ दीप–मालिका अति ................................... सम्पन्ना भवति। अस्मिन् दिने ................................... रावणं ................................... चतुर्दश वर्षाणि अनन्तरम् वनवासात् सीतया लक्ष्मणेन च सह ................................... प्रत्यावर्तत। अयोध्यावासिनः तेषां ................................... स्वगृहेषु दीपमालाभिः प्रकाशम् अकुर्वन्। ................................... दीपानां पंक्तयः प्रकाशन्ते।

6. जीवने पुस्तकस्य महत्त्वं इति विषये मंजूषातः पदं चित्वा दशवाक्यानि लिखतु।

(पुस्तकं, महत्त्व, मित्राणि, बुद्धिं वर्धयति, ज्ञानं ददाति, विश्वं योजयति, पुस्तकालये, विविध विषयानि, प्रतिदिनं पठामि, पुस्तकानि रक्षणीयानि)

1. ...........................................................
2. ...........................................................
3. ...........................................................
4. ...........................................................
5. ...........................................................
6. ...........................................................
7. ...........................................................
8. ...........................................................
9. ...........................................................
10. ...........................................................

7. परोपकारः इति विषये मंजूषातः पदं चित्वा दश–वाक्यानि लिखतु।

(परेषां उपकारः, निस्वार्थ भावनया, परहितार्थं, प्रकृतिरपि परोपकारे, वृक्षाः फलानि, नद्याः जलानि, मेघाः जलं, प्रत्युपकारं न, दधीचिः, शिविप्रभृति, वयमपि परोपकारम्)

1. ...........................................................
2. ...........................................................
3. ...........................................................
4. ...........................................................
5. ...........................................................

6. ............................................................

7. ............................................................

8. ............................................................

9. ............................................................

10. ............................................................

8. धेनोः महत्त्वम् इति विषये मंजूषातः पदं चित्वा दशवाक्यानि लिखतु

(धेनुः, तृणानि भक्षित्वा, मधुरं दुग्धं, वत्साः बलीवर्दाः, कृषकाः, अस्माकं पूजनीया, गोमयं इन्धने, दुग्धं पीत्वा परिपुष्टाः, दुग्धं, दधि, तक्रम्, नवनीतं, धृतं, पंचगव्यम्, गावो विश्वस्य मातरः)

1. ............................................................

2. ............................................................

3. ............................................................

4. ............................................................

5. ............................................................

6. ............................................................

7. ............................................................

8. ............................................................

9. ............................................................

10. ............................................................

9. उद्यानस्य चित्रं दृष्ट्वा दश–वाक्यानि लिखतु।

10. संस्कृतभाषायाः महत्त्वम् इति विषयम् अवलम्ब्य दशवाक्यानि लिखतु।

11. विद्यायाः महत्त्वम् विषयम् अवलम्ब्य दशवाक्यानि लिखतु।

12. पुस्तकालयः इति विषयम् अवलम्ब्य दशवाक्यानि लिखतु।

———————

# (6) व्याकरणम्

## (क) संस्कृत–वर्णमाला–वर्णोच्चारणस्थानानि प्रयत्नानि च

संस्कृत व्याकरणे पाणिनीयाष्टाध्यायीग्रन्थे चतुर्दश माहेश्वरसूत्राणि रचितानि तेषां उत्पत्तिः भगवतः शिवस्य ढमरुवाद्ययन्त्रात् मन्यते।

14 माहेष्वर सूत्राणि निम्नलिखितानि सन्ति –

1. अइउण् 2. ऋलृक् 3. एओङ् 4. ऐऔच् 5. हयवरट् 6. लण् 7. ञमङणनम् 8. झभञ्

9. घढधष् 10. जबगडदश् 11. खफछठथचटतव् 12. कपय् 13. शषसर् 14. हल्

स्वराः त्रिविधाः सन्ति–ह्रस्वदीर्घप्लुताष्च

1. ह्रस्व–स्वराः – एकमात्रिकस्वराः ह्रस्वस्वराः, अ इ उ ऋ लृ ह्रस्वस्वराः सन्ति।

2. दीर्घस्वराः – द्विमात्रिकस्वराः दीर्घस्वराः उच्यन्ते– आ ई ऊ ॠ ए ओ ऐ, औ दीर्घस्वराः सन्ति।

3. प्लुत स्वराः – त्रिमात्रिकस्वराः प्लुतस्वराः उच्यन्ते प्लुतस्वरस्य चिह्नं (३) अस्ति। यथा–भो कृष्ण ३, हे! राम ३

वैदिकस्वराः अपि त्रिविधाः सन्ति–उदात्त अनुदात्त स्वरितश्च'

व्यंजनानि त्रयत्रिंषत् सन्ति।

कादयो मावसानानि स्पर्शव्यंजनानि पंचविंशतिः सन्ति

| वर्गस्य नामः | | वर्गस्य व्यंजनानि | | | | |
|---|---|---|---|---|---|---|
| | | 1 | 2 | 3 | 4 | 5 |
| क–वर्गः | – | क | ख | ग | घ | ङ |
| च–वर्गः | – | च | छ | ज | झ | ञ |
| ट–वर्गः | – | ट | ठ | ड | ढ | ण |
| त–वर्गः | – | त | थ | द | ध | न |
| प–वर्गः | – | प | फ | ब | भ | म |

चत्वारः अन्तस्थवर्णाः – य व र ल

चत्वार उष्म वर्णाः – ष श स ह

वर्णोच्चारण–स्थानानि

1. अ आ क ख ग घ ङ ह विसर्गस्य च उच्चारणस्थानं कण्ठः अस्ति।

2. इ ई च छ ज झ ञ य श वर्णानाम् उच्चारण स्थानं तालुः अस्ति।

3. ऋ ॠ ट ठ ड ढ ण र ष वर्णानाम् उच्चारणस्थानं मूर्धा ।

4. लृ त थ द ध न ल स वर्णानाम् उच्चारणस्थानं दन्ताः ।

5. उ ऊ प फ ब भ म उपध्मानीय (‿ प ‿ फ) वर्णानाम् उच्चारणस्थानम् औष्ठौ ।

6. व वर्णस्य उच्चारणस्थानं दन्तौष्ठम्।

7. क ‿ ख जिह्वामूलीयस्य जिह्वामूलं स्थानम्।

8. ओ, औ वर्णयोः उच्चारणस्थानं कण्ठ–औष्ठम्।

9. ए, ऐ वर्णयोः उच्चारणस्थानं कण्ठतालु ।

10. ङ ञ ण न म वर्णानाम् उच्चारणस्थानं नासिका ।

## प्रयत्नः

प्रयत्नः द्विविधः आभ्यान्तरः बाह्यश्च।

आभ्यान्तरप्रयत्नः – अत्र जिह्या मुखे आभ्यन्तररूपेण प्रयत्नः क्रियते।

| **स्पृष्टः** | **ईषत्स्पृष्टः** | **विवृतम्** | **ईषद्विवृतम्** | **संवृत्तम्** |
|---|---|---|---|---|
| क्, ख्, ग्, घ्, ङ् | य् | अ, इ | श् | ह्रस्वः अ |
| च्, छ्, ज्, झ्, ञ् | व् | उ, ऊ | ष् | |
| ट्, ठ्, ड्, ढ्, ण् | र् | लृ ए | स् | |
| त्, थ्, द्, ध्, न् | ल् | ऐ ओ | ह् | |
| प्, फ्, ब्, भ्, म् | | औ | | |

बाह्यप्रयत्नः एकादशविधः (अत्र बाह्यरूपेण क्रियया प्रयत्नः दृश्यते।)

ख्, फ्, छ्, च्, ट्, त्, क्, प्, श्, ष्, स् (विवारः, श्वासः, अघोषः)

ह् य् व् र् ल् ञ् म् ङ् ण् न् ज् झ् भ् घ्, ड् ध् ज् व् ग् ड् द् (संवारः, नादः, घोषः)

क–च–ट–त–प–वर्गाणां प्रथमः (क, च, ट, त, प) तृतीयः (ग, ज, ड, द, ब) पञ्चमः (ङ, ञ, ण, न, म) य, र, ल, व — अल्पप्राणः

क–च–ट–त–प–वर्गाणां द्वितीयः (ख, छ, ढ, थ, फ) चतुर्थः (घ, झ, ढ, ध, भ) — महाप्राणः

अ, इ, उ, ऋ, लृ, ए, ऐ, ओ, औ, — उदात्तः, अनुदात्तः, स्वरितः

## (ख) सन्धिः

परः सन्निकर्षः संहिता – वर्णानां अतिशयितः सन्निकटता संहिता उच्यते। वर्णानां परस्परमेलनं सन्धि उच्यते। संस्कृतभाषायां एकपदे, धातुउपसर्गयोः मध्ये, समासमध्ये संधिकार्यं नित्यं भवति। वाक्ये तु वक्तुः विवक्षोपरि भवति।

संहितैकपदे नित्या नित्या धातूपसर्गयोः।

नित्या समासे वाक्ये तु सा विवक्षामपेक्षते।।

सन्धिः त्रिविधः – 1. अच् सन्धिः (स्वरसन्धि) 2. हल् सन्धिः (व्यंजनसन्धि) 3. विसर्गसन्धिः

1. अच् (स्वरसन्धिः) – यत्र स्वरवर्णानां परस्परं मेलनं भवति तत्र स्वरसंधिः भवति। स्वरसन्धेः दीर्घः, गुणः, यण्, वृद्धिः, अयादिः, पूर्वरूपं, पररूपंश्च भेदाः सन्ति।

2. हल् (व्यंजनसन्धिः) – यत्र व्यंजनवर्णानां परस्परमेलनं भवति तत्र व्यंजनसन्धिः भवति। व्यंजनसन्धिः श्चुत्व, ष्टुत्व, णत्व, षत्व, छत्व चादि भेदाः सन्ति।

3. विसर्गसन्धिः – यत्र विसर्गस्यस्थाने परिवर्तनं भवति तत्र विसर्गसन्धिः भवति। विसर्गस्य स्थाने सकार रुत्वं भवति, विसर्गस्य लोपः भवति।

1. अच् (स्वर) सन्धिः

(i) दीर्घसन्धिः – अकः सवर्णे दीर्घः – अ,आ,इ,ई,उ,ऊ,ऋ,ॠ वर्णानां परे सवर्णः अर्थात् अ,आ,इ,ई,उ,ऊ,ऋ,ॠ, वर्णः भवति तर्हि द्वयोः पूर्व–परस्थाने आ, ई, ऊ, ॠ दीर्घः एकादेशः भवति।

(i) अ / आ+अ / आ=आ (ii) इ / ई+इ / ई=ई

(iii) उ / ऊ+उ / ऊ=ऊ (iv) ऋ / ॠ+ऋ+ॠ=ॠ

| | | | | |
|---|---|---|---|---|
| यथा – परमार्थः | – | परम+अर्थः | – | अ+अ=आ |
| विद्यालयः | – | विद्या+आलयः | – | आ+आ=आ |
| जर्जरावस्था | – | जर्जर+अवस्था | – | अ+अ=आ |
| तवाकारः | – | तव+आकारः | – | अ+आ=आ |
| कवीश्वरः | – | कवि+ईश्वरः | – | इ+ई=ई |
| श्रीशः | – | श्री+ईशः | – | ई+ई=ई |
| अतीव | – | अति+इव | – | इ+इ=ई |
| राज्ञीह | – | राज्ञी+इह | – | ई+इ=ई |
| भानूदयः | – | भानु+उदयः | – | उ+उ=ऊ |
| साधूचुः | – | साधु+ऊचुः | – | उ+ऊ=ऊ |
| चमूर्जः | – | चमू+ऊर्जः | – | ऊ+ऊ=ऊ |
| वधूपरि | – | वधू+उपरि | – | ऊ+उ=ऊ |
| कृकारः | – | कृ + ऋकारः | – | ऋ+ऋ=ॠ |
| होतृकारः | – | होतृ + ऋकारः | – | ऋ+ऋ=ॠ |

2. गुणसन्धिः – आद्गुणः– अ आ वर्णस्य परे यदि इ ई उ ऊ ऋ ॠ लृ वर्णः भवति तर्हि पूर्व पर द्वयोः स्थाने क्रमशः ए,ओ,अर्, अल् गुणः एकादेशः भवति।

(i) अ/आ+इ/ई=ए (ii) अ/आ+उ/ऊ=ए

(iii) अ/आ+ऋ/ॠ=अर् (iv) अ/आ+ल =अल्

| | | | | | | |
|---|---|---|---|---|---|---|
| यथा – | उपेन्द्रः | – | उप+इन्द्रः | – | अ+इ=ए |
| | गणेशः | – | गण+ईशः | – | अ+ई=ए |
| | रमेशः | – | रमा+ईशः | – | आ+ई=ए |
| | गंगेश्वरः | – | गंगा+ईश्वरः | – | आ+ई=ए |
| | परोपकारः | – | पर+उपकारः | – | अ+उ=ओ |
| | सूर्योदयः | – | सूर्य+उदयः | – | अ+उ=ओ |
| | गंगोदकम् | – | गंगा+उदकम् | – | आ+उ=ओ |
| | गगनोर्ध्वम् | – | गगन+ऊर्ध्वम् | – | अ+ऊ=ओ |
| | महर्षिः | – | महा+ऋषिः | – | आ+ऋ=अर् |
| | देवर्षिः | – | देव+ऋषिः | – | अ+ऋ=अर् |
| | ग्रीष्मर्तुः | – | ग्रीष्म+ऋतुः | – | अ+ऋ=अर् |
| | कृष्णर्द्धिः – | | कृष्ण+ऋद्धिः | – | अ+ऋ=अर् |
| | तवल्कारः | – | तव+लृकारः | – | अ+लृ=अल |

3. वृद्धिसन्धिः – वृद्धिरेचि–अ,आ वर्णस्य परे ए,ऐ,ओ,औ वर्णः भवति तर्हि पूर्वपरयोः स्थाने ऐ, औ वृद्धि एकादेशः भवति।

(i) अ/आ+ए/ऐ=ऐ (ii) अ/आ+ओ/औ=औ

| | | | | | |
|---|---|---|---|---|---|
| यथा – | कृष्णैकत्वम् | – | कृष्ण+एकत्वम् | – | अ+ए=ऐ |
| | गंगैषा | – | गंगा+एषा | – | आ+ए=ऐ |
| | सदैव | – | सदा+एव | – | आ+ए=ऐ |
| | मतैक्यम् | – | मत+ऐक्यम् | – | अ+ऐ=ऐ |
| | जलौघः | – | जल+ओघः | – | अ+ओ=औ |
| | गंगौघः | – | गंगा+ओघः | – | आ+ओ=औ |
| | दिव्यौषधिः | – | दिव्य+ओषधिः | – | अ+औ=औ |
| | महौषधिः | – | महा+ओषधिः | – | आ+औ=औ |

4. यण्–सन्धिः–इकोयणचि – इ,ई,उ,ऊ,ऋ,ॠ, लृ वर्णस्य परे असमान स्वरः भवति तर्हि पूर्व वर्ण इ,ई,उ,ऊ,ऋ,ॠ,लृ स्थाने क्रमशः य् व् र् ल् आदेशः भवति।

(i) इ / ई+स्वरः=य्  (ii) उ / ऊ+स्वरः = व्

(iii) ऋ / ऋ+स्वरः=र  (iv) ल+स्वरः = ल्

| | | | | | | |
|---|---|---|---|---|---|---|
| यथा | – | प्रत्येकम् | – | प्रति+एकम् | – | इ+ए=य् |
| | | इत्याह | – | इति+आह | – | इ+आ=य् |
| | | दध्यत्र | – | दधि+अत्र | – | इ+अ=य् |
| | | कल्यागमः | – | कलि+आगमः | – | इ+आ=य |
| | | मध्वरिः | – | मधु+अरिः | – | उ+अ=व |
| | | गुर्वादेशः | – | गुरु+आदेशः | – | उ+आ=व् |
| | | साध्विति | – | साधु+इति | – | उ+इ=व् |
| | | विष्ण्वैक्यम् | – | विष्णु+ऐक्यम् | – | उ+ऐ=व् |
| | | धात्रंशः | – | धातृ+अंशः | – | ऋ+अ=र् |
| | | पित्राकृतिः | – | पितृ+आकृतिः | – | ऋ+आ=र् |
| | | सवित्रुदयः | – | सवितृ+उदयः | – | ऋ+अ=र् |
| | | लाकृतिः | – | लृ+आकृतिः | – | ल +आ=ल् |

5. अयादि – एचोऽयवायावः – ए,ओ,ऐ,औ वर्णस्य परे यदि स्वरः भवति तर्हि ए,ओ,ऐ,औ पूर्व वर्णयोः स्थाने क्रमशः अय्, अव्, आय्, आव, आदेशः भवति।

(i) ए + स्वरः = अय्  (ii) ओ + स्वरः = अव्

(iii) ऐ + स्वरः = आय्  (iv) औ + स्वरः = आव्

| | | | | | |
|---|---|---|---|---|---|
| यथा – | नयनम् | – | ने+अयनम् | – | ए+अ= अय् |
| | भायनम् | – | भो+अयनम् | – | ए+अ= अय् |
| | संचयः | – | संचे+अः | – | ए+अ= अय् |
| | जयः | – | जे+अः | – | ए+अ= अय् |
| | पवनः | – | पो+अनः | – | ओ+अ= अव् |
| | भवति | – | भो+अति | – | ओ+अ= अव् |
| | श्रवणम् | – | श्रो+अणम् | – | ओ+अ= अव् |
| | गुरवे | – | गुरो+ए | – | ओ+ए= अव् |
| | गायकः | – | गै+अकः | – | ऐ+अ= आय् |
| | नाविकः | – | नौ+इकः | – | औ+इ=आव् |
| | पावकः | – | पौ+अकः | – | औ+अ= आव् |

## (ग) शब्द–रूपाणि

अजन्ताः

सर्वनाम–शब्दाः

सर्वशब्दः, **पुँल्लिङ्गम्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| सर्वः | सर्वौ | सर्वे | प्रथमा |
| सर्वम् | सर्वौ | सर्वान् | द्वितीया |
| सर्वेण | सर्वाभ्याम् | सर्वैः | तृतीया |
| सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः | चतुर्थी |
| सर्वस्मात् | सर्वाभ्याम् | सर्वेभ्यः | पंचमी |
| सर्वस्य | सर्वयोः | सर्वेषाम् | षष्ठी |
| सर्वस्मिन् | सर्वयोः | सर्वेषु | सप्तमी |

पूर्वशब्दः **पुँल्लिङ्गम्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| पूर्वः | पूर्वौ | पूर्वे / पूर्वाः | प्रथमा |
| पूर्वम् | पूर्वै | पूर्वान् | द्वितीया |
| पूर्वेण | पूर्वाभ्याम् | पूर्वैः | तृतीया |
| पूर्वस्मै | पूर्वाभ्याम् | पूर्वेभ्यः | चतुर्थी |
| पूर्वस्मात् | पूर्वाभ्याम् | पूर्वेभ्यः | पंचमी |
| पूर्वस्य | पूर्वयोः | पूर्वेषाम् | षष्ठी |
| पूर्वस्मिन् / पूर्वे | पूर्वयोः | पूर्वेषु | सप्तमी |

द्वितीय–शब्दः **पुँल्लिङ्गम्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| द्वितीयः | द्वितीयौ | द्वितीयाः | प्रथमा |
| द्वितीयम् | द्वितीयौ | द्वितीयान् | द्वितीया |
| द्वितीयेन | द्वितीयाभ्याम् | द्वितीयैः | तृतीया |
| द्वितीयस्मै / | द्वितीयाभ्याम् | द्वितीयेभ्यः | चतुर्थी |

| | | | |
|---|---|---|---|
| द्वितीयाय | द्वितीयाभ्याम् | द्वितीयेभ्यः | पंचमी |
| द्वितीयस्य | द्वितीययोः | द्वितीयानाम् | षष्ठी |
| द्वितीयस्मिन् | द्वितीययोः | द्वितीयेषु | सप्तमी |

हरि–शब्दः, इ–कारान्तः, **पुँल्लिङ्गम्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| हरिः | हरी | हरयः | प्रथमा |
| हरिम् | हरी | हरीन् | द्वितीया |
| हरिणा | हरिभ्याम् | हरिभिः | तृतीया |
| हरये | हरिभ्याम् | हरिभ्यः | चतुर्थी |
| हरेः | हरिभ्याम् | हरिभ्यः | पंचमी |
| हरेः | हर्योः | हरीणाम् | षष्ठी |
| हरौ | हर्योः | हरिषु | सप्तमी |
| हे हरे | हे हरौ | हे हरयः | सम्बोधनम् |

सखि–शब्दः, इ–कारान्तः, **पुँल्लिङ्गम्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| सखा | सखायौ | सखायः | प्रथम |
| सखायम् | सखायौ | सखीन् | द्वितीया |
| सख्या | सखिभ्याम् | सखिभिः | तृतीया |
| सख्ये | सखिभ्याम् | सखिभ्यः | चतुर्थी |
| सख्युः | सखिभ्याम् | सखिभ्यः | पंचमी |
| सख्युः | सख्योः | सखीनाम् | षष्ठी |
| सख्यौ | सख्योः | सखिषु | सप्तमी |
| हे सखे | हे सखायौ | हे सखायः | सम्बोधनम् |

पितृशब्दः, ऋ–कारान्तः, **पुँल्लिङ्गम्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| पिता | पितरौ | पितरः | प्रथमा |
| पितरम् | पितरौ | पितृन् | द्वितीया |

| | | | |
|---|---|---|---|
| पित्रा | पितृभ्याम् | पितृभिः | तृतीया |
| पित्रे | पितृभ्याम् | पितृभ्यः | चतुर्थी |
| पितुः | पितृभ्याम् | पितृभ्यः | पंचमी |
| पितुः | पित्रोः | पितृणाम् | षष्ठी |
| पितरि | पित्रौः | पितृषु | सप्तमी |
| हे पितः | हे पितरौ | हे पितरः | सम्बोधनम् |

रमा शब्दः आकारान्त **स्त्रीलिङ्गम्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| रमा | रमे | रमाः | प्रथमा |
| रमाम | रमे | रमाः | द्वितीया |
| रमया | रमाभ्याम् | रमाभिः | तृतीया |
| रमायै | रमाभ्याम् | रमाभ्यः | चतुर्थी |
| रमायाः | रमाभ्याम् | रमाभ्यः | पंचमी |
| रमायाः | रमयोः | रमाणाम् | षष्ठी |
| रमायाम् | रमयोः | रमासु | सप्तमी |
| हे रमे | हे रमे | हे रमाः | सम्बोधनम् |

स्वसृ–शब्दः, ऋकान्तः, **स्त्रीलिङ्गम्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| स्वसा | स्वसारौ | स्वसारः | प्रथमा |
| स्वसारम् | स्वसारौ | स्वसृः | द्वितीया |
| स्वस्रा | स्वसृभ्याम् | स्वसृभिः | तृतीया |
| स्वस्रे | स्वसृभ्याम् | स्वसृभ्यः | चतुर्थी |
| स्वसुः | स्वसृभ्याम् | स्वसृभ्यः | पंचमी |
| स्वसुः | स्वस्रोः | स्वसृणाम् | षष्ठी |
| स्वसरि | स्वस्रोः | स्वसृषु | सप्तमी |
| हे स्वसः | हे स्वसारौ | हे स्वसारः | सम्बोधन |

गोशब्दः, ओकारान्तः, **पुँल्लिङ्गम्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
| --- | --- | --- | --- |
| गौः | गावौ | गावः | प्रथमा |
| गाम् | गावौ | गाः | द्वितीया |
| गवा | गोम्याम् | गोभिः | तृतीया |
| गवे | गोभ्याम् | गोभ्यः | चतुर्थी |
| गोः | गोभ्याम् | गोभ्यः | पंचमी |
| गोः | गवोः | गवाम् | षष्ठी |
| गवि | गवोः | गोषु | सप्तमी |
| हे गोः | हे गावो | हे गावः | सम्बोधन |

राजन्–हलन्तः, **पुँल्लिङ्गम्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
| --- | --- | --- | --- |
| राजा | राजानौ | राजानः | प्रथमा |
| राजानम् | राजानौ | राज्ञः | द्वितीया |
| राज्ञा | राजभ्याम् | राजभिः | तृतीया |
| राज्ञे | राजभ्याम् | राजभ्यः | चतुर्थी |
| राज्ञः | राजभ्याम् | राजभ्यः | पंचमी |
| राज्ञः | राज्ञोः | राज्ञाम् | षष्ठी |
| राज्ञि / राजनि | राज्ञोः | राजसु | सप्तमी |
| हे राजन् | हे राजानौ | हे राजानः | सम्बोधनम् |

तादृश्–शकारान्त– **नपुंसकलिङ्गम्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
| --- | --- | --- | --- |
| तादृक् / तादृग् | तादृशौ | तादृशः | प्रथमा |
| तादृशम् | तादृशौ | तादृशः | द्वितीया |
| तादृशाः | तादृग्भ्याम् | तादृग्भिः | तृतीया |
| तादृशे | तादृग्भ्याम् | तादृग्भ्यः | चतुर्थी |
| तादृशः | तादृग्भ्याम् | तादृग्भ्यः | पंचमी |
| तादृशः | तादृशोः | तादृशाम् | षष्ठी |

| | | | |
|---|---|---|---|
| तादृशि | तादृशोः | तादृक्षु | सप्तमी |
| हे तादृक्/तादृग् | हे तादृशौ | हे तादृशः | सम्बोधनम् |

विद्वस्–सकारान्त–**पुँल्लिङ्गम्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| विद्वान् | विद्वांसौ | विद्वांसः | प्रथमा |
| विद्वांसम् | विद्वांसौ | विदुषः | द्वितीया |
| विदुषा | विद्वद्भ्याम् | विद्वद्भिः | तृतीया |
| विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः | चतुर्थी |
| विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः | पंचमी |
| विदुषः | विदुषोः | विदुषाम् | षष्ठी |
| विदुषि | विदुषोः | विद्वत्सु | सप्तमी |
| हे विद्वन् | हे विद्वांसौ | हे विद्वांसः | सम्बोधनम् |

दिश्–शकारान्त–**स्त्रीलिङ्गम्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| दिक्/दिग् | दिशौ | दिशः | प्रथमा |
| दिशम् | दिशौ | दिशः | द्वितीया |
| दिशा | दिग्भ्याम् | दिग्भिः | तृतीया |
| दिशे | दिग्भ्याम् | दिग्भ्यः | चतुर्थी |
| दिशः | दिग्भ्याम् | दिग्भ्यः | पंचमी |
| दिशः | दिशोः | दिशाम् | षष्ठी |
| दिशि | दिशोः | दिक्षु | सप्तमी |
| हेदिक्/दिग् | हे दिशौ | हे दिशः | सम्बोधनम् |

अदस्–सकारान्त **पुँल्लिङ्गम्**

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| असौ | अमू | अमी | प्रथमा |
| अमुम् | अमू | अमून् | द्वितीया |

| | | | |
|---|---|---|---|
| अमुना | अमूभ्याम् | अमूभिः | तृतीया |
| अमुष्मै | अमूभ्याम् | अमीभ्यः | चतुर्थी |
| अमुष्मात् | अमूभ्याम् | अमीभ्यः | पंचमी |
| अमुष्य | अमुयोः | अमीषाम् | षष्ठी |
| अमुष्मिन् | अमूयोः | अमीषु | सप्तमी |

वाच्–चकारान्त–स्त्रीलिंगम्

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| वाच्/वाक् | वाचौ | वाचः | प्रथमा |
| वाचम् | वाचौ | वाचः | द्वितीया |
| वाचा | वाग्भ्याम् | वाग्भिः | तृतीया |
| वाचे | वाग्भ्याम् | वाग्भ्यः | चतुर्थी |
| वाचः | वाग्भ्याम् | वाग्भ्यः | पंचमी |
| वाचः | वाचोः | वाचाम् | षष्ठी |
| वाचि | वाचोः | वाक्षु | सप्तमी |
| हे वाक्/वाग् | हे वाचौ | हे वाचः | सम्बोधनम् |

पंचम्– **पुँल्लिङ्गम् स्त्रीलिङ्गम् नपुंसकलिङ्गम्**

| | |
|---|---|
| पञ्च | –प्रथमा |
| पञ्च | –द्वितीया |
| पञ्चभिः | –तृतीया |
| पञ्चभ्यः | –चतुर्थ |
| पञ्चभ्यः | –पंचमी |
| पञ्चानाम् | – षष्ठी |
| पञ्चसु | –सप्तमी |
| हे पञ्च | –सम्बोधनम् |

वाक्येषु क्रिया–प्रयोगः

## (घ) धातुरूपाणि

### परस्मैपदी

भू–धातुः, लट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| भवति | भवतः | भवन्ति | प्रथमपुरुषः |
| भवसि | भवथः | भवथ | मध्यमपुरुषः |
| भवामि | भवावः | भवामः | उत्तमपुरुषः |

लोट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| भवतु/भवतात् | भवताम् | भवन्तु | प्रथमपुरुषः |
| भव | भवतम् | भवत | मध्यमपुरुषः |
| भवानि | भवाव | भवाम | उत्तमपुरुषः |

लृट्–लकारः

| एकवचनः | द्विवचनः | बहुवचनम् | पुरुषः |
|---|---|---|---|
| भविष्यति | भविष्यतः | भविष्यन्ति | प्रथमपुरुषः |
| भविष्यसि | भविष्यथः | भविष्यथ | मध्यमपुरुषः |
| भविष्यामि | भविष्यावः | भविष्यामः | उत्तमपुरुषः |

लङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| अभवत् | अभवताम् | अभवन् | प्रथमपुरुषः |
| अभवः | अभवतम् | अभवत | मध्यमपुरुषः |
| अभवम् | अभवाव | अभवाम | उत्तमपुरुषः |

विधिलिङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| भवेत् | भवेताम् | भवेयुः | प्रथमपुरुषः |
| भवेः | भवेतम् | भवेत | मध्यमपुरुषः |

| | | | |
|---|---|---|---|
| भवेयम् | भवेव | भवेम | उत्तमपुरुषः |

पठ्–धातुः, लट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| पठति | पठतः | पठन्ति | प्रथमपुरुषः |
| पठसि | पठथः | पठत | मध्यमपुरुषः |
| पठामि | पठावः | पठामः | उत्तमपुरुषः |

लोट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| पठतु / पठतात् | पठताम् | पठन्तु | प्रथमपुरुषः |
| पठ | पठतम् | पठत | मध्यमपुरुषः |
| पठानि | पठाव | पठाम | उत्तमपुरुषः |

लृट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| पठिष्यति | पठिष्यतः | पठिष्यन्ति | प्रथमपुरुषः |
| पठिष्यसि | पठिष्यथः | पठिष्यथ | मध्यमपुरुषः |
| पठिष्यामि | पठिष्यावः | पठिष्यामः | उत्तमपुरुषः |

लङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| अपठत् | अपठताम् | अपठन् | प्रथमपुरुषः |
| अपठः | अपठतम् | अपठत | मध्यमपुरुषः |
| अपठम् | अपठाव | अपठाम | उत्तमपुरुषः |

विधिलिङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| पठेत् | पठेताम् | पठेयुः | प्रथमपुरुषः |
| पठेः | पठेतम् | पठेत | मध्यमपुरुषः |
| पठेयम् | पठेव | पठेम | उत्तमपुरुषः |

कृ–धातुः, लट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| करोति | कुरुतः | कुर्वन्ति | प्रथमपुरुषः |

| | | | |
|---|---|---|---|
| करोषि | कुरुथः | कुरुथ | मध्यमपुरुषः |
| करोमि | कुर्वः | कुर्मः | उत्तमपुरुषः |

लोट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| करोतु | कुरुताम् | कुर्वन्तु | प्रथमपुरुषः |
| कुरु | कुरुतम् | कुरुत | मध्यमपुरुषः |
| करवाणि | करवाव | करवाम | उत्तमपुरुषः |

लङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| अकरोत् | अकुरुताम् | अकुर्वन् | प्रथमपुरुषः |
| अकरोः | अकुरुतम् | अकुरुत | मध्यमपुरुषः |
| अकरवम् | अकुर्व | अकुर्म | उत्तमपुरुषः |

विधिलिङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| कुर्यात् | कुर्याताम् | कुर्युः | प्रथमपुरुषः |
| कुर्याः | कुर्यातम् | कुर्यात | मध्यमपुरुषः |
| कुर्याम् | कुर्याव | कुर्याम | उत्तमपुरुषः |

पा–धातुः, लट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| पिबति | पिबतः | पिबन्ति | प्रथमपुरुषः |
| पिबसि | पिबथः | पिबथ | मध्यमपुरुषः |
| पिबामि | पिबावः | पिबामः | उत्तमपुरुषः |

लङ–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| अपिबत् | अपिबताम् | अपिबन् | प्रथमपुरुषः |
| अपिबः | अपिबतम् | अपिबत | मध्यमपुरुषः |
| अपिबम् | अपिबाव | अपिबाम | उत्तमपुरुषः |

लृट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|

| | | | |
|---|---|---|---|
| पास्यति | पास्यतः | पास्यन्ति | प्रथमपुरुषः |
| पास्यसि | पास्यथः | पास्यथ | मध्यमपुरुषः |
| पास्यामि | पास्यावः | पास्यामः | उत्तमपुरुषः |

लोट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| पिबतु | पिबताम् | पिबन्तु | प्रथमपुरुषः |
| पिब | पिबतम् | पिबत | मध्यमपुरुषः |
| पिबानि | पिबाव | पिबाम | उत्तमपुरुषः |

विधिलिङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| पिबेत् | पिबेताम् | पिबेयुः | प्रथमपुरुषः |
| पिबेः | पिबेतम् | पिबेत | मध्यमपुरुषः |
| पिबेयम् | पिबेव | पिबेम | उत्तमपुरुषः |

अस्–धातुः, लट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| अस्ति | स्तः | सन्ति | प्रथमपुरुषः |
| असि | स्थः | स्थ | मध्यमपुरुषः |
| अस्मि | स्वः | स्मः | उत्तमपुरुषः |

अस्–धातुः, लङ्–लकारः

| एकवचनः | द्विवचनः | बहुवचनम् | पुरुषः |
|---|---|---|---|
| आसीत् | आस्ताम् | आसन् | प्रथमपुरुषः |
| आसीः | आस्तम् | आस्त | मध्यमपुरुषः |
| आसम् | आस्व | आस्म | उत्तमपुरुषः |

लृट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| भविष्यति | भविष्यतः | भविष्यन्ति | प्रथमपुरुषः |
| भविष्यसि | भविष्यथः | भविष्यथ | मध्यमपुरुषः |

| | | | |
|---|---|---|---|
| भविष्यामि | भविष्यावः | भविष्यामः | उत्तमपुरुषः |

लोट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| अस्तु | स्ताम् | सन्तु | प्रथमपुरुषः |
| एधि | स्तम् | स्त | मध्यमपुरुषः |
| असानि | असाव | असाम | उत्तमपुरुषः |

विधिलिङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| स्यात् | स्याताम् | स्युः | प्रथमपुरुषः |
| स्याः | स्यातम् | स्यात | मध्यमपुरुषः |
| स्याम् | स्याव | स्याम | उत्तमपुरुषः |

आप्–धातुः, लट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| आप्नोति | आप्नुतः | आप्नुवन्ति | प्रथमपुरुषः |
| आप्नोषि | आप्नुथः | आप्नुथ | मध्यमपुरुषः |
| आप्नोमि | आप्नुवः | आप्नुमः | उत्तमपुरुषः |

लङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| आप्नोत् | आप्नुताम् | आप्नुवन् | प्रथमपुरुषः |
| आप्नोः | आप्नुतम् | आप्नुत | मध्यमपुरुषः |
| आप्नवम् | आप्नुव | आप्नुम | उत्तमपुरुषः |

लृट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| आप्स्यति | आप्स्यतः | आप्स्यन्ति | प्रथम पुरुष |
| आप्स्यसि | आप्स्यथः | आप्स्यथ | मध्यम पुरुष |
| आप्स्यामि | आप्स्यावः | आपस्यामः | उत्तम पुरुष |

आप् धातु लोट् लकार

| एकवचनः | द्विवचनः | बहुवचनम् | पुरुषः |
|---|---|---|---|

| | | | |
|---|---|---|---|
| आप्नोतु | आप्नुताम् | आप्नुवन्तु | प्रथम पुरुष |
| आप्नुहि | आप्नुतम् | आप्नुत | मध्यम पुरुष |
| आप्नवानि | आप्नवाव | आप्नवाम | उत्तम पुरुष |

आप्–धातुः, विधिलिङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| आप्नुयात् | आप्नुयाताम् | आप्नुयुः | प्रथमपुरुषः |
| आप्नुयाः | आप्नुयातम् | आप्नुयात | मध्यमपुरुषः |
| आप्नुयाम् | आप्नुयाव | आप्नुयाम | उत्तमपुरुषः |

लिख्–धातुः, लट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| लिखति | लिखतः | लिखन्ति | प्रथमपुरुषः |
| लिखसि | लिखथः | लिखथ | मध्यमपुरुषः |
| लिखामि | लिखावः | लिखामः | उत्तमपुरुषः |

लङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| अलिखत् | अलिखताम् | अलिखन् | प्रथमपुरुषः |
| अलिखः | अलिखतम् | अलिखत | मध्यमपुरुषः |
| अलिखम् | अलिखाव | अलिखाम | उत्तमपुरुषः |

लृट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| लेखिष्यति | लेखिष्यतः | लेखिष्यन्ति | प्रथमपुरुषः |
| लेखिष्यसि | लेखिष्यथः | लेखिष्यथ | मध्यमपुरुषः |
| लेखिष्यामि | लेखिष्यावः | लेखिष्यामः | उत्तमपुरुषः |

लिख् धातु लोट् लकार

| एकवचनः | द्विवचनः | बहुवचनम् | पुरुषः |
|---|---|---|---|
| लिखतु | लिखताम् | लिखन्तु | प्रथम पुरुष |
| लिख | लिखतम् | लिखत | मध्यम पुरुष |

| | | | |
|---|---|---|---|
| लिखानि | लिखाव | लिखाम | उत्तम पुरुष |

विधिलिङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| लिखेत् | लिखेताम् | लिखेयुः | प्रथमपुरुषः |
| लिखेः | लिखेतम् | लिखेत | मध्यमपुरुषः |
| लिखेयम् | लिखेव | लिखेम | उत्तमपुरुषः |

चिन्त्–धातुः, लट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| चिन्तयति | चिन्तयतः | चिन्तयन्ति | प्रथमपुरुषः |
| चिन्तयसि | चिन्तयथः | चिन्तयथ | मध्यमपुरुषः |
| चिन्तयामि | चिन्तयावः | चिन्तयामः | उत्तमपुरुषः |

लङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| अचिन्तयत् | अचिन्तयताम् | अचिन्तयन् | प्रथमपुरुषः |
| अचिन्तयः | अचिन्तयतम् | अचिन्तयत | मध्यमपुरुषः |
| अचिन्तयम् | अचिन्तयाव | अचिन्तयाम | उत्तमपुरुषः |

लृट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| चिन्तयिष्यति | चिन्तयिष्यतः | चिन्तयिष्यन्ति | प्रथमपुरुषः |
| चिन्तयिष्यसि | चिन्तयिष्यथः | चिन्तयिष्यथ | मध्यमपुरुषः |
| चिन्तयिष्यामि | चिन्तयिष्यावः | चिन्तविष्यामः | उत्तमपुरुषः |

लोट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| चिन्तयतु | चिन्तयताम् | चिन्तयन्तु | प्रथमपुरुषः |
| चिन्तय | चिन्तयतम् | चिन्तयत | मध्यमपुरुषः |
| चिन्तयानि | चिन्तयाव | चिन्तयाम | उत्तमपुरुषः |

विधिलिङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|

| | | | |
|---|---|---|---|
| चिन्तयेत् | चिन्तयेताम् | चिन्तयेयुः | प्रथमपुरुषः |
| चिन्तयेः | चिन्तयेतम् | चिन्तयेत | मध्यमपुरुषः |
| चिन्तयेम | चिन्तयेव | चिन्तयेम | उत्तमपुरुषः |

हस्–धातुः, लट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| हसति | हसतः | हसन्ति | प्रथमपुरुषः |
| हससि | हसथः | हसथ | मध्यमपुरुषः |
| हसामि | हसावः | हसामः | उत्तमपुरुषः |

लङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| अहसत् | अहसताम् | अहसन् | प्रथमपुरुषः |
| अहसः | अहसतम् | अहसत | मध्यमपुरुषः |
| अहसम् | अहसाव | अहसाम | उत्तमपुरुषः |

लृट्–लकारः

| एकवचनः | द्विवचनः | बहुवचनम् | पुरुषः |
|---|---|---|---|
| हसिष्यति | हसिष्यतः | हसिष्यन्ति | प्रथमपुरुषः |
| हसिष्यसि | हसिष्यथः | हसिष्यथ | मध्यमपुरुषः |
| हसिष्यामि | हसिष्यावः | हसिष्यामः | उत्तमपुरुषः |

लोट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| हसतु | हसताम् | हसन्तु | प्रथमपुरुषः |
| हस | हसतम् | हसत | मध्यमपुरुषः |
| हसानि | हसाव | हसाम | उत्तमपुरुषः |

विधिलिङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| हसेत् | हसेताम् | हसेयुः | प्रथमपुरुषः |
| हसेः | हसेतम् | हसेत | मध्यमपुरुषः |
| हसेयम् | हसेव | हसेम | उत्तमपुरुषः |

<u>उभयपदी</u>

नी–धातुः, आत्मनेपदी,

लट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
| --- | --- | --- | --- |
| नयते | नयेते | नयन्ते | प्रथमपुरुषः |
| नयसे | नयेथे | नयध्वे | मध्यमपुरुषः |
| नये | नयावहे | नयामहे | उत्तमपुरुषः |

लङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
| --- | --- | --- | --- |
| अनयत | अनयेताम् | अनयन्त | प्रथमपुरुषः |
| अनयथाः | अनयेथाम् | अनयध्वम् | मध्यमपुरुषः |
| अनये | अनयावहि | अनयामहि | उत्तमपुरुषः |

लृट् –लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
| --- | --- | --- | --- |
| नेष्यते | नेष्येते | नेष्यन्ते | प्रथम पुरुष |
| नेष्यसे | नेष्येथे | नेष्यध्वे | मध्यम पुरुष |
| नेष्ये | नेष्यावहे | नेष्यामहे | उत्तम पुरुष |

लोट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
| --- | --- | --- | --- |
| नयताम् | नयेताम् | नयन्ताम् | प्रथमपुरुषः |
| नयस्व | नयेथाम् | नयध्वम् | मध्यमपुरुषः |
| नयै | नयावहै | नयामहै | उत्तमपुरुषः |

विधिलिङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
| --- | --- | --- | --- |
| नयेत | नयेयाताम् | नयेरन् | प्रथमपुरुषः |
| नयेथाः | नयेयाथाम् | नयेध्वम् | मध्यमपुरुषः |
| नयेय | नयेवहि | नयेमहि | उत्तमपुरुषः |

नी–धातुः, परस्मैपदी, लट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
| --- | --- | --- | --- |
| नयति | नयतः | नयन्ति | प्रथमपुरुषः |
| नयसि | नयथः | नयथ | मध्यमपुरुषः |

| | | | |
|---|---|---|---|
| नयामि | नयावः | नयामः | उत्तमपुरुषः |

लङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| अनयत् | अनयताम् | अनयन् | प्रथमपुरुषः |
| अनयः | अनयतम् | अनयत | मध्यमपुरुषः |
| अनयम् | अनयाव | अनयाम | उत्तमपुरुषः |

लृट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| नेष्यति | नेष्यतः | नेष्यन्ति | प्रथमपुरुषः |
| नेष्यसि | नेष्यथः | नेष्यथ | मध्यमपुरुषः |
| नेष्यामि | नेष्यावः | नेष्यामः | उत्तमपुरुषः |

लोट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| नयतु | नयताम् | नयन्तु | प्रथमपुरुषः |
| नय | नयतम् | नयत | मध्यमपुरुषः |
| नयानि | नयाव | नयाम | उत्तमपुरुषः |

विधिलिङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| नयेत् | नयेताम् | नयेयुः | प्रथमपुरुषः |
| नयेः | नयेतम् | नयेत | मध्यमपुरुषः |
| नयेयम् | नयेव | नयेम | उत्तमपुरुषः |

आत्मनेपदिनः

सेव–धातुः, आत्मनेपदी, लट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| सेवते | सेवेते | सेवन्ते | प्रथमपुरुषः |
| सेवसे | सेवेथे | सेवध्वे | मध्यमपुरुषः |
| सेवे | सेवावहे | सेवामहे | उत्तमपुरुषः |

लङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|

| | | | |
|---|---|---|---|
| असेवेत | असेवेताम् | असेवन्त | प्रथमपुरुषः |
| असेवेथाः | असेवेथाम् | असेवध्वम् | मध्यमपुरुषः |
| असेवे | असेवावहि | असेवामहि | उत्तमपुरुषः |

लृट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| सेविष्यते | सेविष्येते | सेविष्यन्ते | प्रथमपुरुषः |
| सविष्यसे | सेविष्येथे | सेविष्यध्वे | मध्यमपुरुषः |
| सेविष्ये | सेविष्यावहे | सेविष्यमहे | उत्तमपुरुषः |

लोट्–लकारः

| एकवचनम् | द्विवचनम् | हुवचनम् | पुरुषः |
|---|---|---|---|
| सेवताम् | सेवेताम् | सेवन्ताम् | प्रथमपुरुषः |
| सेवस्व | सेवेथाम् | सेवध्वम् ॖ | मध्यमपुरुषः |
| सेवै | सेवामहै | सेवामहै | उत्तमपुरुषः |

विधिलिङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| सेवेत | सेवेयाताम् | सेवेरन् | प्रथमपुरुषः |
| सेवेथाः | सेवेयाथाम् | सेवेध्वम ॖ | मध्यमपुरुषः |
| सेवेय | सेवावहि | सेवामहि | उत्तमपुरुषः |

आत्मनेपदी, लभ्–धातुः, लट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| लभते | लभेते | लभन्ते | प्रथमपुरुषः |
| लभसे | लभेथे | लभध्वे | मध्यमपुरुषः |
| लभे | लभावहे | लभामहे | उत्तमपुरुषः |

लृट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| लप्स्यते | लप्स्येते | लप्स्यन्ते | प्रथमपुरुषः |
| लप्स्यसे | लप्स्येथे | लप्स्यध्वे | मध्यमपुरुषः |

| | | | |
|---|---|---|---|
| लप्स्ये | लप्स्यावहे | लप्स्यामहे | उत्तमपुरुषः |

विधिलिङ्–लकारः

| | | | |
|---|---|---|---|
| लभेत | लभेयाताम् | लभेरन् | प्रथमपुरुषः |
| लभेथाः | लभेयाथाम् | लभेध्वम् | मध्यमपुरुषः |
| लभेय | लभेवहि | लभेमहि | उत्तमपुरुषः |

लङ्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| अलभत | अलभेताम् | अलभन्त | प्रथमपुरुषः |
| अलभयाः | अलभेथाम् | अलभध्वम् | मध्यमपुरुषः |
| अलभे | अलभावहि | अलभामहि | उत्तमपुरुषः |

लोट्–लकारः

| एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|
| लभताम् | लभेताम | लभन्ताम् | प्रथमपुरुषः |
| लभस्व | लभेथाम् | लभध्वम् | मध्यमपुरुषः |
| लभै | लभावहै | लभामहै | उत्तमपुरुषः |

## (ङ) प्रत्ययः

धातु–शब्दस्य वा अन्ते प्रयुक्ताः अर्थे वृद्धिकारकाः च प्रत्ययाः उच्यन्ते। प्रत्ययाः त्रिविधाः सन्ति 1. कृदन्त–प्रत्ययः 2. तद्धित–प्रत्ययः 3. स्त्री–प्रत्ययः।

**(i)** क्त्वा–प्रत्ययः – समानकर्तृकयोः पूर्वकाले – पूर्वकालिक–क्रियायाः बोधनार्थम् धातोः परे क्त्वा–प्रत्ययः प्रयुज्यते। ककारस्य लोपे सति 'त्वा' शेषः भवति। सेट्–धातूनां मध्ये इकारस्य आगमः भवति। यथा–

| शब्दः | प्रकृतिः | प्रत्ययः |
|---|---|---|
| भूत्वा – | भू | + क्त्वा |
| कृत्वा – | कृ | + क्त्वा |
| गत्वा – | गम् | + क्त्वा |
| पठित्वा – | पठ | + क्त्वा |
| वदित्वा – | वद् | + क्त्वा |
| लिखित्वा – | लिख् | + क्त्वा |
| चलित्वा – | चल् | + क्त्वा |
| श्रुत्वा – | श्रु | + क्त्वा |

| | | |
|---|---|---|
| नीत्वा – | नि | + क्त्वा |
| जित्वा – | जि | + क्त्वा |

**(ii)** ल्यप्–प्रत्ययः – समासेऽनञ्पूर्वे ल्यप् – पूर्वकालिकक्रियायाः बोधनार्थम् उपसर्गयुक्त धातोः परे ल्यप् प्रत्ययः भवति। ल्यप्–प्रत्यये लकारस्य पकारस्य च लोपे सति 'य' शेषः भवति। यथा–

| शब्दः | उपसर्गः | प्रकृतिः (धातुः) | प्रत्ययः |
|---|---|---|---|
| सम्भूय– | सम् | भू | ल्यप् |
| विहस्य– | वि | हस् | ल्यप् |
| आगत्य | आ | गम् | ल्यप् |
| प्रचल्य | प्र | चल् | ल्यप् |
| विक्रीय – | वि | क्री | ल्यप् |
| आदाय – | आ | दा | ल्यप् |
| विज्ञाय– | वि | ज्ञा | ल्यप् |
| प्राप्य – | प्र | आप् | ल्यप् |
| संपठ्य – | सम् | पठ् | ल्यप् |
| विनीय – | वि | नी | ल्यप् |
| अनुभूय – | अनु | भू | ल्यप् |

**(iii)** **(iv)** क्त, क्तवतु प्रत्ययः – क्त–क्तवतु–निष्ठा – कार्यस्य समाप्तिबोधनार्थ धातोः क्त क्तवतु वा प्रत्ययः प्रयुज्यते। क्त–प्रत्ययस्य प्रयोगः कर्मवाच्ये भाववाच्ये च भवति। तत्र ककारस्य लोपे सति 'त' शेषः भवति। क्तवतु–प्रत्ययस्य प्रयोगः कर्तृवाच्ये भवति। ककारस्य उकारस्य च लोपे सति 'तवत्' शेषः भवति। यथा–

| धातुः | क्तप्रत्यय–युक्तः शब्दः | क्तवतु–प्रत्यययुक्तः शब्दः |
|---|---|---|
| अर्च | अर्चितः | अर्चितवत् |
| जि | जितः | जितवत् |
| स्मृ | स्मृतः | स्मृतवत् |
| क | कृतः | कृतवत् |
| गम् | गतः | गतवत् |
| भू | भूतः | भूतवत् |
| पठ् | पठितः | पठितवत् |
| स्ना | स्नातः | स्नातवत् |
| त्यज् | त्यक्तः | त्यक्तवत् |
| तृप् | तृप्तः | तृप्तवत् |

(क्त–क्तवतु–प्रत्ययान्तशब्दाः त्रिषु लिंगेषु प्रचलन्ति यथा– भूतः, भूता, भूतम्, भूतवत्, भूतवान्, भूतवती)

**(v) (vi)** शतृ–शानच्– लटः शतृशानचावप्रथमासमानाधिकरणे –वर्तमानकालस्य बोधनार्थम् शतृ–शानच्–प्रत्ययौ प्रयुज्येते। एतौ 'सत्' प्रत्ययौ उच्येते। शतृ–प्रत्यये शकारस्य ऋकारश्च लोपे सति 'अत्' शेषः भवति। शानच्–प्रत्यये शकारस्य चकारश्च लोपे सति 'आन' शेषः भवति। यथा –

| धातुः | शतृ–प्रत्यययुक्तः शब्दः | शानच्–प्रत्यययुक्तः शब्दः |
|---|---|---|
| कृ | कुर्वत् | कुर्वाणः |
| दा | ददत् | ददानः |
| नी | नयत् | नयमानः |
| गम् | गच्छत् | गम्यमानः |
| पठ् | पठत् | पठ्यमानः |
| चुर् | चोरयत् | चोरयमाणः |
| भक्ष् | भक्षयत् | भक्षयमाणः |
| हृ | हरत् | हरमाणः |

**(vii) (viii)** तव्यत्, अनीयर् – तव्यत्तव्यानीयरः – 'तव्यत्–अनीयर्' प्रत्ययौ प्रायः सर्वेषु धातुषु प्रयुज्येते। तव्यत्–प्रत्यये तकारस्य लोपे सति 'तव्य' शेषः भवति। अनीयर्–प्रत्यये रकारस्य लोपे सति 'अनीय' शेषः भवति। यथा–

| धातुः | तव्यत्–प्रत्य–युक्तः शब्दः | अनीयर्–प्रत्यय–युक्तः शब्दः |
|---|---|---|
| पठ् | पठितव्यः | पठनीयः |
| भू | भवितव्यः | भवनीयः |
| गम् | गन्तव्यः | गमनीयः |
| नी | नेतव्यः | नयनीयः |
| दा | दातव्यः | दानीयः |
| दृश् | द्रष्टव्यः | दर्शनीयः |
| त्यज् | त्यक्तव्यः | त्यजनीयः |
| भक्ष् | भक्षितव्यः | भक्षणीयः |
| क | कर्तव्यः | करणीयः |
| वच् | वक्तव्यः | वचनीयः |

**(ix) (x)** तुमुन्, ण्वुल् – तुमुनण्वुलौ क्रियायां क्रियार्थायाम्–यस्य क्रियायाः कृते अन्यः क्रिया क्रियते तदा धातोः भविष्यत् अर्थः प्रकटयितुं तुमुन्–ण्वुल् प्रत्ययौ प्रयुज्येते। तुमुन्–प्रत्यये उकारस्य नकारस्य च लोपे

सति तुम् शेषः भवति।  ण्वुल्–प्रत्यये वकारस्य लकारस्य च लोपे सति 'वु' शेषः भवति यस्य स्थाने (युवोरनाकौ सूत्रेण) अक–आदेशः भवति।

| धातुः | तुमुन्–प्रत्यययुक्तः शब्दः | ण्वुल्–प्रत्यययुक्तः शब्दः |
|---|---|---|
| गम् | गन्तुम् | गमकः |
| कृ | कर्तुम् | कारकः |
| पठ् | पठितुम् | पाठकः |
| दा | दातुम् | दायकः |
| दृश् | द्रष्टुम् | दर्शकः |

(**xi**) यत्–प्रत्ययः – अचो यत् – स्वरान्त धातूनां योगे यत् प्रत्ययः प्रयुज्यते। यत्–प्रत्यये तकारस्य लोपे सति 'य' शेषः भवति। पोरदुपधात् सूत्रेण यस्य धातोः अन्ते पवर्गः तथा उपधायां अत् भवति तत्र यत्–प्रत्ययः भवति।  यथा–

| शब्दः | धातुः | प्रत्ययः |
|---|---|---|
| देयः– | दा | यत् |
| पेयः– | पा | यत् |
| चेयः– | चि | यत् |
| नेयः– | नि | यत् |
| ज्ञेयः– | ज्ञा | यत् |
| ध्येयः– | ध्यै | यत् |
| शप्यः– | शप् | यत् |
| जप्यः– | जप् | यत् |
| लभ्यः– | लभ् | यत् |
| लप्यः– | लप् | यत् |

(**xii**) (**xii**) णिनि, अच् – नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः–नन्दि, ग्रहि, पचादि धातूनां योगे क्रमशः ल्यु, णिनि, अच् प्रत्ययानां प्रयोगः भवति। ल्यु–प्रत्यये लकारस्य लोपे सति यु (अन) शेषः भवति, णिनि प्रत्यये णकारस्य इकारस्य च लोपे सति 'इन्' शेषः भवति, अच्–प्रत्यये चकारस्य लोपे सति 'अ' शेषः भवति। यथा–

| शब्दः | धातुः | प्रत्ययः |
|---|---|---|
| ग्राही | ग्रह | णिनि |
| उत्साही | उद्+सह | णिनि |
| मन्त्री | मन्त्र | णिनि |

| | | |
|---|---|---|
| स्थयी | स्थिा | णिनि |
| अपराधी | अप+राध् | णिनि |
| पचः | पच् | अच् |
| वदः | वद् | अच् |
| चलः | चल् | अच् |
| पतः | पत् | अच् |
| सेवः | सेव् | अच् |

(**xiv**) क्तिन्–स्त्रियां क्तिन्–भाववाचक शब्दानां योगे स्त्रीलिंगे क्तिन् प्रत्ययः प्रयुज्यते। क्तिन् प्रत्यये ककारस्य नकारस्य लोपे सति 'ति' शेषः भवति। यथा–

| शब्दः | धातुः | प्रत्ययः |
|---|---|---|
| कृतिः | कृ | क्तिन् |
| धृतिः | घृ | क्तिन् |
| गतिः | गम् | क्तिन् |
| स्तुतिः | स्तु | क्तिन् |
| चितिः | चि | क्तिन् |
| मतिः | मन् | क्तिन् |

(**xv**) ण्वुल–तृच् –प्रत्ययौ – ण्वुलतृचौ – धातूनां कर्तायाः योगे ण्वुल् तृच् प्रत्ययः प्रयुज्यते। ण्वुल् प्रत्यये णकारस्य लकारस्य च लोपे सति 'वु' शेषः भवति तस्य स्थाने (युवोरनाकौ सुत्रेण) अक भवति। तृच् प्रत्यये चकारस्य लोपे सति 'त' शेषः भवति।

यथा –

| शब्दः | धातुः | प्रत्ययः |
|---|---|---|
| कर्तृ (कर्ता) | कृ | तृच् |
| पातृ (पिता) | पा | तृच् |
| गन्तृ (गन्ता) | गम् | तृच् |
| हर्तृ (हर्ता) | हृ | तृच |
| भर्तृ (भर्ता) | भृ | तृच् |

तद्धित–प्रत्ययः

तद्धित–प्रत्ययाः – तद्धिताः ये प्रत्ययाः शब्दानां योगे प्रयुज्यन्ते ते तद्धित–प्रत्ययाः उच्यन्ते।

(**i**) इनि – अत इनिठनौ – अदन्त प्रातिपदिक योगे मत्वार्थे इनि, ठन् प्रत्ययः प्रयुज्यते इनि प्रत्यये इकारस्य लोपे सति इन् शेषः भवति। यथा–

| शब्दः | प्रकृतिः | प्रत्ययः |
|---|---|---|
| दण्डी | दण्ड | इनि |

| | | |
|---|---|---|
| केशी | केश | इनि |
| व्रीही | व्रीहि | इनि |

**(ii)** ठक् – रेवतादिभ्यष्ठक् – रेवत्यादिगणपाठे अपत्यार्थे ठक् प्रत्ययः प्रयुज्यते।

ठक् प्रत्यये ककारस्य लोपे सति 'ठ' शेषः भवति। ठस्य स्थाने (ठस्येकः सूत्रेण) इक् भवति।

यथा–

| शब्दः | प्रकृतिः | प्रत्ययः |
|---|---|---|
| रैवतिकः | रेवती | ठक् (इक्) |
| आक्षिकः | अक्ष | ठक् (इक्) |
| दाधिकम् | दधि | ठक् (इक्) |
| मारीचिकम् | मरीच | ठक् (इक्) |

**(iii)** अण् – अश्वपत्यादिभ्यश्च–अश्वपत्यादिगणे प्राग्दीव्यतीये अर्थे अपत्य, देव, भव, जात इत्यर्थे अण्–प्रत्ययः प्रयुज्यते। अण् प्रत्यये णकारस्य लोपे सति 'अ' शेषः भवति। यथा–

| शब्दः | प्रकृतिः | प्रत्ययः |
|---|---|---|
| आश्वपतम् | अश्वपति | अण् |
| गाणपतम् | गणपति | अण् |
| शैवः | शिव | अण् |
| गांगः | गंगा | अण् |
| वासुदेवः | वसुदेव | अण् |
| वासिष्ठः | वसिष्ठ | अण् |
| वैश्वामित्र | विश्वामित्र | अण् |
| औदुम्बरः | उदुम्बर | अण् |
| कुरवः | कुरु | अण् |
| भास्मन् | भस्मन् | अण् |
| बाकम् | बक | अण् |
| मायुरम् | मयूर | अण् |

**(iv)** मयट् प्रत्ययः – मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः – विकार अवयवश्चार्थे मयट् प्रत्ययः प्रयुज्यते। मयट्–प्रत्यये टकारस्य लोपे सति 'मय' शेषः भवति। यथा –

| शब्दः | प्रकृतिः | प्रत्ययः |
|---|---|---|
| भस्ममयम् | भस्म | मयट् |
| सुवर्णमयम् | सुवर्ण | मयट् |
| सममयम् | सम | मयट् |

| | | |
|---|---|---|
| देवदत्तमयम् | देवदत्त | मयट् |

**(v)** तमप्–प्रत्ययः – अतिशायने तमबिष्ठनौ। तिङ्श्च। तरप्–तमपौ घः– अतिशये अर्थे प्रातिपदिके तमप्–इष्ठन्–प्रत्ययौ प्रयुज्येते। तिङन्ते अतिशये अर्थे तमप्–प्रत्ययः प्रयुज्यते। तमप्–तरप्–प्रत्यययोः 'घ' संज्ञा भवति। तमप्–प्रत्यये पकारस्य लोपे सति 'तम' शेषः भवति। यथा –

| शब्दः | प्रकृति | प्रत्ययः |
|---|---|---|
| लघुतमः | लघु | तमप् |
| दीर्घतमः | दीर्घ | तमप् |
| पटुतमः | पटु | तमप् |
| महत्तमः | महत् | तमप् |
| विद्वत्तमः | विद्वत् | तमप् |
| चतुरतमः | चतुर | तमप् |

**(vi)** तरप्–प्रत्ययः – द्विवचनविभज्योपपदे तरबीयसुनौ–द्वयोः एकस्य अतिशये विभक्तव्ये उपपदे द्वयोः मध्ये एकस्य आधिक्य–बोधनार्थं तरप्–प्रत्ययः प्रयुज्यते। तरप्–प्रत्यये पकारस्यलोपे सति 'तर' शेषः भवति। यथा–

| शब्दः | प्रकृतिः | प्रत्ययः |
|---|---|---|
| लघुतरः | लघु | तरप् |
| दीर्घतरः | दीर्घ | तरप् |
| पटुतरः | पटु | तरप् |
| महत्तरः | महत् | तरप् |
| विद्वत्तरः | विद्वत् | तरप् |
| चतुरतरः | चतुर | तरप् |

## स्त्री–प्रत्ययाः

स्त्री–प्रत्ययाः – पुंल्लिंगसंज्ञानां स्त्रीत्वविवक्षायां ये प्रत्ययाः प्रयुज्यन्ते ते स्त्रीप्रत्ययाः उच्यन्ते।

टाप् ङीप्, ङीष्, ङीन्, ऊङ्, ति इत्यादि स्त्रीप्रत्ययाः सन्ति।

**(i)** टाप्–प्रत्ययः– अजाद्यतष्टाप् – अजादि–ह्रस्व–अकारान्तशब्दानां योगे 'टाप्' प्रत्ययः प्रयुज्यते। टाप्–प्रत्यये टकारस्य पकारस्य च लोपे सति 'आ' शेषः भवति।

यथा–

| शब्दः | प्रकृतिः | प्रत्ययः |
|---|---|---|
| अजा | अज | टाप् |
| एडका | एडक | टाप् |
| कोकिला | कोकिल | टाप् |

| | | |
|---|---|---|
| चटका | चटक | टाप् |
| अश्वा | अश्व | टाप् |
| बाला | बाल | टाप् |
| वत्सा | वत्स | टाप् |
| मन्दा | मन्द | टाप् |
| मूषिका | मूषक | टाप् |
| ज्येष्ठा | ज्येष्ठ | टाप् |
| मध्यमा | मध्यम | टाप् |
| गंगा | गंग | टाप् |

**(ii)** ङीष्–षिद्गौरादिभ्यश्च–षित्–गौरादिशब्दानां योगे ङीष्–प्रत्ययः प्रयुज्यते। ङीष्–प्रत्यये ङकारस्य षकारस्य लोपे सति 'ई' शेषः भवति। यथा–

| शब्दः | प्रकृतिः | प्रत्ययः |
|---|---|---|
| नर्तकी | नर्तक | ङीष् |
| पथिकी | पथिक | ङीष् |
| गौरी | गौर | ङीष् |
| गोपी | गोप | ङीष् |
| शूद्री | शूद्र | ङीष् |
| ब्राह्मणी | ब्राह्मण | ङीष् |
| मृगी | मृग | ङीष् |
| हरिणी | हरिण | ङीष् |
| इन्द्राणी | इन्द्र | ङीष् |
| भवानी | भव | ङीष् |
| शर्वाणी | शर्व | ङीष् |
| मृडानी | मृड | ङीष् |
| आचार्यानी | आचार्य | ङीष् |
| यवनानी | यवन | ङीष् |
| मातुलानी | मातुल | ङीष् |

## (च) अव्यय–प्रयोगाः

लक्षणम् – सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।

अव्ययाः एतादृशाः शब्दाः सन्ति येषां रूपं सर्वदा सममेव भवति। येषां रूपं लिंग विभक्ति वचनानुसारं कदापि न परिवर्तयन्ति ते अव्ययाः उच्यन्ते। न व्ययः इति अव्ययः। अव्ययाः चतुर्धाः सन्ति– 1. उपसर्गाः 2. क्रिया–विशेषणानि 3. समुच्चय–बोधक–शब्दाः 4. मनोविकारसूचक–शब्दाः

1. उपसर्गाः द्वाविंशतिः सन्ति – प्र, प्रति, परा, परि, अप, अव, अनु, आ, अति, अपि, अधि, अभि, उप्, उद्, दुस्, दुर्, वि.नि., निस्, निर्, सम्, सु।

2. समुच्चय–बोधक–अव्ययाः– च, अथ, तु. किन्तु, परन्तु, वा, अथवा, चेत्, नोचेत्, यदि–तर्हि, यदा–तदा, यावत्–तावत्, तत्, हि, इति।

3. मनोविकार–सूचक–अव्ययाः– हन्त, आः, हुम्, हा, हाहा, बत, किं, धिक्, अङ्ग, अयि, अये, भो, रे, रेरे, अहो, ही, हम्।

4. क्रिया–विशेषण–अव्ययाः – केचन स्वादि–अव्यये परिगणिताः सन्ति, केचन सर्वनाम–शब्दैः निर्मिताः भवन्ति, केचन संख्यावाचि–शब्दैः निर्मिताः भवन्ति, केचन तद्धित–प्रत्ययानां योगे निर्मिताः भवन्ति। यथा–

पुनः, उच्चैः, नीचैः, शनैः, अद्य, युगपत्, अधः, श्वः, ह्यः, सायम्, चिरम् ईषत्, तुष्णीम्, सहसा, मिथ्या, पुरा, प्रायः, नूनम्, भूयः, खलु, धिक्, किल

अव्ययानां वाक्य–प्रयोगः–

श्वः – रमेशः श्वः आगमिष्यति।

अद्य – मोहनः अद्य विद्यालयं आगच्छति।

शनैः–शनैः – सः शनैः शनैः कार्यं करोति।

उच्चैः – रामः उच्चैः वदति।

ह्य–ह्यः रविवासरः आसीत्। अद्य सोमवासरः अस्ति। श्वः मंगलवासरः भविष्यति।

युगपत् – सर्वे छात्राः युगपत् चलन्ति।

सायम् – सायम् काले वृद्धाः भ्रमणार्थम् उद्याने गच्छन्ति।

चिरम् – अहम् अत्र चिरकालात् प्रतीक्षां करोमि किन्तु सः अद्यावधि न आगतः।

ईषत् – रुग्णजनैः ईषत् ईषत् भोजनं ग्रहीतव्यम्।

तुष्णीम् – अध्यक्षमहोदयस्य आगमने सभागारे तूष्णीम् अभवत्।

सहसा – यदा अहं मार्गे गच्छामि स्म तदा सहसा मम सम्मुखे कारयानम् आगतम्।

पुरा – पुरा ग्रामे कूपाः भवन्ति स्म किन्तु अधुना न सन्ति।

प्रायः – प्रायः नरेन्द्रश्रीः सोत्साहैरेवभुज्यते।

नूनम् – राधा नूनम् स्वकार्यं करिष्यति।

भूयः – माहेश्वर–सूत्राणां भूयः भूयः उच्चारणेन स्मरणं भविष्यति।

खलु – न खलु अहं त्वाम् अवगच्छामि।

धिक् – धिक् त्वां च तं च मदनं च इमां च मां च।

किल – कुतः किल् स्वयम् अक्षि आकुली कृत्य अश्रुकारणं पृच्छसि।

पुनः – बालकः पुनः पुनः पृच्छति शिक्षकः वारं–वारम् उत्तरं ददाति।

कुत्र, यत्र, तत्र, अत्र, सर्वत्र – ईश्वरः कुत्र नास्ति। ईश्वरः अत्र, यत्र, तत्र सर्वत्र एव अस्ति।

यदा–तदा–यदा अहं आगच्छामि तदा त्वं गमिष्यसि।

## (छ) विभक्ति–प्रयोगाः

पदसमूहः वाक्यम् उच्यते। वाक्यम् अभीप्सितम् अर्थम् बोधयति। क्रियान्वयित्वं कारकत्वम्। यः क्रियया अन्वेति (सम्बन्धं प्राप्नोति) तत् कारकम् इति उच्यते। षट् कारकाणि सन्ति–कर्ता, कर्म, करणं, सम्प्रदानम्, अपादानम्, अधिकरणं चेति।

कर्ता कर्म च करणं सम्प्रदानं तथैव च।

अपादानाधिकरणमित्याहुः कारकाणि षट्।।

1. कर्ता – स्वतन्त्रः कर्ता–क्रियायां स्वातन्त्र्येण विवक्षितः अर्थः कर्ता भवति।

2. कर्मः – कर्तुरीप्सिततमं कर्मः–क्रियया कर्तुः इष्टतमं कर्म संज्ञं भवति।

3. करणम्–साधकतमं करणम्–क्रियासिद्धौ प्रकृष्टोपकारकं तत् करणसंज्ञं भवति।

4. सम्प्रदानम्–कर्मणा यमभिप्रैति स सम्प्रदानम्–दानादि कर्मणा यम् अभिप्रैति स सम्प्रदान–संज्ञकः भवति।

5. अपादानम् – ध्रुवमपायेऽपादानम्–विश्लेषेसाध्ये अवधिभूतं कारकम् अपादानसज्ञकं भवति। विभागाश्रयः अपादानं भवति।

6. अधिकरणं – आघारोऽधिकरणम्–कर्तरिविद्यमानक्रियायाः कर्मणि विद्यमान फलस्य वा

आधारः अधिकरणसंज्ञको भवतीति।

कारक–विभक्तिः

विभक्तीनां प्रवृत्तौ कारकं प्राधान्यम् आवहति। कारकसंज्ञां प्राप्य या विभक्तिः प्रवर्तते सा कारकविभक्ति इति उच्यते।

1. प्रथमा विभक्तिः –

**(i)** प्रातिपदिकार्थ–लिंग–परिमाण–वचनमात्रे प्रथमा – प्रातिपदिकार्थमात्रे, लिंगमात्राद्याधिक्ये, संख्यामात्रे च प्रथमा स्यात्।

यथा–कृष्णः, श्री, ज्ञानम्, एकः, एका, एकम्, द्रोणः व्रीहि

**(ii)** अकथितं च – अपादानादिविशेषैः अविवक्षितं कारकं कर्म संज्ञं स्यात्।

द्विकर्मकस्थले सूत्रस्य अस्य प्रवृत्तिः। षोडश द्विकर्मकधातवः–

दुह्याचपच्दण्डरुधिप्रच्छिचिब्रूशास्जिमथ्मुषाम्।

कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्।।

यथा– गां दोग्धि पयः। बलिं याचते वसुधाम्। माणवकं पन्थानं पृच्छति। बालं धर्मं ब्रूते। अजां ग्रामं नयति। देवदत्तं शतं जयति। अजां ग्रामं वहति, नयति, हरति वा।

(**iii**) अधिशीङ्स्थासां कर्म– अधिपूर्वकाणां शीङ्,स्था, आस् धातूनाम् आधारः कर्म स्यात्।

यथा–हरिः वैकुण्ठं अधिशेते, अधितिष्ठति, अध्यास्ते वा।

(**iv**) उपान्वध्याङ्वसः – उप, अनु, अधि, आ उपसर्गपूर्वक–वस–धातोः आधारः कर्म स्यात्।

यथा– हरिः वैकुण्ठम् उपवसति, अनुवसति, अधिवसति, आवसति वा।

(**v**) कालाध्वनोरत्यन्तसंयोगे–कालस्य, अध्वनश्च गुणेन क्रियया द्रव्येण च निरन्तरसंयोगे गम्ये कालस्य अध्वनश्च द्वितीया स्यात्।

यथा–मासम् अधीते। मासं गुडधानाः। क्रोशं कुटिला नदी। क्रोशं गिरिः।

(**vi**) अन्तरान्तरेण युक्ते – अन्तरा अन्तरेण योगे द्वितीया स्यात्।

यथा–अन्तरा त्वां मां हरिः। अन्तरेण हरिं न सुखम्।

(**vii**) अभितः परितः समया, निकषा हा धिक् प्रतियोगेऽपि–इत्येतैः योगे द्वितीया स्यात्

यथा–ग्रामम् अभितः परितः समया निकषा वा वृक्षाः सन्ति। हा कृष्णभक्तम्। धिक् त्वाम्। विद्यालयं प्रति गच्छति। निकषा लंकाम्।

(**viii**) अनु, उप्, प्रति, परि, अभि, अधि, सु, अति, अपि, अप, आङ् इत्येषां प्रादीनां विशेषार्थे कर्म प्रवचनीय संज्ञा विहिता। कर्मप्रवचनीये द्वितीयाविभक्ति स्यात्।

यथा– जपम् अनु प्रावर्षत। अनु हरिं सुराः। उप हरिं सुराः। वृक्षं प्रति; परि अनु वा विद्योतते विद्युत्। भक्तो विष्णुं प्रति, परि अनु वा।

3. तृतीया–विभक्तिः –

(**i**) साधकतमं करणम्–क्रियासिद्धौ प्रकृष्टं उपकारकं करणसंज्ञं स्यात्।

यथा–स. कलमेन लिखति। रामेण बाणेन हतो बाली।

(**ii**) सहयुक्तेऽप्रधाने–सहार्थेन युक्ते तस्य पर्यायाणां च साकं सार्धं समम् सह योगे अप्रधाने तृतीया स्यात्।

यथा–पुत्रेण सहागता पिता। बालः मित्रेण सह आगच्छति।

(**iii**) येनांगविकारः– येन अंगेन विकृतेन अंगिनो विकारः लक्ष्यते तस्मिन् अंगे तृतीया स्यात्।

यथा–अक्ष्णा काणः। पादेन खञ्जः। शिरसा खल्वाटः।

(**iv**) इत्थंभूतलक्षणे–विशिष्टेन लक्षणेन चिह्नेन वा कोऽपि ज्ञायते तर्हि लक्षणे तृतीया स्यात्।

यथा–जटाभिः तापसः। दण्डेन याति। आकृत्या शूरः। वेषेण पण्डितः।

(**v**) अपवर्गे तृतीया–फलप्राप्तेः स्थित्यां काल–अध्वन्–वाचि–शब्दानां योगे तृतीया स्यात्।

यथा–अह्ना अनुवाकोऽधीतः। भोजनेन श्लोकोऽधीतः।

(**vi**) पृथग्विनानानाभिस्तृतीयान्यतरस्याम्–पृथक्, विना, नानाभिः योगे द्वितीया, तृतीया पंचमी विभक्तिश्च स्यात्।

यथा– देवं, देवेन, देवात् विना तृणमपि न चलति। रामं, रामेण, रामात् विना नाहं जीवामि।

5. चतुर्थी विभक्तिः –

(**i**) कर्मणा यमभिपैति स सम्प्रदानम्–दानस्य कर्मणा यम् अभिप्रैति स सम्प्रदानसंज्ञः स्यात्।

यथा – विप्राय गां ददाति। पिता पुत्राय फलं ददाति।

(**ii**) रूच्यार्थानां प्रीयमाणः – रुच्यार्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानं स्यात्।

यथा– बालकाय शर्कराखण्ड रोचते। हरये रोचते भक्तिः।

(**iii**) स्पृहेरीप्सितः – स्पृह् धातुयोगे इप्सितः सम्प्रदान संज्ञः स्यात्।

यथा – बालिका पुष्पेभ्यः स्पृह्यति।

(**iv**) क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः– क्रुध्, द्रुह्, ईर्ष्य, असूय धातूनां योगे यं प्रति कोपः इत्यादि भवति सः सम्प्रदानसंज्ञः स्यात।

यथा– कंसः कृष्णाय क्रुध्यति। द्रोणः अभिमन्यवे द्रुह्यति। कर्णः अर्जुनाय ईर्ष्यति। मन्दमतिः बुद्धिमते असूयति।

(**v**) धारेरुत्तमर्णः – धृ–धातुयोगे उत्तमर्णः संप्रदानसंज्ञः स्यात्।

यथा – भक्ताय धारयति मोक्षं हरिः। देवदत्ताय शतं धारयति ग्रामे।

(**vi**) तादर्थ्ये चतुर्थी वाच्या – उपकार्य उपकारक भाव सम्बन्धे विवक्षिते उपकार्यात् चतुर्थी भवति।

यथा – मुक्तये हरिं भजति।

(**vii**) नमः–स्वस्ति–स्वाहा–स्वधा–अलं–वषड्–योगाच्च–एभिः चतुर्थी स्यात्।

यथा – गणेशाय नमः। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा। भीमो बकाय अलम्। वषड् इन्द्राय।

(**viii**) श्लाघह्नुङस्थाशपां ज्ञीप्स्यमानः – श्लाघ, ह्नुङ्, स्था.शप् धातूनां योगे यं प्रति दर्शयति सः सम्प्रदानसंज्ञः स्यात्।

यथा–गोपी स्मरात् कृष्णाय श्लाघते, ह्नुते, तिष्ठते, शपते वा।

6. पंचमी विभक्ति –

(**i**) ध्रुवमपायेऽपादानम्–विश्लेषे साध्ये अवधिभूतंकारकम् अपादानं स्यात्।

यथा – वृक्षात् पत्रम् पतति। धावतः अश्वात् पतति।

(**ii**) भीत्रार्थानां भयहेतुः – भीत्राणां भयार्थानां त्राणार्थानां च प्रयोगे भयहेतुः अपादानं संज्ञं स्यात्।

यथा – चौरात् बिभेति। व्याघ्रात् त्रायते।

(**iii**) जनिकर्तुः प्रकृतिः – जायमानस्य हेतुः अपादानसंज्ञः स्यात्।

यथा – ब्रह्मणः प्रजा प्रजायन्ते। गोमयाद् वृश्चिकाः जायन्ते। तन्तुभ्यः पटो जायते।

(iv) भुवः प्रभवः – प्रथमोद्गमस्थाने अपादान–संज्ञः स्यात्।

यथा– हिमवतो हिमालयात् वा गंगा प्रभवति।

(v) आख्यातोपयोगे– नियमपूर्वक विद्याऽध्ययने वक्ता अपादानसंज्ञ स्यात्।

यथा – शिष्यः उपाध्यायात् अधीते।

(vi) वारणार्थानामीप्सितः – वारणार्थानां धातूनां योगे यस्मात् वारणम् इच्छति स अपादानसंज्ञः स्यात्।

यथा – यवेभ्यो गां वारयति।

(vii) जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्–जुगुप्सा, विराम, प्रमादार्थकधातूनां योगे जुगुप्सादि विषयाणाम् अपादानसंज्ञा स्यात्।

यथा – पापात् जुगुप्सते। अधर्मात् विरमति। धर्मात् प्रमाद्यति।

(viii) अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते–अन्य आरात्, इतर, ऋते, दिक् शब्द,

अञ्चूतरपद, आच्, आहि इत्येतेषां योगे पंचमी विभक्तिः स्यात्।

यथा –अन्यो, भिन्न, इतरो वा कृष्णात्। ऋते कृष्णात्।

चैत्रात् पूर्व फाल्गुनः। प्राक् प्रत्यग् वा ग्रामात्। दक्षिणा ग्रामात्।

(ix) दूरान्तिकार्थेभ्यो द्वितीया – दूर, अन्तिक शब्देभ्यः द्वितीया, तृतीया, पंचमी षष्ठी च विभक्ति स्यात्।

यथा– ग्रामस्य दूरं, दूरेण, दुरात्, दूरे वा वनम् अस्ति।

वृक्षस्य अन्तिकं, अन्तिकेन, अन्तिकात, अन्तिके वा गौः अस्ति।

7. षष्ठी विभक्तिः –

(i) शेषे षष्ठी – कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः। तत्र षष्ठी स्यात्।

यथा– राज्ञः पुरुषः। दशरथस्य पुत्रः। वृक्षस्य पर्णम्।

(ii) कर्तृकर्मणोः कृति–कृत योगे कर्तरि कर्मणि च षष्ठी स्यात्।

यथा– कृष्णस्य कृति। जगतः कर्ता कृष्णः। कृष्णस्य गमनम्।

(iii) क्तस्य च वर्तमाने – वर्तमानार्थस्य क्तस्य योगे षष्ठी स्यात्।

यथा–मम इष्टः। सर्वेषां ज्ञातः।

(iv) कृत्यानां कर्तरि वा – कृत्यप्रत्ययान्तानां योगे कर्तरि षष्ठी वा स्यात्।

(तव्य, तव्यत्, अनीयर्, यत्, क्यप्, ण्यत्, केलिमर् सप्त कृत्यप्रत्ययाः सन्ति)

यथा – लोक हितं मम करणीयम् मम हरिः सेव्यः।

(v) तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्– तुला, उपमा शब्दस्य अतिरिक्तं तुल्य, सदृश, सम, इवादि तुल्यार्थे शब्दयोगे षष्ठी स्यात्। अन्यत्र तृतीया।

यथा – चन्द्रस्य सदृशं मुखम्। बलरामस्य तुल्यः भीमः। 'चन्द्रेण उपमा तुला वा'

8. सप्तमी विभक्तिः –

(i) आधारोऽधिकरणम् – कर्तृ–कर्मद्वारा तन्निष्ठक्रियायाः आधारः कारकम् अधिकरण–संज्ञ स्यात्। आधारः त्रिधा– (i) औपश्लेषिकः (ii) वैषयिकः (iii) अधिव्यापकश्च।

यथा – कटे आस्ते। मोक्षे इच्छास्ति। सर्वस्मिन् आत्मा अस्ति। तिलेषु तैलम् अस्ति।

(ii) यस्य च भावेन भावलक्षणम् – यस्य क्रियायाः क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात्।।

यथा – गोषु दुह्यमानासु गतः। बालेषु अधीयानेषु गतः।

(iii) यतश्च निर्धारणम् – जातिगुणक्रियासंज्ञाभिः समुदायात् एकदेशस्य पृथक्करणं

निर्धारणम् भवति तत्र समुदायवाचकृशब्दे षष्ठी सप्तमी च स्यात्।

यथा– प्राणिनां प्राणिषु वा मानवः श्रेष्ठः। गवां गोषु वा कपिला बहुक्षीराः।

अध्वगानां अध्वगेषु वा धावन् शीघ्रतमः । छात्राणां छात्रेषु वा रविः पटुः।

(iv) साधु–असाधु–प्रयोगे वा – साधु असाधु प्रयोगे षष्ठी सप्तम्यौ स्तः।

यथा – साधु मातरि, मातुले वा, असाधु मातरि, मातुले वा।

(v) स्वामीश्वराऽधिपतिदायाद साक्षिप्रतिभूप्रसूतैश्च – स्वामी, ईश्वर, अधिपति, साक्षि, प्रतिभू, प्रसूति–शब्दानां योगे षष्ठी सप्तम्यौ स्तः।

यथा – गवाम्, गोषु वा स्वामी, ईश्वरः, अधिपतिः वा।

## (ज) समस्तपदानां विग्रहः

समसनं समासः। अनेकपदानां संक्षेपेण एकपदं क्रियते स समासः उच्यते। समासे पदानां शब्दानां वा मेलनं भवति। समासः सुबन्तानां भवति। परस्परान्वितयोः सुबन्तयोः समासः भवति। समासस्य पृथक्करणं सामासिक–विग्रहः उच्यते। समासे पूर्वत्र श्रूयमाणं पदं पूर्वपदम, उत्तरत्र श्रूयमाणं पदं उत्तरपदं च व्यवह्रियते। समासः चतुर्विधः –1 तत्पुरुषः, 2. बहुब्रीहिः, 3. द्वन्द्वः, 4. अव्ययीभावः चेति।

2. तत्पुरुषः – प्रायः उत्तरपदप्रधानः तत्पुरुषः। तत्पुरुषः पुनः चतुर्विधः

(i) सामान्य तत्पुरुषः – द्वयोः पदयोः विभक्ति लोपानुसारं सामान्य तत्पुरुषस्य द्वितीयातः सप्तमीविभक्ति पर्यन्तं षड्भेदाः सन्ति

| सामासिक–पदम् | समास–विग्रहः | समास–नाम |
|---|---|---|
| गृहगतः – | गृहं गतः | द्वितीया तत्पुरुषः |
| नखभिन्नः – | नखैः भिन्नः | तृतीया तत्पुरुषः |
| गोहितम् – | गोभ्यः हितम् | चतुर्थी तत्पुरुषः |

| | | |
|---|---|---|
| चोरभयम् – | चोरात् भयम् | पंचमी तत्पुरुषः |
| वृक्षमूलम् – | वृक्षस्य मूलम् | षष्ठी तत्पुरुषः |
| कार्यकुशलः– | कार्ये कुशलः | सप्तमी तत्पुरुषः |

(ii) कर्मधारयः – तत्पुरुषः समानाधिकरणः कर्मधारयः। यत्र पूर्वउत्तरपदयोः विशेषण–विशेष्य, उपमानोपमेययोः सम्बन्ध भवति तत्र कर्मधारयसमासः भवतिः।

| सामासिक–पदम् | समास–विग्रहः |
|---|---|
| नीलमेघः | नीलो मेघः |
| शीतोष्णम् | शीतम् उष्णम् |
| घनश्यामः | धन इव श्यामः |
| नरव्याघ्रः | नरः व्याघ्रः इव |
| विद्याधनम् | विद्या एव धनम् |
| कृष्णसर्पः | कृष्णः सर्पः |
| नीलकमलम् | नीलम् कमलम् |

(iii) द्विगुः –संख्यापूर्वो द्विगुः – यत्र पूर्वपदं संख्यावाची शब्दः भवति तत्र द्विगु–समासः भवति।

| सामासिक–पदम् | समास–विग्रहः |
|---|---|
| त्रिलोकी | त्रयाणां लोकानां समाहारः |
| त्रिरात्रम् | त्रिसृणां रात्रीणां समाहारः |
| त्रिभुवनम् | त्रयाणां भुवनानां समाहारः |
| पंचवटी | पंचानां वटानां समाहारः |
| पंचरात्रम् | पंचानां रात्रीणां समाहारः |
| नवरात्रम् | नवानां रात्रीणां समाहारः |
| द्वयहः | द्वयोः अह्नोः समाहारः |
| पंचवगम् | पंचानां गवां समाहारः |
| षाण्मातुरः | षण्णां मातॄणाम् अपत्यम् |
| द्वै मातुरः | द्वयोः मात्रोः अपत्यम् |
| पंचगवधनः | पंच गावः धनं यस्य सः |
| दशगवधनः | दश गावः धनं यस्य सः |
| पंच सखप्रियः | पंच सखायः प्रियाः यस्य सः |

(iv) नञ्तत्पुरुषः – नञ् तत्पुरुषः समासः निषेधात्मक अर्थे प्रयुज्यते। नञ् स्थाने अ अन् वा भवति।

यथा– असन्देहः न सन्देहः

| | |
|---|---|
| अविघ्नः | न विघ्नः |
| असत्यम् | न सत्यम् |
| अहिंसा | न हिंसा |
| अनश्वः | न अश्वः |
| अनागतः | न आगतः |
| अनुपलब्धिः | न उपलब्धिः |
| अनुत्तीर्णः | न उत्तीर्णः |
| अपरिग्रहः | न परिग्रहः |

2. बहुव्रीहिः—अन्यपदार्थ प्रधानः बहुव्रीहिः। यत्र प्रस्तुते द्वे पदे मिलित्वा अन्यं पदार्थं बोधयतः पदार्थस्य बोधं कुरुतः, तत्र बहुव्रीहिः समासः भवति। तत् तु समानाधिकरण व्यधिकरणं च द्विविधम्।

| सामासिक—पदम् | समास – विग्रहः |
|---|---|
| पीताम्बरः | पीतम् अम्बरम् यस्य सः (हरिः) |
| प्राप्तोदकः | प्राप्तम् उदकं यं सः (ग्रामः) |
| दत्तपशुः | दत्तः पशुः यस्मै सः (रुद्रः) |
| चक्रपाणिः | चक्रं पाणौ यस्य सः (हरिः) |
| चित्रगुः | चित्राः गावः यस्य सः (चित्रगुः) |
| रूपवद्मार्या | रूपवती भार्या यस्य सः (रूपवती) |
| ऊढरथः | ऊढः रथः येन सः (अनड्वान) |
| सुकेशीभार्यः | सुकेशी भार्या यस्य सः (सुकेशी) |
| भालचन्द्रः | भाले चन्द्रः यस्य सः (शिवः) |
| विषकण्ठः | विषं कण्ठे यस्य सः (शिवः) |
| विशालाक्षी | विशाले अक्षिणी यस्याः सा (स्त्री) |
| वीरपुरुषः | वीराः पुरुषाः यस्मिन् सः (ग्रामः) |
| उपदशाः | दशानां सभीपे ये सन्ति ते |
| सपुत्रः/सहपुत्रः | पुत्रेण सह वर्तते इति |
| केशाकेशि | केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् |
| अपुत्रः | अविद्यमान पुत्रः यस्य सः |
| निर्दयः | निर्गता दया यस्मात् सः |
| सुमेधाः | शोभना मेधा यस्य सः |
| गजाननः | गज इव आननं यस्य सः |

3. द्वन्द्वसमासः – उभयपदार्थ–प्रधानः द्वन्द्वः। यत्र पूर्व–उत्तरयोः द्वयोः पदयोः प्राधान्यं वर्तते तत्र द्वन्द्वसमासः भवति। स तु इतरेतर समाहारः एकशेषः त्रिविधः भवति।

| | | |
|---|---|---|
| यथा – | रामकृष्णौ | रामश्च कृष्णश्च |
| | हरिहरौ | हरिश्च हरश्च |
| | ईशकृष्णौ | ईशश्च कृष्णश्च |
| | इन्द्राग्नौ | इन्द्रश्च अग्निश्च |
| | शिवकेशवौ | शिवश्च केशवश्च |
| | ग्रीष्मवसन्तौ | ग्रीष्मश्च वसन्तश्च |
| | युधिष्ठिरार्जुनौ | युधिष्ठिरश्च अर्जुनश्च |
| | पाणिपादम् | पाणी च पादौ च |
| | रथिकाश्वारोहम् | रथिकाश्च अश्वारोहाश्च |
| | अहिनकुलम् | अहिश्च नकुलश्च |
| | पुत्रपौत्रम् | पुत्रश्च पौत्रश्च |
| | पितरौ | माता च पिता च |
| | दम्पती | पतिश्च जाया च |
| | रामाः | रामश्च रामश्च रामश्च |
| | ब्राह्मणौ | ब्राह्मणश्च ब्राह्मणी च |
| | शूद्रौ | शूद्रश्च शूद्री च |

4. अव्ययीभावः – पूर्वपदार्थप्रधानः अव्ययीभावः। यत्र प्रायः पूर्वपदयोः प्राधान्यं भवति तत्र अव्ययीभावः समासः भवति। अव्ययीभावः समासः समीप, अभाव, योग्यता, वीप्सा, समृद्धि, वृद्धि, अर्थाभाव, अत्ययश्चादि अर्थेषु प्रयुक्तः भवति।

| | |
|---|---|
| अधिहरि | हरौ इति |
| उपकृष्णम् | कृष्णस्य समीपम् |
| सुमद्रम् | मद्राणां समृद्धि |
| दुर्यवनम् | यवनानां वृद्धिः |
| निर्मक्षिकम् | मक्षिकाणां अभावः |
| अतिनिद्रम् | निद्रा सम्प्रति न युज्यते |
| इतिहरि | हरिशब्दस्य प्रकाशः |
| अनुविष्णु | विष्णोः पश्चात् |

| | |
|---|---|
| अनुरूपम् | रूपस्य योग्यम् |
| प्रत्यर्थम् | अर्थम् अर्थम् प्रति |
| यथाशक्ति | शक्तिम् अनतिक्रम्य |
| सहरि | हरेः सदृश्यः |
| अनुज्येष्ठम् | ज्येष्ठस्य आनुपूर्व्येण |
| सचक्रम ् | चक्रेण युगपत् |
| ससखि | सख्या सदृशः |
| सतृणम् | तृणमपि अपरित्यज्य |
| साग्नि | अग्निग्रन्थपर्यन्तम् अधीते |
| अतिहिमम् | हिमस्य अत्ययः |
| पारेगंगम् | गंगाया पारम् |
| मध्येसमुद्रम् | समुद्रस्य मध्ये |
| निर्जनम् | जनानां अभावः |
| प्रतिदिनम् | दिनम् दिनम् प्रति। |

## अभ्यासः

सन्धि–प्रकरणम्

1. अधोलिखितेषु पदेषु सन्धिविच्छेदं कुरुत–

| संधिः | | संधि–विच्छेदः |
|---|---|---|
| पाण्डवाग्रजः | – | ———————— + ———————— |
| गत्वैकं | – | ———————— + ———————— |
| प्रत्येकं | – | ———————— + ———————— |
| भवनम् | – | ———————— + ———————— |
| पावकः | – | ———————— + ———————— |
| प्रेजते | – | ———————— + ———————— |
| कीटोऽपि | – | ———————— + ———————— |
| वध्वागमः | – | ———————— + ———————— |
| सर्वेऽस्मिन् | – | ———————— + ———————— |
| गंगैषा | – | ———————— + ———————— |

| | | |
|---|---|---|
| लाकृतिः | – | ———————— + ———————— |
| हरिश्शेते | – | ———————— + ———————— |
| तट्टीका | – | ———————— + ———————— |
| विष्णुस्त्राता | – | ———————— + ———————— |
| देवो वन्द्यः | – | ———————— + ———————— |

2. अधोलिखितेषु पदेषु संधिं कृत्वा संधिनामोल्लेखं कुरुत–

| संधि–विच्छेदः | | संधियुक्त–पदम् |
|---|---|---|
| श्री+ईशः | – | —————————————— |
| साधु+ऊचुः | – | —————————————— |
| देव+ऋषि | – | —————————————— |
| रमा+ईश | – | —————————————— |
| सदा+एव | – | —————————————— |
| महा+ओषधि | – | —————————————— |
| दधि+अत्र | – | —————————————— |
| नै+अकः | – | —————————————— |
| जे+अः | – | —————————————— |
| प्र+एजते | – | —————————————— |
| सत्+चित् | – | —————————————— |
| पेष्+ता | – | —————————————— |
| रामे+सु | – | —————————————— |
| राम+स् | – | —————————————— |
| शिवस्+अर्च्य | – | —————————————— |

समास–प्रकरणम्

प्र.1 अधोलिखतेषु पदेषु समास–विग्रहं कृत्वा नामोल्लेखं कुरुत –

| सामासिक–पदम् | | समास–विग्रहः | समास–नाम |
|---|---|---|---|
| नख भिन्नः | – | ———————— | ———————— |
| घनश्याम | – | ———————— | ———————— |
| त्रिभुवनम् | – | ———————— | ———————— |
| अनश्वः | – | ———————— | ———————— |

चित्रगुः – ———————— ————————
विषकण्ठः – ———————— ————————
इन्द्राग्नी – ———————— ————————
दम्पती – ———————— ————————
उपकृष्णम् – ———————— ————————
यथाशक्ति – ———————— ————————
अतिहिमम्
निर्जनम्

प्र. 2 अधोलिखितेषु पदेषु सामासिक–पदं कृत्वा नामोल्लेखं कुरुत –

कार्ये कुशलः – ———————— ————————
नीलम् कमलम् – ———————— ————————
पंचानां गवां समाहारः – ———————— ————————
न हिंसा इति – ———————— ————————
प्राप्तम् उदकम् यं सः – ———————— ————————
गज इव आननं यस्य सः – ———————— ————————
रथिकाश्च अश्वारोहाश्च – ———————— ————————
ब्राह्मणश्च ब्राह्मणी च – ———————— ————————
विष्णोः पश्चात् – ———————— ————————
अर्थम् अर्थम् प्रति – ———————— ————————
निद्रा सम्प्रति न युज्यते – ———————— ————————
हरिशब्दस्य प्रकाशः – ———————— ————————
रूपस्य योग्यम् – ———————— ————————

उपसर्गाः

प्र.1. अधोलिखितेषु पदेषु उपसर्गान् लिखतु –

| पदम् | | उपसर्गः | पदम् |
|---|---|---|---|
| न्यवसत् | – | ———————— | ———————— |
| प्रत्येकम् | – | ———————— | ———————— |
| संगच्छध्वम् | – | ———————— | ———————— |
| निर्गच्छति | – | ———————— | ———————— |
| निराहारः | – | ———————— | ———————— |

| | | | |
|---|---|---|---|
| स्वागतम् | – | ———————— | ———————— |
| विज्ञानम् | – | ———————— | ———————— |
| अध्यारोपः | – | ———————— | ———————— |
| अन्वगच्छत् | – | ———————— | ———————— |
| अपहरति | – | ———————— | ———————— |
| स्वागतम् | – | ———————— | ———————— |

प्र. 2 अधोलिखितेषु पदेषु उपसर्गं योजयित्वा पद–निर्माणं कुरुत –

| उपसर्गः/धातुः | | पदम् |
|---|---|---|
| परा+जि | – | —————————— |
| अनु+गम् | – | —————————— |
| दुस्+क | – | —————————— |
| अधि+रुह् | – | —————————— |
| नि+पत् | – | —————————— |
| अपि+गम | – | —————————— |
| परि+गम् | – | —————————— |
| उप+वस | – | —————————— |
| दुर्+गम् | – | —————————— |
| आ+दा | – | —————————— |

## प्रत्ययाः

प्र.1 अधोलिखितेषु पदेषु प्रकृति–प्रत्ययौ लिखतु –

| पदम् | | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| नीत्वा | – | —————— | —————— |
| आगम्य | – | —————— | —————— |
| पठित्वा | – | —————— | —————— |
| सम्भूय | – | —————— | —————— |
| अर्चितः | – | —————— | —————— |
| स्नातवत् | – | —————— | —————— |
| त्यक्तः | – | —————— | —————— |
| गच्छत् | – | —————— | —————— |
| ददानः | – | —————— | —————— |

| | | | |
|---|---|---|---|
| हरत् | – | ————— | ————— |
| कुर्वाणः | – | ————— | ————— |
| द्रष्टव्यम् | – | ————— | ————— |
| भवनीयम् | – | ————— | ————— |
| पातुम् | – | ————— | ————— |
| कारकः | – | ————— | ————— |
| ज्ञेयः | – | ————— | ————— |
| मन्त्री | – | ————— | ————— |
| स्तुतिः | – | ————— | ————— |

प्र.2 अधोलिखितेषु पदेषु प्रकृति–प्रत्ययौ योजयित्वा पद–निर्माणं कुरुत –

| प्रकृतिः + प्रत्ययः | पदम् |
|---|---|
| कृ+तृच् | ————— |
| दण्ड+इनि | ————— |
| रेवती+ठक् | ————— |
| शिव+अण् | ————— |
| भस्म+मयट् | ————— |
| पटु+तरप् | ————— |
| लघु+तमप् | ————— |
| कोकिल+टाप् | ————— |
| नर्तक+ङीष् | ————— |
| भव+ङीष् | ————— |
| मूषक+टाप् | ————— |
| गोप+ङीष् | ————— |

## अव्ययाः

1. मंजूषातः अव्ययं चित्वा रिक्त–स्थान–पूर्तिं कुरुत –

(अद्य, सहसा, पुरा, सायम् किल, श्वः, ह्यः, शनैः शनैः प्रायः मिथ्या)

(i) शशकः तीव्रं धावति, कच्छपः .......................... गच्छति।

(ii) .......................... विदधीत न क्रियामविवेकपरमापदां पदम्।

(iii) रामः .......................... स्वकार्यं समये करिष्यति।

(iv) मम मित्रं ललितः ..........................मम गृहम् आगच्छति।

(v) .......................... बुधवासरः आसीत्। .......................... गुरुवासरः अस्ति। .......................... शुक्रवासरः भविष्यति।

(vi) .......................... कृषकाः हलेन बलिवर्द–सहायेन च कृषिकर्म कुर्वन्ति।

(vii) अनन्तसारं .......................... शब्दशास्त्रं अल्पश्च आयुः बह्वश्च विघ्नाः।

(viii) .......................... काले जनाः भ्रमणार्थम् उद्याने गच्छन्ति।

2. उचित–अव्ययं चित्वा रिक्तस्थानं पूरयतु–

(i) बधिरस्य पार्श्वे जनाः .......................... वदन्ति। (शनैः / उच्चैः / मिथ्या)

(ii) गणतन्त्र दिवसे सैनिकाः राजमार्गे .......................... चलन्ति। (चिरम् / युगपत् / शनैः)

(iii) .......................... त्वाम्। अकारणमेव मिथ्या वदसि। (धिक् / नूनम् / किल)

(iv) छात्राः .......................... प्रश्नान् पृच्छन्ति, शिक्षकः वारं–वारं उत्तरम् ददाति। (चिरम् / तुष्णीम् / पुनः पुनः)

(v) सः .......................... निवसति?(सर्वत्र / कुत्र / एकत्र)

(vi) ईश्वरः .......................... अस्ति। (सर्वत्र / कुत्र / एकत्र)

(vii) रामस्य पिता .......................... जयपुरं गमिष्यति। (श्वः / ह्यः / अद्य)

(viii) मम माता .......................... उदयपुरनगरात् आगच्छत्। (श्वः / ह्यः / अद्य)

(ix) सः अत्र .......................... कालात् प्रतीक्षां करोति। (पुरः / प्रायः / चिरम्)

(x) यदा कक्षायां शिक्षकः आगच्छति तदा कक्षे .......................... भवति। (पुरः / तूष्णीम् / भूयः)

## शब्द–धातु–रूपाणि

1. अधोलिखितेषु रिक्तस्थानेषु कोष्ठकांकित–निर्देशानुसारं पूर्तिं कुरुत–

(i) सुरेशः श्व ग्रामे ..........................। (आ+गम्–लृट् लकार, प्रथम पुरुष, एकवचनम्)

(ii) सर्वे छात्राः युगपत् ..........................। (चल् लट् लकार प्रथम पुरुष बहुवचनम्)

(iii) एकस्मिन् नगरे एकः भिक्षुकः ..........................। (वस् लङ् प्रथम पुरुष एकवचनम्)

(iv) सत्यं ..........................। धर्मं चर। (वद् लोट् मध्यम पुरुष एकवचनम्)

(v) अहं प्रतिदिनं विद्यालयं ..........................। (गम्–लट्– उत्तमपुरुष–एकवचनम्)

(vi) ते उद्याने ..........................। (क्रीड्–लट्–प्रथम–पुरुष–बहुवचनम्)

(vii) छात्राः समये गृहकार्यं..........................। (कृ–धातुः, विधिलिङ्–प्रथमपुरुष –हुवचनम्)

(viii) वृक्षात् पत्राणि ..........................। (पत्–धातु–लट्लकार–प्रथमपुरुष–बहुवचनम्)

(ix) मम पार्श्वे दश रूप्यकाणि .......................... । (अस्–लट्–लकार–प्रथमपुरुष–बहुवचनम्)

(x) यदा त्वम् आगमिष्यसि तदा ते .......................... । (गम्–लृट्–प्रथम–पुरुष–बहुवचनम्)

2. अधोलिखितेषु रिक्तस्थानेषु कोष्ठकांकित–निर्देशानुसारं पूर्तिं कुरुत–

(i) .......................... तत्र गमिष्यामि । (अस्मद् शब्द, प्रथमा–विभक्ति–एकवचनम्)

(ii) मोहनः .......................... खंजः । (पाद–शब्द–तृतीयाविभक्ति–एकवचनम्)

(iii) .......................... पितुः नाम मोहनः अस्ति । (अस्मद्–शब्द–षष्ठी–विभक्ति–एकवचनम्)

(iv) .......................... रोचते भक्तिः । (हरि–शब्द–चतुर्थी–विभक्ति –कवचनम्)

(v) .......................... आत्मा अस्ति । (सर्व–शब्द–सप्तमी–विभक्ति–कवचनम्)

(vi) .......................... विश्वस्य मातरः । (गो–शब्द–प्रथमा–विभक्ति–बहुवचनम्)

(vii) रामस्य .......................... किं नाम आसीत्?(पितृ–शब्द–षष्ठी–विभक्ति–एकवचनम्)

(viii) .......................... मानवः श्रेष्ठतमः । (प्राणिन्–शब्द–सप्तमी–विभक्ति–बहुवचनम्)

(ix) .......................... विना नाहं जीवामि । (युष्मद्–शब्द–तृतीया–विभक्ति–एकवचनम्)

(x) .......................... कारणात् सः अनुत्तीर्णः । (तत्–शब्द–पुंल्लिंग–पंचमी–विभक्ति–एकवचनम्)

## कारकप्रकरणम्

प्र.1 अधोलिखितेषु वाक्येषु रेखांकित–पदस्य विभक्तिं कारणं च लिखत–

माणवकं <u>पन्थानं</u> पृच्छति ।

हरिः <u>वैकुण्ठं</u> अधिशेते ।

<u>विद्यालयं</u> प्रति गच्छति

<u>अक्ष्णा</u> काणः ।

<u>अह्ना</u> अनुवाकोऽधीतः ।

<u>हरये</u> रोचते भक्तिः ।

<u>भक्ताय</u> धारयति मोक्षं हरिः ।

<u>वृक्षात्</u> पत्रं पतति ।

<u>ब्रह्मणः</u> प्रजाः प्रजायन्ते ।

<u>यवेभ्यो</u> गां वारयति ।

<u>कृपणस्य</u> कृतिः ।

<u>मोक्षे</u> इच्छति ।

<u>गवां गोषु</u> वा कृष्णा बहुक्षीरा ।

2. अधोलिखितेषु वाक्येषु रेखांकितपदे प्रयुक्तं कारक–सूत्रं लिखत–

देवदत्तः शतं जयति

विष्णुः क्षीरसागरं अधितिष्ठति।

पुत्रेण सहागता पिता।

शिरसा खल्वाटः।

दण्डेन यतिः।

रामं विना नाहं जीवामि।

बालिका पुष्पेभ्यः स्पृह्यति।

प्रजाभ्यः स्वस्ति।

चौरात् बिभेति।

शिष्यः उपाप्यायाद् अधीते

पापात् जुगुप्सते।

बलरामस्य तुल्यः भीमः।

गोषु दुह्यमानासु गतः

साधु मातरि मातुले वा।

6. यस्मिन्–पदस्य विभक्तिं वचनं च लिखत?

7. सर्वत्र–अव्ययस्य प्रयोगं कृत्वा एकस्य वाक्यस्य निर्माणं कुरुत?

————————